(ग) प्रश्नोत्तररत्नमालिका ।

अक्षर – नेवारी । १४ पत्राणि ।

(घ) चौरपञ्चाशिका ।

अक्षर – नेवारी ।

(ङ) सुवन्तरत्नाकरः । (?)

मैथिलमक्षरम् ।

प्रारम्भवाक्यम् । ॐ नमो गणेशाय ।

नमः सरस्वतीपादपङ्कजाय हितैषिणे ।

यत्प्रसादाज्जगत् सर्व्वमनु × × सुपजायते ॥

रूढ़िशब्दा निगद्यन्ते पुंसि षण्ढे स्त्रियामपि ।

गुणद्रव्यक्रियायोगास्त्रिलिङ्गास्तदनन्तरम् ॥

विप्राग्निसखिपत्य + क्रोष्टुप्रतिभू . . . . ।

प्रशस्ता वै गोद्यावौ पुंस्यजन्ताः प्रकीर्त्तिताः ॥ इत्यादि ।

११६५

(क) सूर्य्यसिद्धान्तभाष्यम् ।

मैथिलमक्षरम् । मैथिलवाजपेय-चण्डेश्वराचार्य्यकृतम् ।

११७६

(क) दशकर्म्म ।

अक्षर – नेवारी ।

(ख) भगवद्गीता ।

अक्षर – नेवारी ।

(ग) पूजाविधिः ।
अक्षर – नेवारी ।

(घ) स्तवराजः ।
अक्षर – नेवारी ।

(ङ) मयूरचित्रम् ।

अन्तवाक्यम् । स्वस्ति श्रीराजाधिराज-श्रीश्रीजयस्थितिराजमल्लदेवस्य विजयराज्ये लिखितमिदं पुस्तकम् । तस्मिन् समये श्रीजयार्जुननामा राजा त्रिपुरराजसचिवेन प.... महासङ्कटे प्रविशति ।

(च) स्तवराजः ।

(छ) विवाहपद्धतिः ।
( कतिचित्पत्राणि । ) अक्षर – नेवारी ।

११७८

(क) मयूरचित्रम् ।
अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः सर्व्वज्ञाय ।
गर्गं मुनिवरश्रेष्ठं ज्योतिषज्ञानपारगम् ।
अभिवाद्याञ्जलिं कृत्वा भागुरिः परिपृच्छति ॥
भगवन् श्रोतुमिच्छामि दिव्यचक्षुर्महातपम् ।
... ... मुत्तमज्ञानं ज्योतिषज्ञानपारग ॥
इत्यादि ।

पुष्पिकाः,— इति मयूरचित्रे प्रथमोऽध्यायः समाप्तः ।
इति मयूरचित्रे तृतीयोऽध्यायः ।
इति मयूरचित्रे पञ्चमोऽध्यायः ।
इति मयूरचित्रे उत्पातलक्षणे षष्ठोऽध्यायः ।
इति मयूरचित्रे भौम्योपेतलक्षणे (?) सप्तमोऽध्यायः ।
इति मयूरचित्रे अष्टमोऽध्यायः ।

(ख) भगवद्गीता ।
कतिपयानि पत्राणि ।

११८०

(क) **यवनजातकम् ।**

| | | | |
|---|---|---|---|
| ४ | पत्रे,—इति | यवनजातके | मित्रामित्रविधिः । |
| ७ | ,, | ,, | ग्रहस्वरूपः प्रथमः । |
| ९ | ,, | ,, | होरास्वरूपः द्वितीयः । |
| ११ | ,, | ,, | द्रेक्काणस्वरूपस्तृतीयः । |
| १३ | ,, | ,, | ग्रह ... ... विधिः । |
| १५ | ,, | ,, | आधानविधिः । |
| १६ | ,, | ,, | सूतिकाविधिः, मूलत्रिकोणविधिश्च । |
| ,, | ,, | ,, | मित्रक्षेत्रविधिः, नीचक्षेत्रविधिश्च । |
| १८ | ,, | ,, | राजजन्म । |
| ,, | ,, | ,, | चौरजन्माध्यायः । |
| २० | ,, | ,, | चन्द्रयोगविधिः । |
| ,, | ,, | ,, | सूर्य्ययोगविधिः । |
| २२ | ,, | ,, | सूर्य्यराशिफलम् । |
| २३ | ,, | ,, | बुधराशिफलम् । |
| २४ | ,, | ,, | शुक्रराशिफलम् । |
| ३० | ,, | ,, | चन्द्रराशिफलम् । |
| ,, | ,, | ,, | मेषलग्नफलम् । |
| ३१ | ,, | ,, | वृषलग्नफलम् । |
| | | | ( एवं कर्कट, सिंह, कन्या, तुला, वृश्चिक, धनुः, मकर, कुम्भ, मीन,–लग्नानां फलानि । |
| ३३ | ,, | ,, | लग्नफलं समाप्तम् । |
| ३४ | ,, | ,, | लग्नगतग्रहदृष्टिः । |
| ३५ | ,, | ,, | द्विग्रहयोगः । |
| ३६ | ,, | ,, | प्रव्रज्यायोगः । |
| ३९ | ,, | ,, | स ... ... भावफलम् । |

५१ पत्रे इति यवनजातके नवांशफलम् ।

५२ ,, ,, चन्द्रांशदृष्टफलम् ।

५७ ,, ,, अरिष्टयोगः । आयुर्दायश्च ।

६० ,, ,, दशापाकफलम् ।

६२ ,, ,, निर्य्याणगतिः समाप्ता ।

७२ ,, ,, त्रयस्त्रिंशच्छतद्वयाधिकसहस्रद्वय-अङ्कानि । २२३३ ।

७३ ,, ,, प्रश्नजातकः समाप्तः ।

७४ ,, ,, कण्टकयोगः ।

७५ ,, ,, अन्योऽन्यवर्गः ।

७६ ,, ,, यात्रादिग्रहयोगः ।

८३ ,, ,, सकर्त्तयोग – – – र्दिसिद्धिः ।

८९ ,, ,, यवनप्रश्ने मृत्युफलम् ।

९२ ,, ,, स्वप्नविधिः समाप्तः ।

९४ ,, ,, यात्रासन्दर्शनविधिः ।

१०२ ,, ,, यवनजातके – – – परिसमाप्तः ।
उपेन्द्रवज्रावृत्त ... ... ।

११८६

नरपतिजयचर्य्याटीका ।

जगज्ज्योतिर्मल्लेन रचिता । शाके १५३९ ।

१२०६

(क) होराशास्त्रम् ।

३० पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः सूर्य्याय ।

मूर्त्तित्वे परिकल्पितः शशिभृतो – – पुनर्जन्मना-(?)
सात्मेत्यात्मविदां क्रतुश्च यजतां भर्त्तामरज्योतिषाम् ।
लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः ॥

6

भूयोभिः पटुबुद्धिभिः पटुधिया होराफलं ज्ञप्तये
शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि ।
होरातन्त्रमहार्णवं प्रतरणे भग्नोद्यमानामहं
स्वल्पं वृत्तिविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे ॥ इत्यादि ।

अन्त्यं खण्डितम् ।

पुष्पिकाः ; – होराशास्त्र राशिसंज्ञाध्यायः

,, ग्रहयोनिभेदः ।

,, वियोनिपातकम् । (?)

,, आयुर्दायाध्यायः

,, अष्टवर्गाध्यायः ।

,, कर्मयोगाध्यायः ।

,, राजयोगाध्यायः ।

,, संख्यायोगाध्यायः ।

,, चन्द्रयोगाध्यायः ।

,, प्रव्रज्यायोगाध्यायः ।

(ख) **भोजदेवसंग्रहः ।**

( खण्डितान्तः । ) अक्षर – नेवारी ।

(ग) **वैदिकमन्त्रसंग्रहः ।**

( ऋग्वेदीयः । ) १६ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐनमो ब्रह्मणे नमः ।

अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ इत्यादि ।

(घ) **पुरुषसूक्तम् ।**

( खण्डितान्तम् । ) अक्षर – नेवारी ।

संवत् ४४४ चैत्र – – – ।

(ङ) **वैदिकमन्त्रसंग्रहः ।**

( यजुर्वेदीयः । ) अक्षर – नेवारी ।

श्लोकस्तु ; –

इमेत्वोर्जेत्वा वायवस्थ देवो वः सविता ।   इत्यादि ।

१२३० ।

(च) मानवन्यायशास्त्रम् ।

( नेवारी भाषायाम् ।) ११ – १४३ पत्राणि । अक्षर – नेवारी ।

अन्तवाक्यम् । तम्रमाग्रप्रकरणं समाप्तम् ।

इदमल्पधियां नृणां बुद्धिवृद्धियं परोदितम् ।

नारदीयं यद. . न्यायशास्त्रं महार्णवत् ॥

तस्येयं लिख्यते टीका स्पष्टं नेपालभाषया ।

इमां विज्ञाय भूपाद्याश्चरन्तु न्यायवर्त्मना ॥

इति मानवे न्यायशास्त्रे नारदप्रोक्तायां संहितायां न्यायधर्म्मपदानि समाप्तानि ॥

नेपाले स्थितिराजमल्लनृपतिर्भूपालचूडामणि-

स्तस्यामात्यवरोऽर्थिकल्पविटपी सन्नीतिवारांनिधिः ।

तस्यार्थे मणिकाभिधेन कृतिना नेपालवाचा कृता

टीका न्यायविकाशिनी सुविदिता ब्रह्मोक्तधर्म्मस्मृतेः ॥

धीमांश्चन्दनवर्म्मसूनुरमलप्रज्ञाप्रभावस्फुर-

न्नीतिस्पर्द्धितनाकनायकगुरुर्मन्त्रीन्द्रचूडामणिः ।

जीयात् सर्व्वगुणाश्रयोऽमलयशा मन्त्रप्रभाभास्करो

मन्त्री श्रीजयतः कृपार्द्रहृदयः सर्व्वार्थिकल्पद्रुमः ॥

श्रीनेपालिकवत्सरे खखशरे पक्षे सिते फाल्गुने

मासे वाग्नितिथौ . . . . . . भक्तापुरीपट्टने ।

राज्ये श्रीस्थितिराजमल्लनृपते राजल्लदेवीपतेः

श्रीमन्न्यायविकाशिनी सुविदिता सम्पूर्त्तिमागादियम् ॥

लिखिता लून(लुन्द)भद्रेण वज्राचार्य्येण धीमता ।

मन्त्रीन्द्रजयतस्यार्थे स्पष्टेयं न्यायटिप्पनी ॥

स्वस्ति श्रीनेपालिकसंवत्सरे ५०० फाल्गुनशुक्लतृतीयायां गुरुवासरे श्रीश्रीजयस्थितिराजमल्लदेवस्य विजयराज्ये भक्तपुरे अमात्यजयतवर्म्मणः

पुस्तकमिदमलेखि श्रीकीर्त्तिपुण्यमहाविहाराधिवासिना शाक्यभिक्षु-
वज्राचार्य्य-श्रीलुन्द(लून)भद्रेणेति । शुभमस्तु सर्व्वजगताम् ।
श्रीमानमात्यजयतो रिपुमन्त्रिमन्त्रमौढ़ाम्बुदप्रसरविस्फुरणैकवायुः ।
स्वस्वामिकार्य्यपरिपालनवायुसूनुः पायात् प्रजा निजसुतानिव सर्व्वदैव ॥

(छ) मैथिलब्राह्मणानां कुलपञ्जी ।

( खण्डिता । ) मैथिलाक्षरलिखिता ।

(ज) एकादशीव्रतमाहात्म्यम् ।

अक्षर – नेवारी । ३३ पत्राणि ।

संवत् ४०० फाल्गुन-कृष्ण-एकादश्यां तिथौ सोमवासरे ।

श्रीनेपालदेशे श्रीपशुपतिस्थाने श्रीआनन्दमल्लदेवस्य राज्ये लिखित ... ।

(झ) सौरसंहिता ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय ।

कार्त्तिकेय उवाच ।

भगवन् देवदेवेश अनादिपरमेश्वर ।
समाख्यातं त्वया सर्व्वं वाङ्मयं सचराचरम् ॥
आदित्यस्य सुरेशान संशयोऽद्यापि मे महान् ।
आदौ तस्य नमस्कार ...... तदनन्तरम् ॥
क एष देव आदित्यः कुतो जातः किमुच्यते ।
कथयस्व यथान्यायं साम्प्रतं मे महेश्वर ॥ इत्यादि ।

अन्तवाक्यम् । सौरसंहितायां प्रयोजन ...... दशमः पटलः समाप्तः ।
अस्य ग्रन्थप्रमाणस्य निपुणं परिपिण्डितम् ।
सप्तशतिकसंलख्य ? सौरतन्त्रमिदं शुभम् ॥
इति । संवत् ६१ अश्विनि(आश्विन) कृष्णादिवात्रयोदश्यां
श्रीनीनीसालायां निवासिनः ... ... ... ।
अतःपरं द्वे पत्रे गुप्ताक्षरलिखिते स्तः तत्र तन्त्रोक्तानि कानिचि-
न्मन्त्राणि सन्ति ।

(ञ) नारदीय-धर्मशास्त्रम् ।

अक्षर – नेवारी ।

(ट) विवादचन्द्रः ।

मिसरूमिश्रेण रचितः । मैथिलाक्षरलिखितः । लसं ४८१ ।

१२६१ ।

(क) प्रतिष्ठातन्त्रम् ।

जीर्णम् । खण्डितम् । अक्षर – नेवारी ।

(ख) तत्वचिन्तामणिः ।

(अनुमानखण्डः।) गङ्गेश्वरेण रचितः । मैथिलाक्षरलिखितः । लसं ४३६ ।

(ग) कर्पूरमञ्जरीनाटिका ।

मैथिलाक्षरलिखिता । लसं ३५८ ।

(घ) वाग्वतीमाहात्म्यप्रशंसा ।

खण्डिता । अक्षर – नेवारी ।

पुष्पिका । वागवतीमाहात्म्यप्रशंसायां तीर्थवर्णने प्रच + तर्याबद्धिर्नाम प्रथमः ।

(ङ) तात्पर्यपरिशुद्धिः ।

उदयनेन रचिता । मैथिलाक्षरलिखिता ।

१३२० ।

(क) नित्याह्निकतिलकम् ।

अक्षर – नेवारी । संवत् ३१७ ।

(ख) दानवाक्यावली ।

विद्यापतिना रचिता । २९ पत्राणि । लसं ३९५ ।

( मङ्गलाचरणादिकं किमपि नास्ति । )

(ग) श्रीदत्तपद्धतिः ।

लसं २९९ ।

(घ) कात्यायनश्राद्धविधिः ।

१२ पत्राणि । अक्षर – नेवारी ।

(ङ) सन्ध्याविधिः ।

अक्षर – नेवारी । संवत् ४०१ चैत्रकृष्णपञ्चम्याम् ।

(च) लक्ष्म्यवतारस्तोत्रम् ।

संवत् ४०३ । आषाढ़कृष्णसप्तम्यां .. राजाधिराज......

अनन्तमल्लदेवस्य विजयराज्ये ।

(छ) कौमारीपूजा ।

संवत् ४०० । वैशाख-अमावास्या......

राजाधिराज .... अनन्तमल्लदेवस्य विजयराज्ये ।

(ज) अनन्तव्रतविधिः ।

संवत् ४०५ । श्रावण.... राजाधिराज.... अनन्त

मल्लदेवस्य विजयराज्ये ।

(झ) महालक्ष्मीव्रतम् ।

(ञ) महालक्ष्मीव्रतम् । वा लक्ष्मीचरित्रम् ।

रामकविराजेन रचितम् ।

अन्तवाक्यम् । श्रीरामनामकविराजकृतं पवित्रं

लक्ष्मीचरित्रमतुलं व्रतराजराजम् ।

कुर्व्वन्ति धीधनमनाः सुखिनो भवन्तु (?)

.. .. .. .. कमलाप्रसादात् ॥

इति महालक्ष्मीमहा .. महापण्डित-श्रीश्रीरामविरचिते पञ्चमोऽध्यायः

समाप्तः ॥

संवत् ३९९ । फाल्गुन .. .. .. ।

.. .. राजाधिराज .. .. .. श्रीअनन्तमल्लदेवस्य विजयराज्ये ।

(ट) विष्णुपञ्जरस्तोत्रम् ।

संवत् ४०० ।

(ठ) शनैश्चरस्तवः ।

( स्कन्दपुराणीयः । ) अक्षर — नेवारी ।

(ड) नीलकण्ठस्तवः ।

संवत् ४०० ।

(ढ) वाजसनेयिनामहोरात्राश्रितधर्मनिबन्धः। (?)

(स्मृतिशास्त्रम्।)

प्रारम्भवाक्यम्। .. दाक्षितोरणयज्ञेषु (?) विबुधानन्ददायिने।

हरिरब्धिसुतावक्त्रसोमपीतौ(थौ)पुनातु वः॥

अहोरात्राश्रितो धर्म्म इह वाजसनेयिनाम्।

निबध्यते निब – – – – भि॥

तत्र मनुः। ब्राह्मे मुहूर्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत्।

कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च॥ इत्यादि।

अन्त्यं खण्डितम्।

(ण) नित्याह्निकतिलकम्।

संवत् ५२३।

(त) पुरुषपरीक्षा।

विद्यापतिरचिता। १०६ पत्राणि। लसं ५४२।

(थ) माधवानलकथा।

प्रारम्भवाक्यम्। ॐ नमः शिवाय।

प्रणम्य परया भक्त्या हंसयानां सरस्वतीम्।

तस्याः प्रसादमासाद्य करिष्यामि कथामिमाम्॥

अस्ति ... पुष्पवती नाम नगरी। ... तत्र नगरे राजा गोविन्दचन्द्रो-
नाम तस्य राज्ञीनां सप्तशतानि तासां मध्ये पट्टराज्ञी महादेवी पद्मिनी-
जातिः पद्मावती नाम .. .. .. तस्य राज्ञो गृहे माधवानलनामा
विप्रोऽस्ति। इत्यादि।

अन्तवाक्यम्। इति माधवानलकथा समाप्ता। लसं ५४२।

(द) महालक्ष्मीमतभट्टारकः।

विवरणं प्रदत्तम्।

**१३२१**

(क) तात्पर्य्यपरिशुद्धिः।

२४ पत्राणि। मैथिलाक्षरलिखिता।

प्रारम्भवाक्यम् ।        ॐ नमो गणेशाय ।

रागानुगतसम्भेदौ चन्द्रसूर्य्यानिलेक्षणौ ।

नमामि गिरिजेशानौ यामिनीवासराविव ॥    इत्यादि ।

पुष्पिका ।   इत्याचार्य्यश्रीमदुदयनकृतौ तात्पर्य्यपरिशुद्धौ पञ्चमोऽध्यायः । लसं ४०३ चैत्रवदि १ चन्द्रे ए दिने भट्टाचार्य्यश्रीवाणीनाथस्याज्ञया – – श्रीवाचस्पतिशर्म्मणा लिखितमिदं पुस्तकम् ।

(ख)   दानधर्म्मः ।

( महाभारतशान्तिपर्व्वीयः । ) अक्षर – नेवारी ।

पुष्पिका ।   महाभारते शतसाहस्र्यां संहितायां दानधर्म्मेषु वैष्णवधर्म्मशास्त्रे पञ्चदशोऽध्यायः परिसमाप्तः । संवत् १६९ । ( आचाराणङ्कानि । )

१ २ ३ ०

(क)   सारसङ्ग्रहः ।

( धर्म्मशास्त्रम् । )

पुष्पिका ।   इति वेदवैष्णवसिद्धान्तरहस्ये सारसङ्ग्रहे लक्षहोमविधौ नवमः परिच्छेदः परिसमाप्तः । शुभमस्तु । संवत् ३७५ ।

(ख)   न्यायवार्त्तिकतात्पर्य्यटीका ।

( पञ्चमाध्यायस्य । ) वाचस्पतिमिश्रेण रचिता ।

१ २ ६ १ ।

(क)   दशक्रियाविधिः ।

( खण्डितः । ) अक्षर – नेवारी ।

(ख)   स्तवराजमाहात्म्यम् ।

( भविष्यपुराणोक्तम् । ) अक्षर – नेवारी ।

(ग)   शनैश्चरस्तवः ।

( स्कन्दपुराणीयः । ) अक्षर – नेवारी ।

संवत् (४९३) रामनन्दयुगे आषाढकृष्णातृतीयायां तिथौ शतभिषानक्षत्रे ..... देवज्ञां वज्र(त्न)राजेन लिखितश्च ।

(घ) नयतत्वालोकः।

( तृतीयाध्यायात् खण्डितचतुर्थाध्यायपर्य्यन्तः।)

वाचस्पतिमिश्ररचितः। मैथिलाक्षरलिखितः।

पुष्पिका। इति महामहोपाध्यायमिश्रश्रीवाचस्पतिविरचिते नयतत्वालोके तृतीयाध्यायः समाप्तः। लसं ४४९। आश्विने काकोग्रामे।

(ङ) न्यायवार्त्तिकतात्पर्य्यटीका।

( द्वितीयाध्यायपर्य्यन्ता।) उदयनरचिता। शकाब्दाः १४१०। ... ...।

सर्षपग्रामे महामहोपाध्यायसन्मिश्रश्रीमच्छङ्कराणां चौपाड्यां गौडीयाम्बष्ठ-श्रीमद्वासुदेवेन – – – –।

(च) कर्म्मक्रियाकाण्डः।

सोमशम्भुरचितः। विवरणं प्रदत्तम्।

(छ) विवादरत्नाकरः।

( खण्डितः। ) मैथिलाक्षरलिखितः।

(ज) अमृतेश्वरदेवस्य नित्यपूजाविधिः।

अक्षर – नेवारी। ११ पत्राणि।

प्रारम्भवाक्यम्। ॐ नमः शिवाय।

सव्यापसव्यभुजयोर्दधदिन्दुबिम्बं
कुम्भश्च भूरिसुधमम्बकशुभ्ररोचिः।
अङ्के प्रियाश्च वरदाभयपाणिरेष
मृत्युञ्जयो जयति साङ्गनिशाकरो × ॥
– – – – वक्ष्ये येन सिद्ध्यति मन्त्रराट्।
आदौ स्नानं प्रकुर्व्वीत सर्व्वकिल्बिषनाशनम्।
अस्त्रमन्त्रेण वैवेशि मृदमुद्धृत्य मन्त्रवित्॥ इत्यादि।

अन्तवाक्यम्। इत्यमृतेश्वरदेवस्य नित्यपूजाविधिः।

(झ) वामकेश्वरीपूजापद्धतिः।

१७ पत्राणि। अक्षर – नेवारी।

7

(ञ) गुरुपंक्तिपूजाविधिः ।

९ पत्राणि । अक्षर – नेवारी ।

(ट) पुरश्चरणचन्द्रिका ।

( खण्डिता । ) देवेन्द्राश्रमरचिता । ४४ पत्राणि । वङ्गाक्षरलिखिता ।

पुष्पिका । इति परमहंसपरिव्राजकाचार्य्यश्रीविबुधेन्द्राश्रमपूज्यपाद-शिष्य-देवेन्द्राश्रमविरचितायां पुरश्चरणचन्द्रिकायां कुण्डमण्डपविधानम् ।

(ठ) किरणावलीटीका ।

वङ्गाक्षरलिखिता ।

प्रारम्भवाक्यम् । ॐ नमो भगवते गोपालाय ।

विद्यासन्ध्योदयोद्रेकादविद्यारजनीक्षये ।
यदुदेति नमस्तस्मै कस्मैचित् विश्वतन्त्विषे ॥
यतो द्रव्यं गुणाः कर्म्म तथा जातिः परापरा ।
विशेषाः समवायो वा तमीश्वरमुपास्महे ॥
अर्थानां प्रविवेचनाय जगतामन्तस्तमःशान्तये
सन्मार्गस्य विलोकनाय गतये लोकस्य यात्राखिलः । ?
तत्तत्तामसभूतभीतय इमां विद्यावतां प्रीतये
व्यातेने किरणावलीमुदयनः सत्तर्कतेजोमयीम् ॥
अतिविततगभीरं मानवार्त्ताविहीनं
प्रविततबहुवेलप्रक्रियाजालदुःस्थम् ।
उदधिसममतर्क्यं तन्त्रमेतद् वदन्ति
प्रखलजड़धियो ये तेऽनुकम्प्यन्त एते ॥

शास्त्रारम्भे सदाचारपरम्परापरिप्राप्ततया कायवाङ्मनोभिः कृतं परापरगुरुनमस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति प्रणम्येति । इत्यादि ।

अन्तवाक्यम् । इतिशब्दो द्रव्यपदानुसमाप्तौ । शकाब्दाः १४९१ ।

– – – श्रीहरिशर्म्मणः स्वाक्षरमिदं पुस्तकञ्च ।

नवद्वीपे पुस्तकं साङ्गं यातम् ॥

(ड) अमरकोषः ।

वङ्गाक्षरलिखितः ।

अन्तवाक्यम् । विसं १५११ । श्रावणशुक्लनवम्यां शुक्रे श्रीचम्पकारण्यनगरे विप्रराजदैत्य (?) नारायणस्येत्यादिविविधविरुदराजिविराजमानमहाराजाधिराज-श्रीमन्मदनसिंहदेवानां सम्भुज्यमानविजयराज्ये ठक्कुरश्रीगङ्गयीकै-र्लिखितमिति ।

(ढ) देवीमाहात्म्यटीका ।

( दुर्गासन्देहभेदिकानाम्नी । ) वङ्गाक्षरलिखिता ।

पुष्पिका । इति हारिताम्नश्रीपीताम्बरकृतायां दुर्गासन्देहभेदिकायां त्रयोदशे माहात्म्ये तदुपसंहारविवेचनम् ।

श्रीमानिमां हलधरोऽलिखदम्बिकाया-

ष्टीकाञ्च वंशमणिराद्यम शेषसध्येि (?) ।

नेत्राब्धिरामयुतलक्ष्मणसेनवर्षे

भाद्रे कुजे हरिपुरे हरिवासरे द्राक् ॥

## १२६२

(क) महापुरुषस्तवः ।

( भागवतदशमस्कन्धीयः । ) १० पत्राणि ।

अक्षर – नेवारी । श्रीमन्नेपालिकसंवत् —

ऋतुग्रहरसवर्षे ज्येष्ठमासे कृष्ण ९ ॥

(ख) अनन्तव्रतानुष्ठानम् ।

( भविष्योत्तरीयम् । ) ५ पत्राणि । अक्षर – नेवारी ।

(ग) विष्णुजन्मानुकीर्त्तनम् ।

( भविष्यपुराणीयम् । ) अक्षर – नेवारी ।

(घ) रामचन्द्रनामाष्टोत्तरशतम् ।

( पद्मपुराणोत्तरखण्डीयम् । ) अक्षर – नेवारी ।

(ङ) वशिष्ठदिलीपसंवादः ।

( पद्मपुराणोत्तरखण्डीयः । ) ४९ पत्राणि ।

अक्षर – नेवारी ।

(च) महालक्ष्मीमाहात्म्यव्रतव्याख्यानसमुच्चयः ।

गालवकृतः (?) । ५० पत्राणि । अक्षर – नेवारी ।

पुष्पिका । इति महालक्ष्मीमाहात्म्यव्रतव्याख्यानसमुच्चये षोडशः पटलः समाप्तः ।

अयाऽस्तु संवत् ६८८ चैत्रमासे शुक्लपक्षे ।

(छ) कालभैरवस्तोत्रम् ।

( काशीखण्डीयम् । ) अक्षर – नेवारी । १७ पत्राणि ।

(ज) अनन्तव्रतविधानम् ।

७ पत्राणि । अक्षर – नेवारी ।

(झ) अगस्त्यव्रतविधानम् ।

४ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो ब्रह्मणे नमः ।

अगस्त्यव्रतं प्रवक्ष्यामि । करन्यासः । अगस्त्य अस्त्राय फट् ।

अङ्गन्यासः । अगस्त्य हृदयाय नमः । इत्यादि ।

पुष्पिका । इति अगस्त्यव्रतविधानं समाप्तम् ॥

(ञ) विष्णुप्रतिष्ठाविधिः ।

खण्डितान्त्यः ।

३५ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो भगवते वासुदेवाय ।

अथ विष्णुप्रतिष्ठाविधिर्लिख्यते । तत्र आचार्य्यनिमन्त्रण-मण्डलकृत-
पुरश्चरण-ब्रह्मचर्य्यगायत्री – – – कुण्डलादिकं कृत्वा – –
यज्ञमण्डपं गत्वा – – – लभेत ॥ इत्यादि ।

(ट) कालिकाकुलसर्वस्वे कालिकास्तोत्रम् ।

मैथिलाक्षरलिखितम् । लसं ५१२ ।

(ठ) सिद्धान्तसारपद्धतिः ।

भोजदेवरचिता । ७१ पत्राणि । अक्षर – नेवारी ।

संवत् १८७ । ( आक्षराण्यङ्कानि । ) कार्त्तिक ।

(ड) वैदिकमन्त्रसङ्ग्रहः । (?)

अक्षर – नेवारी । १३ – १८ पत्राणि ।

१३ पत्रे, – ॐ कन्या इव वहन्तु मे तवा उत्तं जाना अभि चाकशीमि ।

यत्र सोमः भूयते यत्र यज्ञो घृतस्य धारा अभि तत्परं ते ॥ इत्यादि ।

(ढ) अनन्तव्रतोद्यापनविधिः ।

२ – १५ पत्राणि । अक्षर – नेवारी ।

संवत् ६२१ अश्विनी कृष्ण ९ । ... ।

(ण) सारदास्तवः ।

६ पत्राणि । अक्षर – नेवारी । संवत् ५२० चैत्रवदि । ... ।

(त) मञ्जुश्रीसाधनम् ।

विवरणं प्रदत्तम् ।

(थ) षट्साहस्रम् ।

खण्डिताग्रम् ।

७९ पत्राणि । अक्षर – नेवारी ।

५ पत्रे, –

श्रीदेव्युवाच ।

श्रीमतन्तु महाज्ञानमित्यादितृतीयपटलावधिपर्यवत् व्याख्यालेखनविधिस्तथा गुरुशिष्यसमयलक्षणादिकं स्पष्टार्थम् । इति षट्साहस्रे तृतीयः पटलः ।

पुष्पिकाः, — इति षट्साहस्रे १ । २ । ३ । ४ । ५ पटलानि ।

इति० मन्त्रव्याख्यानो ? नाम पटलः षष्ठः ।

इति षट्साहस्रे – ७ । ८ । ९ । १० पटलानि ।

इति० अघोर्याष्टकत्रिविद्या + ङ्गस्य लक्षणम् । ११ ।

इति० द्वादशाङ्गषड्ङ्गमालिन्योद्धारे । १२ ।

इति० हृदयशिरोवृतीलक्षणे । १३ ।

इति० शिखावृतीलक्षणे । १४ ।

इति० शिखास्वच्छन्दे देवस्य शिखावृती अघोरमन्त्रोद्धारादिकम् । १५ ।

इति कवचवृत्ती समाप्ता ।

इति० १६ । १७ । १८ । १९ पटलानि ।

इति० योगिनीनां चक्रश्चतुर्विंशतितमः पटलः ।

( ततः परमस्ति पत्रद्वयम् । )

(ट) देवीमाहात्म्यम् ।

( खण्डितम् । ) नागराक्षरम् ।

कुलालिकाम्नायान्तर्गत-कुब्जिकामतम् ।

अक्षर – नेवारी ।

खण्डादन्यस्माद् विवरणं प्रदत्तम् ।

अन्तवाक्यम् । – – रामदेवस्य परमेश्वरपरमभट्टारकपरमसौगतमहाराजाधिराज-श्रीमद्रामपालदेवस्य प्रवर्द्ध – – – – ।

१२६४

महाभारतम् ।

( आदिपर्व्वमात्रम् । )

१२७६

(क) महालक्ष्मीमाहात्म्यम् ।

(ख) त्रिपुरसुन्दरीप्रातस्तोत्रम् ।

( रुद्रयामलीयम् । )

(ग) त्रिपुरास्तवः ।

( रुद्रयामलीयः । )

(घ) त्रिपुराकवचम् ।

( सर्व्वार्थसाधनं नाम । )

(ङ) कर्पूरस्तोत्रम् ।

(च) शिवकवचम् ।

( भैरवतन्त्रीयम् । )

(छ) शिवधर्म्मः ।

( शान्त्यध्यायमात्रम् । )

विवरणं प्रदत्तम् ।

(ज) देवीमाहात्म्यम् ।

( खण्डितम् । )

अक्षर – नेवारी ।

१४७२

(क) कुब्जिकामतम् ।

( कुलालिकाम्नायोक्तम् । ) २०० पत्राणि । अक्षर – नेवारी ।

पुष्पिका । इति कुलालिकाम्नाये श्रीकुब्जिकामते समस्तज्ञानाववोधचर्य्यानिर्द्देशो नाम पञ्चविंशतितमः पटलः । इति चतुर्विंशतिसाहस्रे सारात्सारतरं श्रीकुब्जिकाम्नायं श्री – – – – पीठविनिर्गतः पञ्चविंशति(त)मः पटलः ।

सतङ्के ( शतङ्के ) वत्सरे पूर्णे पञ्चपञ्चासकाधिके ।

तदा आशा मासे शुक्ले दशम्यां तिथिमुत्तमम् ॥ (?)

विशाख ऋक्षं नामेतु . . . . . . । (?)

लिखितं सारसंग्रहकुब्जिकामताख्यम् ॥

(ख) उपाकर्म्ममन्त्राणि ।

४९ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो ब्रह्मणे नमः । पुनः सप्तऋषिभ्यो नमः । अथैतदुपाकर्म्मविधिं व्याख्यास्यामः । इत्यादि ।

(ग) देवीकवचम् ।

अक्षर – नेवारी ।

(घ) देवीमाहात्म्यम् ।

अक्षर – नेवारी ।

+ + द्वययुग्मवाणाब्दगतवच्छ(त्स)रे(?) मासे भाद्रे शुक्लचतुर्थ्यां – – ॥

(ङ) आख्यातप्रकरणम् ।

( कातन्त्रीयम् । ) खण्डितम् । अक्षर – नेवारी ।

(च) उपाकर्म्मविधिः ।

अक्षर – नेवारी । संवत् १८० । श्रावण-शुक्ल द्वितीया – – – ॥

(छ) हरिहरस्तोत्रम् ।

( हरिवंशान्तर्गतम् । ) अक्षर – नेवारी ।

(ज) वागीश्वरीस्तोत्रम् ।

अक्षर – नेवारी ।

(झ) देवीमाहात्म्यम् ।

अक्षर – नेवारी । संवत् ५१९ मार्गशिर – शुक्लसप्तम्यां तिथौ ।

(ञ) जीमूतवाहनावदानम् ।

क्षेमेन्द्ररचितम् । अक्षर – नेवारी ।

(ट) मालतीमाधवनाटकम् ।

अक्षर – नेवारी । संवत् २७६ आश्विनी शुक्लपञ्चम्यां – – – –

श्रीभिक्षु-बुद्धरक्षितस्य पुस्तकोऽयम् ॥

(ठ) मेघदूतम् ।

खण्डितम् । मैथिलाक्षरलिखितम् ।

(ड) शिशुपालवधकाव्यम् ।

खण्डितम् । अक्षर – नेवारी ।

(ढ) अमरकोषः ।

अक्षर – नेवारी । संवत् ४१२ ।

(ण) कुशण्डिकाकर्म्मविधिः ।

अक्षर – नेवारी ।

(त) गृह्यपद्धतिः ।

अक्षर – नेवारी ।

अन्तवाक्यम् । शरदि गगनवाणे धूर्जटेरस्य मौलौ
इयति गतगतकेऽस्मिन् मेचके पौष्यमासे ।
विदितकरतलार्के भानुवारे विशिष्टे
लिखितमिति सम्पूर्णां पद्धतिं सारगृह्यम् ॥

(ध) सिद्धपञ्चाशिका ।

९ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । श्रीआदिनाथपादुकेभ्यो नमः ।
श्रीमन्महेन्द्राचले रम्ये खङ्गाट ? शिखरे स्थितम् ।
सर्व्वज्ञं स(श)वरं वीरं शिवं परमकारणम् ॥
उपसङ्गम्य विधिना देवदेवं जगद्गुरुम् ।
प्रणिपत्य महेशानी पृच्छति स्म महेश्वरम् ॥
सिद्धान्तञ्चैव डामरं दक्षिणञ्चैव गारुडम् ।
भूततन्त्रञ्च देवेश कुलशास्त्राण्यनेकधा ॥
मया श्रुतानि श्रीनाथ त्वया निगदितानि च ।
इदानीं श्रोतुमिच्छामि कुलमूलावतारकम् ॥
ऊर्द्धं स्त्रष्टिमधः स्त्रष्टिमधोऽधःस्त्रष्टिरेव च ।
कथयस्व प्रसादेन यद्यहं तव वल्लभा ॥ इत्यादि ।

अन्तवाक्यम् । इति सिद्धपञ्चाशिकायां चन्द्रपीठविनिर्गतायां मूलनाथावतारितायां दिव्याज्ञागुणप्रकाशिकायां कुलालीतन्त्रमूलगतायां पञ्चमः पटलः समाप्तश्चेयं श्रीसिद्धपञ्चाशिका । इति श्रीमहादेवेनालेखि ॥

(द) कुब्जिकामतम् ।

६८ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ सिद्धिः । भैरवाय नमः ॥
ॐ ह्रौं श्रीं ऐं क्रुं हुं ह्लौं क्षौं त्तः ।
प्रणिपत्य अनादिनाथं अनाथभूतौघामोघनिर्मथनम् ।
सततानन्दितमनसं सुरासुरवन्दिताङ्घ्रियुगम् ॥

8

श्रीकुब्जिकोवाच ।

शिवचित्ताब्जसंघातदुर्विकाशावकाशिने ।

सदोदितप्रशान्ताय नमः श्रीनाथभानवे ॥

वेष्टिता देवदेवेश अज्ञानपटलैरहम् ।

वामदक्षिणसिद्धान्तैः साम्प्रतं वर्त्तते कुधीः ॥

यत् तत् कुलक्रमायातं कुलालीतनुतां गतम् ।

सूत्रसङ्घट्टनिर्म्मिता कल्पसन्धविवर्जितम् ॥ ?

अपरं शुद्धदिव्यौघं निष्कैवल्यं कथं प्रभो ।

पूर्व्ववृत्तान्तसंयुक्तं यथायातं कुलेश्वर ॥

पीठानि पीठनाथश्च पीठदेव्यश्च पालकाः ।

बालवृद्धकुमाराख्यं क्रमदीपसमन्वितम् ॥

तथा पीठविधैः पीठैर्द्वीपदेव्या समन्वितम् ।

पञ्चांशानाञ्च चत्वारि युग्मान्यष्टोत्तराणि च ॥

पालकैश्च चतुस्त्रिंशैस्त्रिविधैरेवमेव हि ।

एवमादिभिरन्यञ्च कुलग्रन्थवतारणम् ॥

श्रीमतीयं सुरेशान सारात्सारतरं महत् ।

कथं पीठास्त्रिस्थानोक्ताः कुलाकुलविभागशः ॥

रं प्रादिकामपर्य्यन्तं उच्यते किं कुलेश्वर ।

कथयस्व प्रसादेन अल्पग्रन्थार्थविस्तरम् ॥

अन्यञ्च यन्नं पृष्टोऽसि अज्ञानमतिना मया ।

तत्सर्व्वं कथ हे नाथ कुलसारं सुदुर्लभम् ॥ इत्यादि ।

अन्तवाक्यम् । निर्गूढं समाप्तम् ॥

पण्डित-श्रीमहादेवेन लिखितम् ॥

पुष्पिकाः ;— इति निर्गूढे ज्ञानसद्भावे दिव्यौघे कुब्जिकामते ।

आद्यावतारे योगञ्च तवाख्यातं वरानने ॥

इति निर्गूढे ज्ञानसद्भावे दिव्यौघे कुब्जिकामते ।

साधिष्ठानसमायोगे तवाख्यातं कुलाम्बिके ॥

इति निर्गूढे ज्ञानसद्भावे दिव्यौघे कुब्जिकामते ।

द्वीपमार्गं मया ख्यातं त्वत्प्रियार्थं सुलोचने ॥

(ध) योगपीठः ।

५ पत्राणि । अक्षर – नेवारी ।

पुष्पिका ;— योगपीठे क्रमोदयो नाम १ मः पटलः ।

,, ,, ,, २ यः पटलः ।

(ततो नास्त्यन्या पुष्पिका ।)

(न) गृह्यपरिशिष्टम् ।

अक्षर – नेवारी । ३८ पत्राणि ।

प्रारम्भवाक्यम् । ॐ नमो नारायणाय ।

विट्कल्पं वा स्वगृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम् ।

तस्य तावन्ति शास्त्राणि – – – कृतं भवेत् ॥

इति गृह्यपरिशिष्टम् । इत्यादि ॥

(प) पराशरस्मृतिः ।

अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो गणेशाय ।

अथातो हिमशैलाग्रे देवदारुवनाश्रये ।

व्यासमेकाग्रमासीनं ऋषयः पृच्छन्ति – –॥

मानुषाणां हितं धर्म्मं वर्त्तमानं कलौ युगे ।

शौचाचारं – – वद सत्यवतीसुत ॥

– – – – व्यासो दीप्तार्कसन्निभः ।

प्रत्युवाच महातेजा श्रुतिस्मृतिविशारदः ॥ इत्यादि ।

अन्तवाक्यम् । यादृशं पुस्तकं + + + + + + ।

+ + + + + + + + ॥

पुष्पिकाः । २ पत्रे ;— इति पराशरधर्म्मशास्त्रे प्रथमोऽध्यायः ।

५ ,, ,, ,, ,, द्वितीयः ।

७ ,, ,, ,, ,, तृतीयः ।

८ ,, ,, ,, ,, चतुर्थः ।

११ ,, ,, ,, ,, पञ्चमः ।

१४ ,, ,, ,, ,, षष्ठः ।

१७ पत्रे,— इति पराशरधर्म्मशास्त्रे सप्तमः ।
१९ ,, ,, ,, ,, अष्टमः ।
२१ ,, ,, ,, ,, नवमः ।
२४ ,, ,, ,, ,, दशमः ।
२५ ,, ,, ,, ,, एकादशः ।
२६ ,, ,, ,, ,, द्वादशः ।

१४७५

(क) मानवधर्म्मशास्त्रम् ।
( खण्डितम् । ) नागराक्षरम् ।

(ख) संवत्सरप्रदीपः ।
( आदिखण्डितः । ) मैथिलमक्षरम् । शकाब्दाः १४८७ । गोनगार ।
स्वर्णवालकश्रीलक्ष्मीनाथदत्तस्याक्षरम् ।

(ग) चाणक्यश्लोकाः ।
मैथिलमक्षरम् ।

(घ) अमरकोषटिप्पनी ।
अक्षर – नेवारी ।

(ङ) उष्मभेदः ।
अक्षर – नेवारी ।

(च) रूपावतारव्याकरणम् ।
मैथिलमक्षरम् । १२१ पत्राणि ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय ।
सर्व्वज्ञमनन्तगुणं बालप्रबोधनार्थमहम् ।
रूपावतारमल्पं सुकलापमृजुं करिष्यामि ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
कृता सुकृतिना चेयं प्रक्रिया धर्म्मकीर्त्तिना ।
पोतानां पोतवत् क्षिप्रं शब्दाब्धौ पारगामिनाम् ॥

तत्रादौ तावत् प्रत्याहाराः शास्त्रे संज्ञासंव्यवहारज्ञापनार्थमनुव × ते ।
तद्यथा अ इ उ ण । इत्यादि ।

अन्तवाक्यम् । रेफ उपोत्तमो वेति विशेषणार्थः । पटुजातीयः । मृदुजातीयः । इति रूपावतारः समाप्तः । लसं ३६१ भाद्रशुदि ५ शनौ ।

(ङ) शारीरकमीमांसाभाष्यम् ।
(चतुर्थाध्यायस्य ।) शङ्कराचार्यकृतम् । मैथिलमक्षरम् ।

## १५०८

(क) बौद्धाधिकारव्याख्या ।
(खण्डितान्ता ।) नरहरिकृता । मैथिलमक्षरम् । ७१ पत्राणि ।

प्रारम्भवाक्यम् । श्रीनरसिंहाय नमः ।
नमयन्नवनीभुजां शिरोभि र्दलयन्नप्युकुलाचलैः सहैव ।
रभसेन शरासनं पुरारेर्भविकं मामकमातनोतु रामः ॥
सूक्त्या पितृचरणानामवगतसन्दर्भसारेण ।
क्रियते श्रीनरहरिणा व्याख्या बौद्धाधिकारस्य ॥
समाप्तिकामनया कृतं प्रणामं शिष्यशिक्षार्थं निबध्नाति स्वाम्यमिति ।
इत्यादि ।

(ख) भगवद्गीता ।
अक्षर – नेवारी । संवत् ४८१ । माघशुक्लनवम्यां तिथौ ।

(ग) प्रह्लादचरित्रम् ।
(विष्णुपुराणीयम् ।) अक्षर – नेवारी ।

(घ) गोपालध्यानराजः ।
(गोपालतन्त्रीयः ।) अक्षर – नेवारी ।

(ङ) देवीमाहात्म्यम् ।
नागराक्षरम् । संवत् १४९२ । समये भाद्रशुदि .. महाराजा ....
पृथ्वीसिंहदेवभुज्यमानराज्ये चम्पकारण्यनगरे । शुभमस्तु ।

(च) वैशाखमाहात्म्यम् ।
(पद्मपुराण-पातालखण्डीयम् ।) अक्षर – नेवारी ।

(क) रामायणम् ।

( उत्तरकाण्डम् । ) अक्षर – नेवारी ।

अन्त्यवाक्यम् । मुनिबाणरसे वर्षयाषाढे मासि पाण्डरे ।
कासे गुरौ रामकथां लेखसिद्धिस्तदाभवत् ॥

(ज) शिवरात्रिविधानम् ।

मैथिलाक्षरम् । ( पद्मपुराणीयम् । )

(झ) वशिष्ठदिलीपसंवादः ।

( पद्मपुराणोत्तरखण्डीयः । ) अक्षर – नेवारी ।

(ञ) भगवद्गीता ।

अक्षर – नेवारी ।

अन्त्यवाक्यम् । अब्देऽस्मिन् श्रुतिरामदन्तिवलिते मासेऽपि मासे शुचौ (?)
.. .. .. .. .. .. .. .. ।
.. .. .. .. .. .. .. ..
.. .. .. .. .. .. .. .. ॥

(ट) कृत्यकल्पतरुः ।

(आद्यन्तखण्डितः ।) लक्ष्मीधरकृतः । अक्षर – नेवारी ।

(ठ) प्रतिष्ठातन्त्रम् ।

अक्षर – नेवारी । ( आदिखण्डितम् । )

अन्त्यवाक्यम् । इति निश्वासाख्ये महातन्त्रे प्रतिष्ठातन्त्रं समाप्तम् ।
वेदे मन्मथबाणनरनेत्रे वत्सरे सुसंयाते
फाल्गुनमासशुक्लपक्षां भृगुवासरे सुभगे ।
श्रीमन्नरेन्द्रदेवे राजेन्द्रे राजराजसादृश्ये
नेपालेऽस्मिन् गुणवति पशुपतिपादाङ्कपरिवृते ॥
भक्तश्रीमणिधामा वटकमहीपालपुत्रसम्भारो । ?
देव्यामताभिधानं पुस्तकमभिलिखति भक्तिचित्तेन ॥

पुष्पिकाः ;— इति देव्यामते महातन्त्रे वास्तुपटलः ।
,, ,, वेधलक्षणे चतुरोत्तरशततमः पटलः ।

( ६२ )

इति देव्यामते योज्यायोज्यलक्षणम् ।
" " भित्तिवन्धनम् ।
" " भूमिवन्धनम् ।
" " गुरुशिष्यविशेषणम् ।
" " प्रासादोद्गमनम् ।
" " भित्तिप्रमाणनियमः ।
" " सूत्रपातलक्षण — — — ।
" " शल्योद्धारलक्षणम् ।

१५२४

(क) उपाकर्मस्नानविधिः ।
अक्षर – नेवारी ।

(ख) शान्तिमन्त्राणि ।
२७ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो ब्रह्मणे । ॐ स्वस्ति नो मिमीतामश्विनाभगः स्वस्ति देव्यदिति — — —। स्वस्ति पूषा असुरोदधातु नः स्वस्ति । इत्यादि ।

अन्तवाक्यम् । विश्वेदेवाः शान्तिः ब्रह्म शान्तिः + + शान्तिरेव शान्तिः + + शान्तिरेषा । शुभं श्रेयोऽस्तु संवत् ६६७ भाद्र ... ।

(ग) देवीमाहात्म्यम् ।
मैथिलमक्षरम् । लसं ३९२ (?) पौषवदि ३ बुधे महाराजाधिराज-श्रीकंसनारायणदेवप्रचारेण — — — — प्रणतेन सुप्रतिष्ठ — — श्रीउदयकरेण लिखितैषा पुस्तीति । श्रीरामभद्रलक्ष्मणाभ्यां नमः ॥

(घ) मृत्युञ्जयस्तवः ।
अक्षर – नेवारी ।

अन्तवाक्यम् । इति पारमेश्वरे चतुरशीतिसाहस्रे मृत्युञ्जयस्तवः समाप्तः ॥

(ङ) देवीमाहात्म्यम् ।
अक्षर – नेवारी । संवत् ३८५ । मार्गशिर .. श्रीराजाधिराज ....

श्रीअभयमल्लदेवस्य विजयराज्ये श्रीनीलीषोलाया? मधिवासिना श्रीमणिनागशालि – – – – – ॥

(च) देवीमाहात्म्यम् ।

अक्षर – नेवारी । .. राजाधिराज .. श्रीश्रीधर्म्ममल्लदेवस्य विजय-राज्ये । संवत् ११८ माघकृष्णदशम्यां .... वज्राचार्य्य-श्रीसुगत-चन्द्रस्य लिखितम् । शिवमस्तु सर्व्वजगताम् । .... ॥

(छ) प्रबोधचन्द्रोदयनाटकम् ।

( प्राचीनास्य लिपिः किन्तु आदावन्ते च कानिचित् पत्राणि नवीन-लिखितानि सन्ति । ) अक्षर – नेवारी ।

(ज) तन्त्राख्यानकथा ।

अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः सर्व्वज्ञाय ।

तन्त्राख्यानकथा चैव बुद्धिपद्मप्रबोधिनी ।

आदित्यदीधितिमेवं तां निधास्यामि यत्नतः ॥

ततो नेपाली भाषा —

श्लोकाः —

३० पत्रे ;— यस्य बुद्धिः सुखं तस्य निर्बुद्धेस्तु कुतः सुखम् ।

सर्व्वकुञ्जरमध्यस्थो निष्क्रान्तो जम्बूको धिया ॥ इत्यादि ।

ततोऽस्य श्लोकस्य भाषयानुवादः ।

६४ पत्रे ;— वर्द्धमानोऽपि पापेन यः पापान्न निवर्त्तते ।

आसादयति दुर्म्मेधा .... कर्कटग्रहान् ॥

ततोऽस्य श्लोकस्य भाषयानुवादश्च ।

अन्तवाक्यम् । संवत् ७२५ । कार्त्तिक ।

१५२६

(क) वशिष्ठदिलीपसंवादः ।

( पद्मपुराणोत्तरखण्डीयः । ) अक्षर – नेवारी ।

(ख) विविधविद्याविचारचतुरा ।

प्रारम्भवाक्यम् । ॐ नमो नारायणाय ।

सर्व्वकामावाप्तये शान्तिकपौष्टिकान्युच्यन्ते । तत्र नवग्रहमखस्त्रिविधः अयुतहोमो लक्षहोमः कोटिहोमश्चेति ॥ इत्यादि ।

अन्तवाक्यम् । वाजपेयातिरात्राभ्यां हेमन्तशिशिरे स्थितम् ।
अश्वमेधसमं प्राहुर्वसन्ते चैव यत् स्थितम् ।
ग्रीष्मे च स्थितं तोयं राजसूयाद् विशिष्यते ॥
एतन्महाराजविशेषधर्म्मान् करोति यो धर्म्मपरः सुबुद्धिः ।
स याति रुद्रालयमाशु पूतः कल्पाननेकान् दिवि मोदते च ॥
अनेन लोकान् समहस्तपादान् भुक्त्वा परार्द्धद्वयमङ्गनाभिः ।
सहैव विष्णोः परमं पदं यत् प्राप्नोति तद् योगबलेन भूयः ॥

पुष्पिका ;— इति श्रीमद्भोजदेवविरचितायां विविधविद्याविचारचतुराभिधानायां नवग्रहमखतुलापुरुषादिमहादानादिकर्म्मपद्धतौ तड़ागवापीकूपप्रतिष्ठा-विधिः । परिसमाप्तचेयमिति ॥ समस्तेत्यादि महाराजाधिराजवर-कुमारश्रीमद्गदाधरदेवपादानामाज्ञया श्रीशुभपतिभिर्लिखितमिदं पुस्तक-मिति । लसं ३७२ । श्रावणवदि १ शुक्रे श्रीरत्नधरनगरे । ॐ नमो भगवते वासुदेवाय ।

(ग) दशकर्म्मपद्धतिः ।

अक्षर – नेवारी । संवत् २९६ (?) चैत्रशुक्लपूर्णिमायां राजाधिराज-परमेश्वर श्री अ + ल देवस्य विजयराज्ये पुस्तकोऽयं लिखितमिति ।

(घ) प्रतिष्ठातत्त्वम् ।

रघुनन्दनकृतम् । वङ्गाक्षरलिखितम् ।

अन्तवाक्यम् । सङ्केतिते शकाब्दे सप्तपपवितारकाधीशैः ।
श्रीमत्फाल्गुनमासे शुक्लप्रतिपत्तिथौ शुक्रे ॥
व्यलिखत् केशवशर्म्मा ।

(ङ) वशिष्ठदिलीपसंवादः ।

( पद्मपुराणोत्तरखण्डीयः । ) अक्षर – नेवारी ।

9

(च) धूर्त्तसमागमनाटकम् ।

ज्योतिरीश्वरकृतम् । ११ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो गणेशाय ।

हर्षादम्भोजजन्मप्रभृतिदिविषदां संसदि प्रीतिमत्या-
+ + मौलौ पुरारेर्दु + ति परिणये सादरं चुम्ब्यमाने । (?)
तद्वक्त्रं शैलिवक्त्रैर्मिलितमिति भृशं वीक्ष्य चन्द्रः सहासो
दृष्ट्वा तद्वृत्तमाशु स्मितिसुभगमुखः पातु वः पञ्चवक्त्रः ॥

अपिच । वक्त्राम्भोरुहि विस्मिता स्तवकिता वक्षोरुहि स्फारिताः
श्रोणीसीमनि गुम्फिताश्चरणयोरङ्गुल्योः पुनर्विस्तृताः ।
पार्वत्याः प्रतिगात्रचित्रगतयस्तन्वन्ति(न्तु) भद्राणि वो
विद्वत्यान्तिकपुष्पसायकशरैरीशस्य दृग्भङ्गयः ॥

नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । यदद्य –
मानायोधनिरुद्धनिर्ज्जितसुरत्राणत्वसङ्गाहिनी-
नृत्यद्भीमकबन्धमेलकदलद्भूमिभ्रमद्भूधरः ।
अस्ति श्रीहरसिंहदेवनृपतिः कार्णाटचूडामणि-
र्दृप्यत्पार्थिवसार्थमौलिमुकुटन्यस्ताङ्घ्रिपङ्केरुहः ॥
तस्योद्दण्डभुजप्रतापदहनज्वालानिरस्ता यदा
राज्ञः सर्व्वगुणानुरागपदवी विद्योतनाचार्य्यकः ।
यो धीरेश्वरवंशमौलितिलको दातावदाताशय-
स्तस्य श्रीकविशेखरस्य कविता मच्चित्तमालम्बते ॥
तदनेन सकलसङ्गीतविद्याशेखरविद्योतनाभिनवभरतेन . . . . . . . . . .
श्रीरामेश्वरपौत्रेण तत्रभवतः पवित्रकीर्त्तेर्धीरसिंहस्यात्मजेन महीशासन-
श्रेणिशेखरश्रीमत्पल्लिजन्मभूमिनायककविशेखराचार्य्यश्रीज्योतिरीश्वरेण
निजकुतूहलविरचितं धूर्त्तसमागमं नाम नाटकं अभिनेतुमादिष्टोऽस्मि
इत्यादि ।

अन्तवाक्यम् । इति निष्क्रान्ताः सर्व्वे ।

पुष्पिका ;— कविशेखराचार्य्यश्रीज्योतिरीश्वरविरचितं धूर्त्तसमागमं नाम नाटकम् ।

(छ) रागमाला ।

अक्षर – नेवारी । ३ पत्राणि ।

कागजलिखितायाः एकस्या विवरणं प्रदत्तम् ।

(ज) सङ्गीतसर्व्वस्वम् ।

( अन्तखण्डितम् । ) जगद्धरकृतम् । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमो नृत्यनाथाय ।

स्वर्गङ्गायमनीपठीयति तलिङ्गीपीयति द्योस्तलं

यद् रङ्गीयति मर्द्दलीयति घनस्तारा च पुष्पीयति ।

गौरी यत्र नटीयतीन्दुतरणी यत् कांस्यतालीयतः

शम्भोरद्भुतनाट्यसङ्गतिरियं भूयात् तव श्रेयसे ॥ (१)

नाट्यदर्पणसङ्गीतवल्लीसङ्गीतशेखरम् ।

नाट्यलोचनसङ्गीतकल्पवृत्तौ निरूपयन् ॥

दशरूपं रत्नकोषं भरतोक्तादिकं तथा ।

सङ्गीतसर्व्वस्वमिदं तनोति श्रीजगद्धरः ॥ इत्यादि ।

(झ) भाषावृत्तिव्याकरणम् ।

( आद्यन्तखण्डितम् । ) मैथिलमक्षरम् ।

(ञ) काव्यप्रकाशः ।

मैथिलमक्षरम् ।

(ट) सिद्धसन्तानसाधनसोपानपद्धतिः वा श्रीमत्पद्धतिः ।

( आद्यन्तखण्डिता । ) यशोराजकृता ।

३१ पत्राणि । अक्षर – नेवारी ।

पुष्पिकाः ;— इति गोपात्मजश्रीयशोराजविरचितायां सिद्धसन्तानसाधनसोपानपद्धत्यभिधानायां सिद्धमार्गप्रकाशायां श्रीमत्पद्धत्यां ग्रन्थावतारः प्रथमः पटलः ।

इति० गुरुशिष्यविचारो नाम । २ ।

„ वेधदीक्षाविधानो नाम । ३ ।

„ अवस्थाभ्युदयविचारो नाम । ४ ।

इति० वेधप्रवृत्तिविचारो नाम । ५ ।

„ परोक्षानुग्रहो नाम । ६ ।

„ समयविचारे समयवर्णनो नाम । ७ ।

„ आचार्य्याणामधिकारे सङ्केतविनिर्णयो नाम । ८ ।

„ भाग्यावरोहणे मन्त्रोद्धारो नाम । १० ।

„ महाभाग्यावरोहणं नाम योगपटलः । ११ ।

„ भाग्यावरोहणजपविधाने देव्यास्त्वनुस्मरणम् । १२ ।

„ कुलवागेश्वरीविधाने श्लोकद्वादशविनिर्णयो नाम । १३ ।

„ योगिन्याकृष्टिमेलकं नाम । १४ ।

„ स्थानषट्कारविचारो नाम । १५ ।

(ठ) देवीमाहात्म्यम् ।

( खण्डितम् । ) अक्षर – नेवारी ।

(ड) विमलावती ।

(आद्येन त्रुटिता अन्तेन च खण्डिता ।) अक्षर – नेवारी । १७४ पत्राणि ।

प्रारम्भवाक्यम् । नत्वा नादिमलो . . . . . . . . . . . . ।

पूजाहोमपवित्रदामन . . . . . . स्मृतौ कुर्म्महे ॥

युक्तदीक्षाप्रतिष्ठाभ्यां बोधवारिधेः

स्वच्छागाधापारभीम स्तद् + + + + व × नः ।

स्मृत्या वा शेषसिद्धान्तभाभिः + + + ज्ञबोधकम्

आर्य्यधर्म्मशिवाचार्य्यसूर्य्यमाचार्य्यमार्गकम् ॥ (?)

अथोत्थाय रजन्यन्ते शुचिर्वा + + शुचिः सदा ।

प्राणायामाद्यष्टाङ्गयोगं + + + मध्यगम् ॥ इत्यादि ।

पुष्पिकाः ;— विमलावत्यां पूजाविधिः प्रथमः ।

” होमविधिः । २ ।

” पवित्रविधिः । ३ ।

५६ पत्रे ; – ” दामनविधिः (?) । ४ ।

१०३ पत्रे ; – ” दीक्षाविधिः । ५ ।

अतो नास्ति पुष्पिका ।

१५२७

(क) देवीमाहात्म्यम् ।

( खण्डितम् । ) अक्षर – नेवारी ।

(ख) मयसङ्ग्रहः । वा प्रतिष्ठातत्त्वम् ।

( आदिखण्डितम् । ) अक्षर – नेवारी ।

पुष्पिकाः ;— मयसङ्ग्रहे वास्तुविधिश्चतुर्थः परिच्छेदः ।
मयसङ्ग्रहे प्रासादविधानं पञ्चमः ।
इति मयसङ्ग्रहे प्रतिष्ठातत्त्वं समाप्तम् ।

(ग) अनुस्मृतिस्तवः ।

( विष्णोरनुस्मरणम् । ) अक्षर – नेवारी ।

(घ) अमरकोषः ।

( स्वर्गवर्गः । ) मैथिलमक्षरम् ।

(ङ) नरपतिजयचर्य्या ।

( खण्डिता । ) अक्षर – नेवारी ।

(च) उत्तररामचरितनाटकम् ।

नागराक्षरम् ।

१५५८

चान्द्रव्याकरणम् ।

वृत्तिसहितम् । ( द्वितीयाध्यायपर्य्यन्तम् । ) अक्षर – नेवारी ।
१६४ पत्राणि ।

१५५९

(क) देवीमाहात्म्यम् ।

अक्षर – नेवारी ।

अन्तवाक्यम् । शुभमस्तु संवत् ३५८ ज्येष्ठशुक्ले पञ्चमीघटितषष्ठ्यां लिखितं समाप्तीकृतमिति । श्रीश्रीअभयमल्लदेवस्य विजयराज्ये लिखितम् ।

(ख) व्याकरणशास्त्रम् ।(?)

( आद्यन्तखण्डितम् । ) ९१ पत्राणि । मैथिलमक्षरम् ।

२य पत्रस्य प्रारम्भवाक्यम् । आदिर्वर्णोऽन्त्येन इता इत्संज्ञकेन सह गृह्यमाणस्त-
न्मध्यपातिनां वर्णानां ग्राहको भवति । इत्यादि ।

पुष्पिकाः ;—

४ पत्रे । इति संज्ञावतारः ।

१५ पत्रे । इति संहितावतारः ।

६३ पत्रे । इति विभक्त्यवतारः समाप्तः ।

६४ पत्रे । इति विभक्तिविभागः समाप्तः ।

७१ पत्रे । इति णत्वावतारः समाप्तः ।

७३ पत्रे । इति षत्वावतारः समाप्तः ।

७८ पत्रे । इति समासावतारः समाप्तः ।

८१ पत्रे । इत्यलुकाधिकारः समाप्तः । (?)

( ततो नास्त्यन्या पुष्पिका । )

(ग) इष्टिसूत्रम् ।

( कात्यायनोक्तम् । ) अक्षर – नेवारी ।

(घ) देवीमाहात्म्यम् ।

अक्षर – नेवारी ।

अन्तवाक्यम् । महाराजाधिराजपरमेश्वरपरमभट्टारकश्रीमदभयमल्लदेवस्य विजयराज्ये ।

.. .. ..

(ङ) श्रीकापालेश्वरीभीमादेव्याः पूजापद्धतिः ।

( पितृनिर्मोचनिकाभिधेया । ) अक्षर – नेवारी । ५ पत्राणि ।

(च) निदानम् ।

विवरणं प्रदत्तम् ।

(छ) एकादशीव्रतविधानम् ।

अक्षर – नेवारी ।

(ज) एकादशीमाहात्म्यम् ।

अक्षर – नेवारी ।

(ञ) एकादश्युत्पत्तिः ।

अक्षर – नेवारी ।

(ञ) रामायणम् ।

( उत्तरकाण्डम् ।) ( कतिपयानि पत्राणि ।) मैथिलमक्षरम् ।

(ट) वामकेश्वरीमतटिप्पनम् ।

अक्षर – नेवारी । ८० पत्राणि ।

प्रारम्भवाक्यम् । ॐ नमः शिवादिभ्यो गुरुभ्यः । ॐनमस्त्रिपुरभैरव्यै ।
श्रीवामकेश्वरीमते विस्मरणभीत्या विषमटिप्पनकं लिख्यते । देवीशिष्यः
प्रशिष्यो वा ग्रन्थमवतारयिषुः नमस्कारं कृत्वा गणेशग्रहनक्षत्रेत्यादि ।
महादेवीं मातृकां प्रणमामि । इत्यादि ।

अन्तवाक्यम् । मन्त्रं स्मृत्वा होमं कृत्वा हे परमेश्वरि साधकः . . . . . कालमृत्यु-
भयादिभि र्न बाध्यते ।

पुष्पिका ;— इति श्रीवामकेश्वरीमहातन्त्रे त्रिपुराहोमविधिर्नाम पञ्चमः पटलः ।
निर्बाधं परिरक्षति क्षितितलं क्ष्मापालचूडामणौ
वीरश्रीजयराजदेवनृपतौ नेपालभूमण्डलम् ।
शैवाचार्य्यवरस्य मन्मथपतेर्विख्यातकीर्त्तेः कृते
सव्याख्यां च चतुःशतीं समलिखन्नारायणाख्यः कविः ॥
संवत् ४७४ ।
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥
ॐ नमस्त्रिपुरसुन्दर्य्यै । शिवमस्तु ॥

अपराः पुष्पिकाः ;— इति वामकेश्वरीतन्त्रे प्रथमः पटलः ।
,, ,, त्रिपुराप्रयोगो द्वितीयः ।
,, ,, मुद्रापटलस्तृतीयः ।
,, ,, बीजत्रयसाधनश्चतुर्थः ।
,, ,, त्रिपुराहोमविधिर्नाम पञ्चमः ।

(ठ) अमरकोषः ।

( द्वादशपत्राणि मात्रम् । )

(ड) महाभारतम् ।

( सभापर्व्व ।) मैथिलग्रन्थरम् । लम्ब ३३५ ।

(ढ) ज्योतिषानन्दस्तवः ।

अक्षर – नेवारी । ५ पत्राणि ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय ।

नमस्ते निर्मलं देवं नमस्ते ज्ञानरूपिणम् ।

नमस्ते ज्योतीरूपञ्च निष्कलञ्च नमोऽस्तु ते ॥ इत्यादि ।

अन्तवाक्यम् । अद्यापि शरणं देवि त्वमेव शरणं मम ।

यत्कामं प्रार्थये नित्यं देहि देहि महेश्वरि ॥

पुष्पिका ;— इति ज्योतिषानन्दस्तवः समाप्तः । शुभमस्तु ॥

(ण) सिद्धिलक्ष्म्यर्चनम् ।

अक्षर – नेवारी । ४ पत्राणि ।

(त) वशिष्ठदिलीपसंवादः ।

( पद्मपुराणोत्तरखण्डीयः ।) अक्षर – नेवारी । संवत् ५८८ ।

१५८३

(क) चान्द्रव्याकरणम् ।

( कतिचित् पत्राणि ।) अक्षर – नेवारी ।

(ख) हितोपदेशः ।

( कतिचित् पत्राणि ।) अक्षर – नेवारी ।

(ग) चान्द्रव्याकरणम् ।

( ३–३३ पत्राणि ।) अक्षर – नेवारी ।

पुष्पिका ;— चान्द्रव्याकरणे षष्ठोऽध्यायः समाप्तः । श्रेयोऽस्तु संवत् ३११ । कार्त्तिक-कृष्णाचतुर्थ्यां । मङ्गलवासरे । शुभमस्तु ॥

(घ) शिशुपालवधटीका ।

( प्रथमसर्गस्य षोड़शसर्गस्य च ।) अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय ।

मोहमातङ्गविध्वंसान्मुक्तिमुक्ताविनायिने ।

योगीन्द्रमानस .. वासिने हरये नमः ॥

निसर्गदुर्व्वोधमबोधविक्लवाः

क्व मादृशाः क्व च मादृशाशयाः ।

चिकीर्षुरत्रापि तथापि पञ्जिकां

मनोरथानामगतिर्न विद्यते ॥

आदौ मङ्गलार्थं विघ्नोपशमहेतुं .. इत्यादि ।

(ङ) वैदिकमन्त्रसङ्ग्रहः । (?)

२९ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । + नमो यज्ञपुरुषाय । परिसमूहनमन्त्रः ।

य देवा देवहे हुनं देवासश्चक्रमावयम् ।

अग्निर्मा तस्मादेनसो विश्वांशुं चत्वशुं हसः॥ इत्यादि ।

(च) कालोत्तरतन्त्रम् ।

२८ पत्राणि । अक्षर – नेवारी ।

पुष्पिका । २८ पत्रे ; – इति कालोत्तरे पञ्चविंशतितमः पटलः ।

(छ) रामोपाख्यानम् ।

( महाभारतारण्यपर्व्वीयम् । ) ३–१४ पत्राणि । अक्षर – नेवारी ।

(ज) शारदातिलकम् ।

( खण्डितम् । ) वङ्गाक्षरलिखितम् ।

(झ) व्रतपद्धतिः ।

रुद्रधरकृता । मैथिलमक्षरम् ।

अन्तवाक्यम् । लसं ३४४ आषाढ़शुक्लद्वितीयायां श्रीसुधाधरेण लिखितमिति ।

(ञ) नागानन्दनाटकम् ।

( आदितस्त्रीणि पत्राणि न सन्ति । ) अक्षर – नेवारी ।

अन्तवाक्यम् । संवत् ४३८ फाल्गुन .. .. .. .. श्रीश्रीराजाधिराजपरमधार्म्मिक-

परमभट्टारकश्रीश्रीजयानन्ददेव × श्वरस्य विजयराज्ये ।

10

(ट) देवीमाहात्म्यम् ।
अक्षर – नेवारी ।

(ट) अनर्घराघवनाटकम् ।
मैथिलमक्षरम् ।

१५८४ ।

(क) तन्त्राख्यानकथा ।
( नीत्युपदेशकश्लोकसंग्रहः । )

(ख) श्लोकसंग्रहः ।

(ग) गीतमाला ।
( नेवारीभाषागीतानि । )

(घ) विनायकस्तवराजः ।

(ङ) देवीमाहात्म्यम् ।

(च) त्रिपुरास्नानादिनित्यकर्मविधिः ।

१५८५ ।

(क) मालतीमाधवनाटकम् ।
लसं ४६९ ।

(ख) काव्यादर्शः ।
( खण्डितः । )

(ग) सौन्दरानन्दकाव्यम् ।
८ पत्राणि ।

१६०६ ।

(क) दानवाक्यसमुच्चयः ।
योगीश्वररचितः । विवरणं प्रदत्तम् ।

१६०८ ।

(क) चान्द्रव्याकरणम् ।

(ख) भगवद्गीता ।
संवत् ४५२ ।

(ग) मालिनीस्तुतिः ।
( मालिनीच्छन्दसा भगवत्याः स्तवनम् । )

(घ) देवीमाहात्म्यम् ।
संवत् २६२ ।

(ङ) अमरकोषः ।

(च) दशकर्मपद्धतिः ।

(छ) हरिचरितकाव्यम् ।

(ज) देवीमाहात्म्यम् ।

(झ) शिशुपालवधकाव्यम् ।
( खण्डितम् । )

(ञ) हितोपदेशः ।

अन्तवाक्यम् । श्रीयक्षमल्लनृपतेर्विजये च राज्ये
भक्तापुरीनिवसितो वरकीर्त्तिरामः ।
तत्कण्ठभूषणकृतोऽपि हितोपदेश-
श्लोकः समस्तहृदयाब्जविकाशभानुः ॥
संवत् – वेदग्रहवाणे — — — — ।

(ट) अमरकोषः ।
कतिपयानि पत्राणि ।

(ठ) कीचकवधकाव्यम् ।
नीतिवर्म्मकृतम् ।

(ड) विष्णुसहस्रनामभाष्यम् ।

१६२२ ।

(क) जयाख्यसंहिता वा ज्ञानलक्ष्मी ।

( खण्डिता । ) ४५ – ११५ पत्राणि । अक्षर – नेवारी ।

मध्यपुष्पिका । श्रीजयाख्यसंहितायां मानसयाग द्वादशः पटलः ।

अन्तपुष्पिका । श्रं मरीकायनाचार्य्यनारायणगर्भपादानुगृहीतः साधकः चन्द्रदत्तकृतायां ज्ञानलक्ष्म्या अन्तिमाविधिश्चतुर्विंशः पटलः ।

संवत् ३०७ फाल्गुनकृष्णपञ्चम्यां श्रीगुणकामदेवस्य विजयराज्ये लिखित-मिदं मागमं खपुस्तकं भट्टश्रीश्रीचन्द्रमितस्य शिवादिभ्यो गुरुभ्यो नमः ।

(ख) वारुणपूजा ।

४ पत्राणि । अक्षर – नेवारी ।

पुष्पिका । इति नन्दिकेश्वरमते प्रतिष्ठामन्त्रे वारुणपूजा समाप्ता ।

(ग) वारिशास्त्रम् ।

८ पत्राणि ।

प्रारम्भवाक्यम् । ॐ नमो वरुणाय ।

ब्रह्मविष्णवीश्वरं रुद्रश्चन्द्रसूर्य्यग्रहादिषु ।
देवतानाञ्च सर्व्वेषां नमः शक्रपुरोगमान् ॥
ऋग्यजु सामायर्व्वाणां षडङ्गसपदक्रमात् ।
सारमुद्धृत्य सर्व्वेषां वारिशास्त्रं प्रवक्ष्यते ॥
तिथिनक्षत्रमासञ्च दिनं लग्नं मुहूर्त्तकम् ।
वारुणेषु च ऋक्षेषु सौम्ययोगयुतेषु च ॥
सौम्येषु दिनवारेषु बुधजीवनिरीक्षिते ।
पूर्णेषु पक्षमासेषु पूर्णलग्नमहोदये ॥
देवतागमनं यत्र वायुस्तत्राभिगामिनः ।
सिद्धियुक्तो भमात्रे च क्षिप्रं भवति उज्ज्वलम् ॥ इत्यादि ।

अन्तवाक्यम् । गर्गभाषितवारिशास्त्रसाराष्टक समाप्तः ।

संवत् १९० ( अक्षराण्यङ्कानि । ) वैशाखशुक्लद्वादश्यां — — — ॥

(घ) वारुणयागविधिः ।

३ पत्राणि । अक्षर – नेवारी ।

पुष्पिका । इति नन्दिकेश्वरप्रोक्तायां प्रतिष्ठातन्त्रे वारुणयागविधिः समाप्तमिति ।

(ङ) मन्त्रोद्धारः ।

( आद्यन्तखण्डितः । ) अक्षर – नेवारी ।

मध्यपुष्पिका । मुख्ये मन्त्रोद्धारे षष्ठः पटलः ।

(च) ज्ञानलक्ष्मी वा जयाख्यसंहिता ।

( आदिमध्यान्तखण्डिता । ) अक्षर – नेवारी ।

पुष्पिका । १०२ पत्रे । श्रीजयाख्यसंहितायां चतुराश्रमधर्म्मः द्वाविंशः पटलः ।

१०८ ,, श्रीमदेकायनाचार्य्यनारायणगर्भपादानुगृहीतसाधकचन्द्रदत्तकृतायां ज्ञानलक्ष्म्यां प्रेतश्राद्धविधिस्त्रयो + + ।

१२० ,, श्रीमदेकायन०पञ्चविंशः पटलः प्रायश्चित्तविधिः ।

श्रीमदेकायन०सप्तविंशतिः पटलः ।

(छ) रत्नकरण्डिका ।

द्रोणकृता । विवरणं प्रदत्तम् ।

(ज) अमरकोषः ।

मैथिलाक्षरम् ।

अन्तवाक्यम् । परमभट्टारकेत्यादिराजावलीपूर्व्वकश्रीमद्भवसिंहदेवसंभुज्यमानायां तीरभुक्तौ — — — — — — — ।

(झ) प्रतिष्ठापद्धतिः ।

६० पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय ।

शिवं गणं गुरुं वाणीं मोक्षाय विघ्नशान्तये ।
नमामि भुक्तिमुक्त्यर्थं प्रत्येकं वाग्विभूतये ॥
आगमाभ्यासभीरूणां प्रतिष्ठास्वधिकारिणाम् ।
लक्ष्यलक्षणहीनानां क्रियाज्ञानोद्यतात्मनाम् ॥
— — — —
लिङ्गपीठशिलामानं लक्षणोद्धारपूर्व्वकम् ।

गुरुपारम्परायातं शेषं यद् व्यवहारिकम् ।
तन्मया लिख्यते कर्म्म प्रतिष्ठायामनाकुलम् ॥

पुष्पिका । इति प्रतिष्ठापद्धतिः समाप्तः ।
यदा नेपालभूपालानन्तमल्लोऽभिधावति ।
रसभ्रभ्रसमायुक्तो श्रुतिः सम्वत् तदा ययौ ॥
कार्त्तिमासे सिते पक्षे द्वितीयायां कुजे दिने ।
कायस्थोदयहर्षेण हर्षेण लिखितं द्रुतम् ॥

— — — — — — —

— — — — — — —

(ञ) महामायास्तवः ।

५ पत्राणि । अक्षर – नेवारी ।

पुष्पिका । इति शिवशक्तिसमरसोभावः महामायास्तवः समाप्तः । संवत् ३९१ ।
आषाढशुक्लपञ्चम्यां रविदिने ॥

(ट) मेघदूतटीका ।

( खण्डिता । ) अक्षर – नेवारी ।

(ठ) प्रतिष्ठासारसङ्ग्रहः ।

५९ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः श्रीभैरवाय ।
श्रीनाथभ्ररणतरणिर्जयति महामोहतिमिरहरणश्रीः ।
कृता विबुधवृन्दहृदयाम्भोरुहवन — — — र्न येन ॥ (?)
चिन्मयानन्दगम्भीरशिन्धवे(सिन्धवे) शम्भवे नमः ।
स्वशक्तिप्रसरे क्रीडा — — — — — मूर्त्तये ॥
प्रायेणेह कलौ काले दुर्लभागमदर्शनः ।
अतो मूलागमोद्धृत्य प्रतिष्ठापद्धतिः कृता ॥
अथ देवताप्रतिष्ठायां विधानमभिधीयते । इत्यादि ।

अन्तवाक्यम् । इति कुमारीपूजाविधिः ।
समाप्तोऽयं प्रतिष्ठासारसंग्रहः ।

श्रीलक्ष्मीपादपङ्को(पङ्कजो)पजीविना राजपत्याराधेन संग्रहीकृत ॥ (?)

श्रब्दः वह्निहयम्ब सागरश्रते श्रश्विन्यसिते पत्ते — — — ॥

(ड) मेदिनीकोषः ।

मैथिलमत्तरम् । लसं ३११ पौषवदि ।

(ढ) प्रपञ्चसारतन्त्रम् ।

मैथिलमत्तरम् । लसं ४०८ । विवरणं प्रदत्तम् ।

(ण) वेतालपञ्चविंशतिः ।

( नेपालीभाषायाम् । )

(त) विनायकस्तवः ।

( भविष्यपुराणोक्तः । )

(थ) शनैश्चरस्तवः ।

( स्कान्दपुराणीयः । )

१६२४ ।

(क) तत्वसारः ।

श्रत्तर – नेवारी । ९ पत्राणि ।

( विलुप्तात्तरमिति प्रथमपत्रस्य प्रारम्भवाक्यं दुष्पठनीयम् । )

प्रारम्भवाक्यम् । ३ पत्रे । कार्त्तिकोवाच ।

चाष्टपादं न वर्त्तव्यं गुरुणा सह शङ्करः ।

तत्वप्रतिकर्त्तव्यौ चान्यथा तं — — कुतः ॥

श्रकर्त्ताश्च कथं कर्त्ता – – – कथम् ।

– – – – सर्व्वकर्त्ता कथं भवेत् ॥

ईश्वरोवाच ।

सत्यं भवति मुक्तानामसत्यं पशुचेतसाम् ।

सत्यासत्यं भवेत् तत्वः सत्यः सत्यः षडाननः ॥

पुष्पिका । इति तत्वसारः समाप्तः ।

(ख) ज्ञानकारिका ।

१६ पत्राणि । श्रत्तर – नेवारी ।

पुष्पिका ।

१३ पत्रे । इति ज्ञानकारिकायां धर्म्माधर्म्मविभागे – – द्वितीयः पटलः ।

१६ पत्रे । इति ज्ञानकारः महामत्स्येन्द्रनाथपादावतारितोक्तं – – – तृतीयः पटलः ॥

(ग) चतुर्थीविधिः ।

( विवाहात् परं चतुर्थदिवसस्य कृत्यानि । ) अक्षर – नेवारी ।

(घ) दशकर्म्मविधिः ।

( खण्डितः । ) अक्षर – नेवारी ।

(ङ) विवाहादिपद्धतिः ।

( वाजसनेयिनाम् । ) रामदत्तविरचितः । मैथिलमक्षरम् ।

प्रारम्भवाक्यम् । ॐ नमो महागणेशाय ।

सन्धिविग्रहमन्त्रीन्द्रदेवादित्यतनूद्भवः ।
भूमिपालशिरोरत्नरञ्जिताङ्घ्रिसरोरुहः ॥
सन्धिविग्रहितश्रीमद्वीरेश्वरसहोदरः ।
महामहत्तकः श्रीमान् विराजति गणेश्वरः ॥
श्रीमता रामदत्तेन मन्त्रिणा तस्य सूनुना ।
पद्धतिः क्रियते धर्म्या रम्या वाजसनेयिनाम् ॥
तत्रादौ विवाहः । इत्यादि ।

पुष्पिका । इति महामहत्तकश्रीमद्रामदत्तकारिता वाजसनेयिविवाहादिपद्धतिः समाप्ता । लसं ४१४ । ज्येष्ठवदि ॥

(च) कालज्ञानम् वा कालोत्तरम् ।

३ – २६ पत्राणि । नागराक्षरम् ।

पुष्पिकाः । इति कालज्ञाने – – शतिके दशमपटलः ।

इति कालोत्तरे – – – एकादशः ॥

” द्वादश

” पञ्चदश

” सप्तदश

” अष्टादश ।

(छ) युद्धजयार्णवतन्त्रम् ।

अक्षर – नेवारी ।

प्रारम्भवाक्यम् । – – सूर्य्याय ।

मोहान्धकारमग्नानां जनानां ज्ञानरश्मिभिः ।

कृतमुद्धरणं येन तं नौमि शिवभास्करम् ॥

देव्युवाच ।

भगवन् देवदेवेश शशाङ्क – – – – ।

– – – परमं ज्ञानं विस्पष्टार्थं महेश्वर ॥

स्वरोदयं परं गुह्यं मुनिना – – – पुनः ॥ इत्यादि ।

अन्तवाक्यम् । इति युद्धजयार्णवतन्त्रे प्रकीर्णाधिकारो नाम दशमपटलः समाप्तः स्वरोदय – – – संवत् ४२६ । ( आवराणयङ्कानि । ) – – – – श्रीश्रीजयतिथिमल्लदेवस्य विजयराज्ये ।

(ज) अनुमानखण्डटीका ।

वाचस्पतिरचिता ।

( खण्डितान्ता । ) मैथिलमक्षरम् । विवरणं प्रशस्तम् ।

(झ) भाषावृत्तिः ।

( आद्यन्तखण्डिता । ) मैथिलमक्षरम् ।

(ञ) अनर्घराघवनाटकम् ।

( आद्यन्तखण्डितम् । ) मैथिलमक्षरम् ।

१६३५ ।

महाभारतम् ।

( खण्डितान्तसभापर्व्वमात्रम् । ) ९३ पत्राणि । अक्षर – नेवारी ।

१६४५ ।

(क) देवीमाहात्म्यम् ।

( देवीस्तवसहितम् । ) अक्षर – नेवारी । संवत् ३८९ ।

11

(ख) रुद्रमाहात्म्यम् ।

( वराहपुराणीयम् । ) अक्षर – नेवारी ।

(ग) देवीमाहात्म्यम् ।

( आदिखण्डितम् । ) नागराक्षरम् ।

(घ) मालिनीस्तोत्रम् ।

( मालिनीच्छन्दसा महामायायाः स्तवनम् । )

११ पत्राणि । अक्षर – नेवारी ।

अन्तवाक्यम् । श्रीमन्नेपालमण्डले । राजा श्रीअभयमल्लदेवे भुज्यमाने ।

पुष्पिका । इति मालिनीस्तोत्रं समाप्तम् ।

इति समस्तव्यस्तव्याप्तिनिश्चयो नाम पीठकास्तोत्रं समाप्तः ।

(ङ) पञ्चपत्राणि ।

( कामशास्त्रीयाणि । )

प्रारम्भवाक्यम् । बाला स्याद् षोडशाब्दा तदुपरि तरुणी त्रिंशतो यावदूर्द्धं

प्रौढा स्यात् पञ्चपञ्चाशदवधिपरमतो वृद्धतामेति नारी ।

दीर्घा कृष्णा च तन्वी चिरविरहवती निम्नकक्षा स्त्रया स्युः

स्थूला गौरी च खर्व्वा सततरतिरपि गूढकक्षा घना स्युः ॥ इत्यादि ।

अन्तवाक्यम् । यद् गृह्णती किञ्चन वञ्चिताङ्गी स्थितोपरिष्टा पुरुषं च नाभ्या ।

नितम्बिनी विध्यति ताश्च गाढं गृह्णात्यसौ विद्धकमुच्यते तत् ॥ (?)

(च) कामकला ।

कोक्कविरचिता । ११ पत्राणि ।

प्रारम्भवाक्यम् । ( मङ्गलाचरणश्लोकौ परित्यज्य लिखितम् )

(श्री) कोक्कनाम्ना कृतिना कृतोऽयं

श्रीवैन्यदत्तस्य कुतूहलेन ।

विलोक्यतां कामकला सुधीरा

प्रदीपकल्पा च रसं विगुम्फा:(?) ॥

असाध्यायाः सुखं सिद्धिः सिद्धायाश्चानुरञ्जनम् ।

रक्तायाश्च रतिः सम्यक् कामशास्त्रप्रयोजनम् ॥

पुष्पिकाः । ३ पत्रे । इति जात्यधिकारो नाम परिच्छेदः ।

५ पत्रे । इति चन्द्रकलाभिधानो नाम द्वितीयः परिच्छेदः ।

११ पत्रे । इति नखाधिकारो नाम ।

(छ) तिङ्भेदः ।

२० पत्राणि ।

प्रारम्भवाक्यम् । नमो भवाय ।

सदा – – – – – चित्तं गुणोदधिम् ।

शब्दज्ञानानभिज्ञानां तिङां भेदस्तु कथ्यते ॥

(ज) मलबाधाप्रशमनम् ।

( विष्णुधर्म्मीयम् । ) ५ पत्राणि ।

अन्तवाक्यम् । संवत् ३२२ आषाढकृष्णाष्टम्यामादित्यवासरे । राज्ञे श्रीमद्हरिमल्लदेवस्य विजयराजे लिखनं समाप्तीकृतम् ।

(झ) इन्द्राचीस्तवः ।

अक्षर – नेवारी ।

(ञ) महामायास्तवः ।

अक्षर – नेवारी ।

(ट) ब्रह्मपुराणम् ।

१०७ – १८२ पत्राणि । अक्षर – नेवारी ।

पुष्पिकाः । इत्यादिब्रह्मपुराणे स्वयम्भूऋषिसम्वादे प्रतिमोत्पत्तिः ।

इत्यादिब्रह्मपुराणे स्वयम्भूऋषिसम्वादे उत्कलवर्णनम् ।

इत्यादिब्रह्मपुराणे स्वयम्भूऋषिसम्वादे दक्षयज्ञविध्वंसनम् ।

(ठ) रामायणम् ।

( खण्डितकीटदष्टसुन्दरकाण्डमात्रम् । ) मैथिलाक्षरम् ।

(ड) मुद्राप्रकाशः ।

(मुद्राराक्षसनाटकस्य टीका। प्रथमाङ्कात् तृतीयाङ्कस्य कियदंशपर्य्यन्ता ।)

वटेश्वरविरचितः । मैथिलाक्षरम् ।

पुष्पिका । महामहोपाध्यायश्रीगौरीपतितनयश्रीवटेश्वरविरचितमुद्राप्रकाशे प्रथमोऽङ्कः।

(ढ) **महालक्ष्मीमाहात्म्यव्याख्यानसमुच्चयः ।**

अक्षर – नेवारी ।

पुष्पिका । इति गालवकृते महालक्ष्मीमाहात्म्यव्याख्यानसमुच्चये षोडशमोऽध्यायः समाप्तः ।

संवत्सरे भूतखपञ्चशेषे मासे सिते श्रावणजीववारे ।

पूर्व्वाहियाठे – – कामतिथौ दिनेषु संपूर्णमिदं हि शास्त्रम् ॥

यस्मिन् नृपेशः स्थितिराजमल्लः समस्तसामन्तभुवं भुनक्ति ।

तस्मिन् समालिख्य वीरादिसिंहो महादिलक्ष्मीं व्रतराजमीशम् ॥

(ण) **सप्तमीव्रतकथा ।**

अक्षर – नेवारी ।

वह्निशून्यशरे याते नेपालाब्दे विधीयते ।

अशुन्याश्व सिते पक्षे तिथौ काम भृगुदिने ॥ ?

(त) **महालक्ष्मीव्रतकथा ।**

अक्षर – नेवारी । संवत् ५०२ ।

(थ) **कुसुमाञ्जलिप्रकाशः ।**

वर्द्धमानरचितः । मैथिलमक्षरम् ।

प्रारम्भवाक्यम् । ( मङ्गलाचरणानन्तरम् । )

न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।

गङ्गेश्वराय गुरवे पित्रे च भवते नमः ॥ इत्यादि ।

पुष्पिका । इति कुसुमाञ्जलिप्रकाशे तृतीयः स्तवकः ।

## १६४७ ।

(क) **वेदमन्त्राणि ।**

(ख) **शारदातिलकम् ।**

( खण्डितम् । ) वङ्गाक्षरलिखितम् ।

(ग) **धातुपाठः ।**

( खण्डितः । )

(घ) पारमेश्वरीमततन्त्रम् ।

( खण्डितम् । )

(ङ) धातुज्ञानम् ।

( धातूनां साधनप्रणाली । )

(च) कुशोपदेशटीका ।

अङ्गरकुमाररचिता । अक्षर – नेवारी ।

पुष्पिका । इति कुशोपदेशे नीतिसारे अङ्गरकुमारकृते अष्टमः श्लोकः सम्बन्धः परिच्छेदः समाप्तः परिपूरि सम्पूर्णम् । संवत् ६४३ फाल्गुन प्रतिपददिने भृगुवासरे काष्ठमण्डपपुरीपूर्व्वदिग्स्थितमहाबीहारतरुमूले नामवासित-वज्राचार्य्यश्रीब्रान्धवसेनेन रचितम् ।

(छ) उपयोगक्रमः ।

( व्याकरणशास्त्रम् । )

(ज) ब्रह्मपुराणम् ।

( खण्डितम् । )

(झ) लङ्कावतारः ।

गुप्ताक्षरलिखितः । संवत् २८ । ( आक्षराणाङ्कानि । )

## १९४८ ।

(क) गुप्ताक्षरलिखितानि षोड़शपत्राणि ।

( व्याकरणशास्त्रीयाणि । )

सूत्राणि । ग्रीष्मवसन्ताद् वा । एताभ्या – – – – भवति ।
ग्रैष्मकं ग्रस्यं ग्रैष्मं वासन्तं वासन्तकं । कालाद्दियष्टणं ॥ कालेभ्यः सप्त-म्यन्तेभ्यः देय – – – यथाविहितं – – – दयो भवन्ति । ऋणश्चेत् तत् मासदेयं ऋणं मासिकं ग्रैष्मम् । ऋणमिति किं मासदेया भिक्षा । इत्यादि ।

(ख) सर्व्वज्ञानोत्तरतन्त्रम् ।

४० पत्राणि । गुप्ताक्षरलिखितम् ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय ।

— — — — — — —

समाप्ते चायुते तन्त्रे देवदेवं महेश्वरम् ।

— — — — — परां गुह्या पृच्छ — — षडाननः ॥

— — — सर्व्वलोकेशः सर्व्वज्ञः सर्व्वकृत् प्रभोः । (?)

सर्व्वज्ञा + मयज्ञानं सर्व्वज्ञानेषु चोत्तरम् ॥

युक्तं सर्व्वात्मकैर्मन्त्रैः सर्व्वसिद्ध्यर्थसाधकः ।

हिताय सर्व्वसत्वानां वक्तुमर्हस्यशेषतः ॥

— — — — वाच ।

अथातः सम्प्रवक्ष्यामि सर्व्वशास्त्रसमुच्चयम् ।

सर्व्वज्ञानोत्तरं नाम सर्व्वतन्त्रा — — — ॥

— — — सर्व्वपुण्येषु सारमुद्धृत्य निर्म्मितम् ।

गन्धर्वं सर्व्वशास्त्रेषु सारमुद्धृत्य शम्भुना ॥

— — — दार्णव निर्म्मथ्य यथा सर्व्वैः सुरासुरैः ।

उद्धृतं अमृतं पूर्व्वं तथेदं तन्त्रमुत्तमम् ॥ इत्यादि ।

( एकापि पुष्पिका न दृष्टा । )

(ग) **चरकसंहिता ।**

अक्षर – नेवारी । विवरणं प्रदत्तम् ।

(घ) **खण्डखाद्यटीका ।**

श्रीदत्तरचिता । विवरणं प्रदत्तम् ।

(ङ) **त्रिपुराजपहोमविधिः ।**

(वामकेश्वरतन्त्रोक्तः ।) ११ – ३५ पत्राणि । अक्षर – नेवारी ।

(च) **नागरकसर्व्वस्वम् ।**

विवरणं प्रदत्तम् ।

(छ) **द्वैतनिर्णयः ।**

२ – ४८ पत्राणि । मैथिलमक्षरम् ।

(ज) **भोजदेवसङ्ग्रहः ।**

अक्षर – नेवारी । विवरणं प्रदत्तम् ।

(झ) महामायाष्टकम् ।

अक्षर – नेवारी ।

अन्तवाक्यम् । सम्वत् ५८४ । पौषशुक्लपञ्चम्यां तिथौ । शुभम् ।

(ञ) दशकर्म्मपद्धतिः ।

६४ पत्राणि ।

प्रारम्भवाक्यम् । ब्रह्मणे नमः ।

अथ गर्भाधानविधिः ।

रजस्वला – – – – – । अष्टमे दिने प्रभाते स्नानं । इत्यादि ।

(ट) गुह्यसिद्धिशास्त्रम् ।

५९ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः श्रीभैरवाय ।

आदिवर्गक्रमाक्रान्त्यं युगसिद्धचतुष्टयम् ।

अष्टाष्टकक्रमायान्तं तं वन्दे कुलनायकम् ॥

श्रीश्रीपीठे मयान्तस्थे गुह्यपीठे परिस्थितः ।

अनन्तचक्रमारूढा सर्व्ववर्णविभूषितम् ॥

– – – – – – –

देव्युवाच ।

गुह्यसिद्धिक्रमं देव समयाचारलक्षणम् ।

सवाह्याभ्यन्तरा ब्रूहि नाथ सर्व्वजगत्पते ॥ इत्यादि ।

अन्तवाक्यम् । इह लोके च दारिद्र्यं मृते च पशुतां नयेत् ॥

संवत् ५१४ दुराखाढमासे शुक्ले पञ्चमीये

श्रीश्रीभक्तग्रामे जयथितीराजमल्लदेवस्य विजयराज्ये श्रीभोगेश्वरकुटुम्बज-

क्रमाचार्य्यलिखिता . . . . . . श्रीगुह्यसिद्धिशास्त्र समाप्तः ॥

(ठ) भैरवार्चनम् ।

१५ पत्राणि । अक्षर – नेवारी ।

(ड) नैषधचरितम् ।

खण्डितनवमसर्गपर्य्यन्तम् । मैथिलमक्षरम् ।

(ढ) शारदातिलकम् ।

( आदिमध्यखण्डितम् । ) वङ्गाक्षरलिखितम् । शाके १३३६ ।

(ण) मुद्राराक्षसनाटकम् ।

अक्षर – नेवारी ।

अन्तवाक्यम् । श्रेयोऽस्तु संवत् ४९१ । भाद्रपदशुक्लतृतीयायां तिथौ . . . . . . . परमेश्वरपरमभट्टारकपरमधार्म्मिकः श्रीश्रीजयार्ज्ज . . नां विजयराज्ये श्रीनेपालमण्डले । . . . . . . . . । श्रीललितापुरे श्रीमाणिगलोत्तरे महाविहारे श्रीयोखाच्छेविहाराधिवासिनः . . . . . . . . लेखिक-रत्नाङ्कुरश्रीगोमेन्द्रचन्द्रेन सत्वोपकारार्थहेतुना स्वहस्तेन लिखितं . . ॥

१६९२ ।

(क) अभिसमयालङ्कारः ।

२३ पत्राणि । अक्षर – नेवारी ।

(ख) अष्टसाहस्रिका ।

( खण्डिता । ) अक्षर – नेवारी ।

(ग) महाभारतम् ।

( खण्डितशल्यगदापर्व्वात्मकम् । ) अक्षर – नेवारी ।

(घ) विद्यापीठः ।

पुष्पिका । इति विद्यापीठे गुह्यकालिकेन्धकसारे (?) तृतीयपरिच्छेदः समाप्तः ।

(ङ) कृद्भाष्यम् । (?)

१३ पत्राणि । गुप्ताक्षरलिखितम् ।

सूत्राणि यथा – आतश्चोपसर्गे । आकारान्ताद्धातोः उपसर्गे उपपदे अत् प्रत्ययो भवति । स्त्रियां प्रस्था संस्था प्रभा प्रधा उपधा । ईषिग्रन्थ्या-सिवन्दिविदिकारितान्तेभ्यो युः । ईषि ग्रन्थि आसि वन्दि विदि कारि तान्ता इत्येतेभ्यः स्त्रियां युप्रत्ययो भवति । ईषा. . . . . .आसना वन्दना वेदना कारणा. . . . . . . . ॥

कीर्त्तीष्योक्तिश्च । कीर्त्ति इष्ट इत्येतयोः क्ति प्रत्ययो भवति । युश्चाधि-कृतः । कीर्त्तिः कीर्त्तना ।

पुष्पिका । कृद्भाष्यतः प्रथमोऽध्यायः समाप्तः ।

---

# CATALOGUE

OF

# PALM-LEAF MANUSCRIPTS

IN THE COLLECTION RECENTLY MADE BY

HIS EXCELLENCY

MAHĀRAJĀ SIR BĪR SHAMSHER JANG BAHĀDUR RĀṆĀ,

PRIME MINISTER AND COMMANDER-IN-CHIEF OF NEPAL.

२

(क) दिव्यावदानम् ।

( रूपवत्यवदान – कुणालावदान – पांशुप्रदानावदानैः समेतम् । )

(ख) कारण्डव्यूहः ।

अक्षर – नेवारी ।

(ग) अष्टसाहस्रिकाप्रज्ञापारमिता ।

अक्षर – नेवारी ।

(घ) जातकमाला ।

( शृहजातक – हंसजातक – यक्षजातक – व्याघ्रीजातकानि । )

६

खण्डखाद्यकम् ।

ब्रह्मगुप्तरचितम् । १५ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः सूर्य्याय ।

प्रणिपत्य महादेवं जगदुत्पत्तिस्थितिप्रलयहेतुम् ।

वक्ष्यामि खण्डखाद्यकमाचार्य्यार्य्यभटतुल्यफलम् ॥

प्रायेणार्य्यभटेन व्यवहार प्रतिदिन यतो लच्यम् ।

उद्वाहजातकादिषु तत्समलघुतरोक्तिरतः ॥ (?) इत्यादि ।

12

अन्तवाक्यम् । इति खण्डखाद्यके महाकरणे परिलेखाधिकारः समाप्तः । समाप्तञ्चेदं खण्डखाद्यकम् । - - - - - - - श्रेयोऽस्तु संवत् ४७० भाद्रपदकृष्ण-द्वितीयापरतृतीयायां तिथौ - - - - - - ॥

## ४

तिङ्भेदः ।

प्रारम्भवाक्यम् । ॐ नमो वागीश्वराय ।

मञ्जुघोषं प्रणम्यादौ बालानां बुद्धिवृद्धये ।

शब्दज्ञानमभिज्ञान - - - दं तु कथ्यते ॥

तत्र लङादीनां लस्थाने तिवादय आदेशा भवन्ति । के पुनस्ते लङादयः । लट् लिट् लुट् लृट् लोट् इति पञ्च - - टित् । इत्यादि ।

अन्तवाक्यम् । इति ६ समाप्तः । संवत् ५४० ज्येष्ठशुक्ल १३ शुभ - - ।

## १२

(क) द्वैतनिर्णयः ।

वाचस्पतिमिश्ररचितः । मैथिलमक्षरम् ।

(ख) विवादनिर्णयः ।

वाचस्पतिमिश्ररचितः । मैथिलमक्षरम् ॥

## १४

(क) शताधिकाष्टाशीतिपत्राणि ।

( वैद्यशास्त्रीयाणि । ) मैथिलमक्षरम् ।

प्रारम्भवाक्यम् । ॐ महागणेशाय नमः ।

विबुधार्थसाधनधिया दुग्धाब्धेरमृतमुद्धृतं येन ।

विधुतजराव्याधि - - स दिशतु धन्वन्तरिः सिद्धिम् ॥

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।

ततः कर्म्म भिषक् पश्चाद् ज्ञानपूर्व्वं समाचरेत् ॥ इत्यादि ।

( कापि पुष्पिका न दृष्टा । )

(ख) भागवतटीका ।

( एकादशद्वादशस्कन्धयोः । ) मैथिलमक्षरम् ।

प्रारम्भवाक्यम् । ॐ गणपतये नमः ।

प्रागृविरुद्धोपसंहारो रूपितोऽनेकधा बुधा ।

मुक्तयेकादशे स्कन्धे ध्यायैकत्रिंशतोच्यते ॥ (?)

तत्रज्ञानकर्म्मनिष्ठाभेदात् प्रकरणं द्वयं पञ्चाध्यायाः ।

तत्राद्येऽध्याये रूप्यो यदूनां युगपत्त्वयः ।

विप्राणुप्तो यदुकृते विप्रशापाद् विमुक्तये ॥ ?

तत्रादौ तत्र प्रसिद्धार्थं समनन्तरस्कन्धार्थ – – वदति ।

कृत्वेति यविपुं शेषभूभारहरणाय वेगवत्तरं कलिं कलहमन्येषां जनयन्

भुवोभारं निरहरदिति ॥ इत्यादि ।

अन्तवाक्यम् । लसं ३९३ मार्ग शुदि १४ शनौ एदिने पोआरिग्रामे श्रीरघुपतिना

लिखितैषा पुस्तीति ।

१५

कामन्दकीयनीतिसारः ।

८१ पत्राणि । मैथिलमक्षरम् ।

अन्तवाक्यम् । शुभमस्तु श्रीरस्तु ।

गौड़भूमिपतेरब्दे नेत्रवङ्ग्यब्धिभूषिते ।

वैशाखे कृष्णसप्तम्यामिदं कश्चिदलीलिखत् ॥

१७

नलचरितटीका ।

मैथिलमक्षरम् ।

पुष्पिकाः । २८ पत्रे । इति मन्त्रिहरीश्वरकृतौ नलचरितटिप्पन्यां नवमः सर्गः ।

२२९ पत्रे । विक्रमादित्यचरिते गद्यपद्यमयग्रन्थविशेषकर्तुर्मन्त्रिहरीश्वर(स्य)-

कृतौ नलचरितटिप्पनिकायां २२ सर्गः ।

२३० पत्रे । योगिनीरुद्रकलिते शाके माघे समापिता ।

हरीश्वरसमाम्नातैर्व्याख्येयं कृतिनां मुदे ॥

२६

(क) शिवधर्मोत्तरम् ।

अक्षर – नेवारी ।

(ख) शिवधर्मसङ्ग्रहः ।

अक्षर – नेवारी ।

(ग) वृषसारसङ्ग्रहः ।

अक्षर – नेवारी ।

(घ) धर्मपुत्रिका ।

११ पत्राणि । अक्षर – नेवारी ।

प्रारम्भवाक्यम् । ॐ नमः शिवाय ।

वन्दे देवं पुराणं शिवममरगुरुं भूतलस्थेन मूर्द्धा

नित्यं शान्तं सुसूक्ष्मं त्रिभुवननमितं सर्व्वसत्त्वैकनाथम् ।

निःसङ्गं निर्व्विकारं प्रजननमरणक्लेशदोषैर्विमुक्तं

योगाभ्यासैकवेद्यं त्रिगुणविरहितं न प्र – – – रूपम् ॥

– – – – – – –

नमस्कृत्य प्रवक्ष्यामि संहितां धर्मपुत्रिकाम् ।

सिद्धिं प्राप्नोति योगस्य युञ्जन् योगी न संशयः ॥

नवोत्तराशीतियुते शतेऽब्दे

आषाढशुक्लस्य तिथौ तृतीये ।

श्रीशङ्कराख्ये जयति क्षितीन्द्रे

श्रीयत्वलस्योत्तरटोलकेयः ॥ ?

पुष्पिका । धर्मपुत्रिकायां सिद्ध्युपायो नाम षोडशमोऽध्यायः समाप्तः ।

पुष्पिकाः । धर्मपुत्रिकायां साधनप्रकरणं नाम प्रथमोऽध्यायः ।

धर्मपुत्रिकायामासनप्रकरणं नाम द्वितीयः पटलः ।

,, धारणाप्रकरणं नाम तृतीयोऽध्यायः ।

,, ध्यानमार्गप्रकरणं नाम चतुर्थः पटलः ॥

,, सूक्ष्मान्तरायो नाम पञ्चमः पटलः

,, महासूक्ष्मान्तरायो नाम ६ ष्ठः अध्यायः ।

धर्म्मपुत्रिकायां प्रमाङ्जान्तरायो नाम ७ मः अध्यायः ।

| | | | |
|---|---|---|---|
| ,, | प्रतिभाद्यन्तरायो नाम | ८ | ,, |
| ,, | जरा नाम | ९ | ,, |
| ,, | चिकित्सा नाम | १० | ,, |
| ,, | – लिङ्गं नाम | ११ | शः |
| ,, | पुत्रलिङ्गं नाम | १२ | ,, |
| ,, | वृद्ध्यापायो ? नाम | १३ | ,, |
| ,, | विनाशः | १४ | ,, |
| ,, | प्रत्यानयनं नाम | १५ | ,, |
| ,, | सिद्ध्यपायो नाम | १६ | ,, |

# DETAILED DESCRIPTION

OF SOME OF THE

# RARE PALM-LEAF MSS.

IN THE

## DURBAR LIBRARY, NEPAL.

(१६३४ । ज । ) अनुमानखण्डटीका. By वाचस्पति. 12×1 inches. Folia, 82. Lines, 6 on a page. Extent, 2,091 çlokas. Character, Maithila. Date, (?) Appearance, old. Prose. Generally correct.

**Beginning.** ॐ नमः शिवाय ।

- - - - - विकर्षणस्फुरितगोपसीमन्तिनी-
पयोधरमहीधरद्धितयमग्नद्दकुचेतसः ।
विनम्रसुरधोरणीमुकुटघृष्टपादश्रियः
पुनन्तु पदपांशवः सपदि कंसविध्वंसिनः ॥
दूरीभूतं द्वैतचिन्तातुराणामेकीभूतं सारभूतं सुराणाम् ।
आत्मीभूतं गोपसीमन्तिनीनां श्यामीभूतं ब्रह्म निर्व्याजमीड़े ॥
स्वरूपतः कारणतो विषयात् फलतः क्रमात् ।
- - - - - परार्द्धञ्च कथोपकरणान्वितम् । (?)
अथ प्रत्यक्षमूलकत्वात् तदनन्तरमनुमानं निरूप्यते । इत्यादि ।

**End.** अतएवाशक्तिसूचकतया दोषत्वे अनुवादमोत्सर्गं दूषणोपारूढ़ञ्च नाप-
लपेदिति रहस्यम् । (अतः खण्डिता)

विषयः । आराध्य यादवकिशोरमतिप्रयत्ना-
दभ्यस्य गौतममतं सह जैमिनीयम् ।
सारं विविच्य मतयोरनयोरशेषं
वाचस्पतिर्विशदयत्यनुमानमार्गम् ॥

---

(१३६१ । च ।) कर्म्मक्रियाकाण्डः. By सोमशम्भु. 8×1½ inches. Folia, 111. Lines, 5 on a page. Extent, 2,220 çlokas. Character, Newārī. Date, (?) Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमः शिवाय ।
विश्वबोधविधातारं विश्वविज्ञानविग्रहम् ।
विश्वरूपं परं नत्वा विश्वेशं शिवमव्ययम् ॥
संवीक्ष्य शिवशास्त्राणि सदाचार्य्योपदेशतः ।
क्रमान्नित्यादिकं वक्ष्ये क्रमबोधविवृद्धये ॥
प्रातरुत्थाय सञ्चिन्त्य शिवाय शिवमक्षरम् ।
उत्सृजेन्मलमूत्रादि गत्वा देशं यथोचितम् ॥ इत्यादि ।

End. अथ वृक्षप्रतिष्ठायां + + + + स्तिलैः ।
आरामोद्यानयोर्वृक्षात् पूर्व्वंशदिशि मण्डपे ॥
स्नपनं पूजनं न्यासं स्वेन स्वेन शुनाचरेत् । (?)
वृक्षाधिदेवताग्नौ × × × × पूर्णाहुतिं गुरुम् ॥
कर्त्ता सन्तोषयेत् पश्चादाचार्य्यं ब्राह्मणानपि ।
बन्धून् मित्राणि दीनांश्च भोजयेत् तोषयेदपि ॥
श्रीगोननामा शिवतुल्यधामा
तस्याथ शिष्यो विमलेशनामा ।
तस्यापि शिष्यस्तु शिवः शिवात्म-
शिष्योऽभव × × स सोमशम्भुः ॥
× × × × ×
दिक्चक्रवालोदरलब्धकीर्त्तिः ।
शिवाश्रमाङ्को (?) मुनिवृन्दवन्द्य-
श्चक्रे क्रियाकाण्डपदक्रमावलीम् ॥
क्व तावकीनागमबोधविक्रवा
क्व शैवा × × × ।
× × × × ×
× × × × × ॥

याते<ऽब्दे त्रिशते स च षट्सहिते भूयो विंशत्य × श्रावणे मासे द्वादशी-
तिथौ श्रीश्चरिमल्लदेवनृपे × × × × संस्थिते × × × पूर्णे
पुरे × × ।

---

( २२६ । च । ) कालोत्तरतन्त्रम् . 8×1½ inches. Folia, 39. Lines, 5 on a page. Extent, 609 çlokas. Character, Nāgara. Date, (?). Appearance, old. Verse. Correct.

**Beginning.** ( प्रथमपत्रं नास्ति तेन द्वितीयपत्रस्थं द्वितीयपटलस्य प्रारम्भवाक्यं
मद्दत्तम् । )

कार्त्तिकेय उवाच ।

अन्तःकरणविन्यासं भूतशुद्धिस्तथैव च ।
भूतशुद्धिं पुरा कृत्वा + + + + ॥
आप्यायनं कथं तेषां कथयस्व यथार्थतः ॥

ईश्वर उवाच ।

चैतन्यं मोहयेत् पूर्व्वं दहनं तदनन्तरम् ।
आप्यायनं तृतीयन्तु प्राणायामश्च यः स्मृतः ॥ इत्यादि ।

**End.** + + + + + + + + ।
+ + + + न भूयो जन्मसम्भवः ॥

**Colophon.** इति कालोत्तरे महातन्त्रे सप्तशतिकहंसवाचो (?) नाम द्वात्रिंशतितमः
पटलः । समाप्तं चेदमखिल . . . . कालोत्तरं महाशास्त्रमिति ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| विषयः । | इति | कालोत्तरे | महातन्त्रे | सप्तशतिके | मन्त्रोद्धारे | १ | मः | पटलः । |
| | ,, | ,, | ,, | ,, | अन्तःकरणो नाम | २ | यः | ,, |
| | ,, | ,, | ,, | ,, | | ३ | ,, | ,, |
| | ,, | ,, | ,, | ,, | भस्मस्नानं | ४ | र्थः | ,, |
| | ,, | ,, | ,, | ,, | यजनविधिः | ५ | मः | ,, |
| | ,, | ,, | ,, | ,, | अग्निकार्य्यविधिः | ६ | ष्ठः | ,, |
| | ,, | ,, | ,, | ,, | | ७ | मः | ,, |
| | ,, | ,, | ,, | ,, | दीक्षाप्रकाशे | ८ | ,, | ,, |
| | ,, | ,, | ,, | ,, | | ९ | ,, | ,, |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| इति | कालोत्तरे | महातन्त्रे | सप्तशतिके | नाड़ी + | नाम | १० मः | पटलः । |
| ,, | ,, | ,, | ,, | अग्निसोमात्मकं | ११ शः | ,, | |
| ,, | ,, | ,, | ,, | सृष्टिसंहारकं | १२ | ,, | ,, |
| ,, | ,, | ,, | ,, | | १३ | ,, | ,, |
| ,, | ,, | ,, | ,, | प्रासादनिदर्शनः | १४ | ,, | ,, |
| ,, | , | ,, | ,, | | १५ | ,, | ,, |
| ,, | ,, | ,, | ,, | | १६ | ,, | ,, |
| ,, | ,, | ,, | ,, | | १७ | ,, | ,, |
| ,, | ,, | ,, | ,, | | १८ | ,, | ,, |
| ,, | ,, | ,, | ,, | तत्त्वनिर्णयः | १९ | ,, | ,, |
| ,, | ,, | ,, | ,, | संक्रान्तिः | २० | ,, | ,, |
| ,, | ,, | ,, | ,, | | २१ | ,, | ,, |
| ,, | ,, | ,, | ,, | शक्तिसमरसः | २२ | ,, | ,, |
| ,, | ,, | ,, | ,, | कुमारिकाप्रकरणे | २३ | ,, | ,, |
| ,, | ,, | ,, | ,, | कालचक्रे + + | २४ | ,, | ,, |
| ,, | ,, | ,, | ,, | प्रत्यङ्गयजनं | २५ | ,, | ,, |
| ,, | ,, | ,, | ,, | | २६ | ,, | ,, |
| ,, | ,, | ,, | ,, | | २७ | ,, | ,, |
| ,, | ,, | ,, | ,, | | २८ | ,, | ,, |
| ,, | ,, | ,, | ,, | | २९ | ,, | ,, |
| ,, | ,, | ,, | ,, | | ३० | ,, | ,, |
| ,, | ,, | ,, | ,, | | ३१ | ,, | ,, |
| ,, | ,, | ,, | | सप्तशतिकहंसवाचो नाम(?) | ३२ | ,, | ,, |

---

( १०७७ । ञ । ) कीर्त्तिपताका . By विद्यापति. 10 × $1\frac{1}{2}$ inches. Folia, 38, (of which leaves 8–29 are missing). Lines, 5 on a page. Extent, 618 çlokas. Character, Maithila. Date, Lakṣmaṇa Era, 426. Appearance, old. Verse. Incorrect.

**Beginning.** श्रीमहागणेशाय नमः ।

नित्यो विश्राय विलम्बिजटान्तरस्थो (?)
देहार्द्धबद्धरमणीरमणीयमूर्त्तिः ।
कौतूहलादिव निकुञ्जगृहं भिविश्य
शृङ्गारवानवतु वो नवचन्द्रचूडः ॥

13

अटन्ती कण्ठसंसक्ता रसश्रीकरवर्षिणी ।
भारती मालतीमालोपमेयं मे विराजताम् ॥
निघ्नन्तं विघ्नानिह तारकर्णतालेन ।
लम्बोदरमवलम्बे लम्बोरमवदनमेकदेवमहम् ॥

दोहा । परिहग्रमण्डलिबद्धगुणे भीषमकीरसुहेन ।
वाणीमहुरमहगघरस विग्रह स्वग्रनसवनेन ॥ (?) इत्यादि ।

End. एवं श्रीशिवसिंहदेवनृपतेः संग्रामजातं यशो
गायन्ति प्रतिपत्तनि प्रतिदिशं प्रत्यङ्गनं सुभ्रुवः ।
एतत् कीर्त्तिप + + + + + वाणी च विद्यापते-
राचन्द्रार्कमियं विराजत सुखाम्भोजेषु + + सदा ॥

Colophon. इति श्रीविद्यापतिविरचितायां कीर्त्तिपताकायां चतु - - ग्रः सम्पूर्णः ॥
शुभमस्तु । लसं ४२६ जेठवदि शुक्रे - - - यं पुरनगरे श्रीहोरिलय-
ल्लिखिता (?) पुस्तीति । .. .. .. .. .. .. ॥

विषयः । शिवसिंहनृपतेः कीर्त्तिकलिताः काश्चित् दोहाः ।

---

( १०७८ । घ । ) कुब्जिकामतम्. 8 × 2 inches. Folia, 12. Lines, 5 on a page. Extent, 180 çlokas. Character, Newārī. Date, Newār Era, 280. Appearance, old. Verse. Incorrect.

Beginning. ॐ नमो महाभैरवाय ।
नित्योदितचिदानन्दं सर्व्वज्ञं सर्व्वसंस्थितम् ।
कामरूपपरं देवं श्रीनाथं प्रणमाम्यहम् ॥
मेरुपृष्ठे सुखासीनं भैरवं विगतामयम् ।
गणकोटिसमाकीर्णं योगिभिः परिवारितम् ॥
प्रणिपत्य महादेवं इदं वचनमब्रवीत् ॥
चन्द्राधिपे महाद्वीपे कामाख्यापीठमुच्यते ।
किं नु कार्य्यं महादेव अहं त्वच इहागता ॥ (?)
श्रीभैरव उवाच ।
कैलासपीठमध्यस्थं कारणानन्दविग्रहम् ।
ब्रह्माद्या देवता सर्व्वे मोदयामि त्वया सह ॥ (?) इत्यादि ।

End. खेचरीणामियं मुद्रा स्वस्वप्रत्ययकारका ।
– – – – – – – चराचरमिदं स्मृतम् ॥
चराचरमिदं तत्वं षट्तत्वं परिमण्डितम् ॥

Colophon. इति सार्द्धशतिका श्रीकुब्जिकामतसमाप्तमिति । मङ्गल महाश्रीः ।
संवत् २८० पौषकृष्ण एकादश्याम् ।

विषयः । पीठ-पीठदेवतानामसंकीर्त्तनम् । कतिपयमुद्रालक्षणञ्च ।

---

(२८५ । क ।) कुब्जिकामतम्. (कुलालिकाम्नायान्तर्गतम्.) 10 × 1½ inches. Folia, 152. Lines, 6 on a page. Extent, 2,964 çlokas. Character, Newārī. Date, Newār Era, 299. Appearance, old. Verse. Correct.

Beginning. ॐ नमो महाभैरवाय ।
सङ्कर्त्ता मण्डलान्ते क्रमपदनिहितानन्दशक्तिः सुभीमा
सृष्टन्याय्यं चतुष्कं अकुलकुलगतं पञ्चकञ्चान्यषट्कम् ।
चत्वारः पञ्चकोन्यः पुनरपि चतुरस्तत्वतो मण्डलेदं
संसृष्टं येन तस्मै नमत गुरुतरं भैरवं श्रीकुजेशम् ॥ १
श्रीमद्धिमवतः पृष्ठे त्रिकूटशिखरानुगम् ।
सन्तानपुरमध्यस्थमनेकाकाररूपिणम् ॥
– – – त्रिप्रकारन्तु त्रिशक्ति त्रिगुणोज्ज्वलम् ।
चन्द्रसूर्य्यकृता – – म्वह्निदेदीप्यवर्च्चसम् ॥
.. .. .. .. .. .. ..
कार्य्यकारणभेदेन किञ्चित्कालमपेक्षया ।
तिष्ठते भैरवीशानं मौनमादाय निश्चलम् ॥ (?)
तत्र देवगणाः सर्व्वे सकिन्नरमहोरगाः ।
कुर्व्वन्ति कलकलारावं समागत्य समीपतः ॥
श्रुत्वा कलकलारावं को भवान् किमिहागतः ।
हिमवान् तु प्रसन्नात्मा गतोह्यन्विषणां प्रति ॥ इत्यादि ।

End. नानेन रहिता सिद्धिर्भुक्तिमुक्तिर्न विद्यते ।
निराधारपदं हि तत् तद्धेदपरमं पदम् ॥ (?)

Colophon. इति कुलालिकाम्नाये श्रीमत्कुब्जिकामते समस्तस्यानावबोधश्चर्य्या-निर्द्देशो (?) नाम पञ्चविंशतिमः पटलः समाप्तः। संवत् २९९ फाल्गुन कृष्ण।

विषयः। इति श्रीकुलालिकाम्नाये श्रीकुब्जिकामते चन्द्रद्वीपावतारो नाम। १पटलः।

इ० श्रापर्य्याये कौमार्य्यधिकारो नाम। २।

इ० मन्थानभेदप्रचाररतिसङ्क्रमो नाम। ३।

इ० मन्त्रनिर्णयो गह्वरमालिन्योद्धारे। ४।

इ० वृहत्समयोद्धारः शब्दराशिमालिनीतद्ग्रहव्याप्तिनिर्णयः। ५।

इ० जयमुद्रानिर्णयः। ६।

इ० मन्त्रोद्धारे प॰ [?]विद्याधिकारो नाम। ७।

इ० स्वच्छन्दशिखाधिकारो नाम। ८।

इ० शिखाकल्पेकदेशो (?) नाम। ९।

इ० देध्या समयो (?) नाम मन्त्रोद्धारे। १०।

इ० षट्प्रकारनिर्णयो नाम। ११।

इ० षट्प्रकाराधिकारवर्णनो नाम। १२

इ० दक्षिणषट्कपरिज्ञानो नाम। १३।

इ० देवीदूतीनिर्णयो नाम। १४।

इ० षट्प्रकारे योगिनीनिर्णयः। १५।

इ० षट्प्रकारे महानन्दमञ्चको नाम। १६।

इ० पदद्वयहंसनिर्णयो नाम। १७।

इ० चतुष्कस्य पदभेदम्। १८।

इ० चतुष्कनिर्णयो नाम। १९।

इ० चन्द्रद्वीपावतारो नाम। २०।

इ० द्वीपाम्नायो नाम। २१।

इ० समस्तव्यस्तव्यापिनिर्णयो नाम। २२।

इ० त्रिःकालमुत्क्रान्तिसम्बन्धः। २३।

इ० तद्ग्रहपूजाविधिपवित्रारोहणम्। २४।

इ० समस्तस्यानावबोधश्चर्य्यानिर्देशो (?) नाम। २५।

---

( ७३६ । ख । ) कौशल्यकुसुमावली. By राजब्रह्मवर्द्धन. 10 × 1 inches. Folia, 116. Lines, 5 on a page. Extent, 1,740 çlokas. Character, Nāgara. Date, (?). Appearance, old. Prose and verse. Generally correct.

**Beginning.** ॐ नमो गणपतये ।

सिन्दूरपूरकुम्भस्थलरविविध्वस्तविघ्नघनतिमिरम् ।
गगननिभं गजवदनं नमामि सत्वार्थसिद्धये सुद्धम् ॥
शुभाशुभपरिज्ञानं विना लोकोऽवसीदति ।
अवसन्ने कुतस्तस्मिन् धर्म्मकामार्थसिद्धयः ॥

यतो हि पुरुषार्थसंपत्तिस्तत्कुलं अशुभं पुनरेतद् विपरीतफलं(?) ते च नैसर्गिकानुषङ्गिकभेदेन प्रत्येकं द्विविधम् । पूर्व्वजन्मकर्म्मानुस्यूतं ग्रहदशापाकादिकं निसर्गजम् । कर्म्मानुष्ठानक्षणविशेषविपाकं आनुषङ्गिकम् । .. .. .. .. अतएव वरगुरुचरणारविन्दद्वन्द्ववन्दनानन्दनष्टसंमोहद्युमणिसंबोधितसहजाववोधराजीव — — — रजोराजिविराजमानो राजब्रह्मवर्द्धनोऽवधीरितविषयविज्ञानरसोऽपि .. .. .. ... श्रीमद्ब्रह्मयामलकोशलामतनरपतिजयचर्य्यावराहहोराशाकुनादिशास्त्राणामात्ममतिभाजनानुसारसारसमुच्चयं कौशल्यकुसुमावलीनामनिरवद्यपद्यगद्यहृद्यसंदर्भं विधास्ये ॥

विबुधमतबुधजनोक्तज्योतिषविपिनेषु सुमनसां स्रगियम् ।
सम्पूसूत्रग्रथिता शिवोपयोगाय भवतु भुवि भविनाम् ॥ इत्यादि ॥

**End.** अतः परं निबोधेमं शचीयागविधिं शुभम् ।
प्रशस्ततिथिनक्षत्रक्षणवारेषु शिल्पिना ॥

( अतः परं खण्डिता । )

विषयः । इति कौशल्यकुसुमावल्यां शारीरतत्त्वस्वरोदयो नाम प्रथमा ग्रन्थना ।
इ० वर्षस्वरावचयो नाम । २ ।
इ० राजब्रह्मसंग्रथितायां कौशल्यकुसुमावल्यां त्रिचित्रो नाम प्रथमांशः समाप्तः ॥
( ततो द्वितीयांशः स च खण्डित इति नोपलब्धा काचन पुष्पिका भागस्यैतस्य । )

---

(१६४८। घ।) खण्डखाद्यटीका. By श्रीदत्त. 10 × 2 inches. Folia, 136. Lines, 6 on a page. Extent, 3,060 çlokas. Character, Newārī. Date, Newār Era, 654. Appearance, tolerable. Prose. Correct.

**Beginning.** ॐ नमो नारायणाय ।

यः कौमुदीकुमुदकेतककुन्दवृन्दशुभ्राभ्रशङ्खशरदभ्रसमानकान्तिः ।
प्रोणाग्रविस्फुरणनिर्गतदन्तभाभिः श्वैत्यं वमन् स मम तुष्यतु वाद्ववक्त्रः ॥

वेदन्यायकणादपाणिनिमतज्योतिःपुराणागम-
च्छन्दोनाटककाव्यकोषभरतालङ्कारपाथोनिधिः ।
श्रश्वन्मान्यवदान्यधन्यविलसत्सौजन्यपुण्योन्नतः
श्रीमानेष नगेश्वरो विजयते सूक्ष्मैकरत्नाकरः ॥

तत्सूनुना सकलसज्जनसन्नतेन
श्रीदत्तशर्म्मगुणिना गुणिनां मतेन ।
ब्रह्मप्रणीतगणितानुगतानवद्यं
व्याख्यायते स्फुटगिरा वरखण्डखाद्यम् ॥

तत्र प्रथमतोऽस्य शास्त्रस्य सम्बन्धाभिधेयप्रयोजनानि प्रवृत्त्यङ्गान्युच्यन्ते । तत्र आब्रह्मविनिःसृतो वेदस्तदङ्गं ज्योतिःशास्त्रमिति सम्बन्धः ॥ .. .. .. .. .. .. .. .. ..
अथ ब्रह्मसोमसूर्य्यवसिष्ठरोमकादीनां बहून् सिद्धान्तान् पुराणादिवद् दत्तादिस्मृतिवच्च क्वापि क्वापि विरोधिनो दृष्ट्वा बहुदृश्वना आचार्य्यभटेन यो निबन्धरूपो व्यवहारिकः शिष्यधीतन्त्रसिद्धान्तः कृतः तस्य बहुतराङ्कक्रियत्वात् तेन दुःखरूपा ग्रहगतिरित्यभिसन्धाय जिष्णुसुतब्रह्मगुप्तोऽल्पाङ्कक्रियं करणं कर्त्तुमुद्यतः खण्डमिश्रितेन खाद्येन यथा तृप्तिः सुखञ्च भवति + + + + + + । इत्यादि ।

**End.** एवं कृते गाढ़वबीजशुद्धा ग्रहा भवन्ति । अपरेषान्तु बीजानां मुञ्जालस्यैवानुगमनात् मुञ्जालोपग्रहेणैव गतार्थत्वाद् व्याख्यानं न कृतमिति ॥

लम्बाक्षकर्णपदवाहुकराङ्कलादि-
विक्षेपवर्गगणचारिगतैर्विमूढ़ाः ।

श्रीदत्तशर्म्मसुविकाश्रितखण्डखाद्य-
मास्वाद्य यान्तु सुधियो गणकोत्तमत्वम् ॥

Colophon. इति मिश्रमहोपाध्यायश्रीनगेश्वरात्मजश्रीश्रीदत्तकृतौ खण्डखाद्य-टीकायां गाडवबीजव्याख्यानम् । समाप्ताचेयं टीका ।

श्रीमन्नेपालिकः स्वस्ति श्रेयोऽस्तु संवत् ६५४ कार्त्तिकमासे शुक्ल-पक्षे दशम्यां तिथौ शतभिषपरपूर्व्वभद्रनक्षत्रे सोमवासरे श्रीभक्तपत्तने श्रीश्रीजीतमल्लदेवश्रीश्रीप्राणमल्लदेवौ विजयराज्ये देवज्ञजयकीर्त्तिराजेन स्वार्थं लिखितेयं पुस्तिकेति ।

विषयः । ब्रह्मप्रणीतखण्डखाद्यनामकस्य ज्योतिर्ग्रन्थस्य व्याख्यानम् ।

---

( ३८२ । क । ) गीतदिगम्बरम् . By वंशमणि . 10 × 1½ inches. Folia, 37. Lines, 5 on a page. Extent, 699 çlokas. Character, Maithila. Date, Saka, 1577. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमस्तस्मै ।

चिन्ताकामकलाकलापविषये भोगाय योगासनं
जातेयं जपमालिकापि करयोः शृङ्गारहारो मम ।
पार्व्वत्याः प्रथमे समागमविधावित्यस्तु वः संस्तुवन्
पञ्चेषो + + पौरुषाणि जगतामादिर्मदे पूरुषः ॥ (?)

अपिच । दृष्टोऽयं विधिरद्य तत्पिटस्हावासे मनो माकृथा
त्वं कश्चित् पुरुषोत्तमं वृणु सभामापश्य नाकौकसाम् ।
इत्थं जल्पति वाक्छलेन जलधौ देव्याः प्रियः पातु वो
लज्जानन्दभरान्मुरारिवपुषि भ्रान्ता दृगन्तावलिः ॥

अपिच । जयति जगदेकजननी विबुधगणानन्दकारिणी जयति ।
अमृतांशुमौलिमानसविलासहंसी चिरं जयति ॥
आध मौलिमण्डनफुलमाले । आध तरङ्गितसुरसरिधारे ।
आध अलिक तिलक नव इन्दु । आध सोहाओ सिन्दूरबिन्दू ।
कोमलविकटचरणहुडुचारी । अपुरुव नाच करथि तिपुरारि ।
एक देह अधपूरुषदारा । तेतिसकोटि देव देख निहारा ।
सुकवि वंशमणिए हुरस गावे । सेवि देव हर को नहि पावे ॥

नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । भोः भोः कुशीलवाः—

तुषारपर्व्वतोपत्यकानिकायकाननैकचमत्कारचन्दनद्रुमस्य सरङ्गमङ्गला-पाङ्गपङ्गरीटखेलाकश्मीरमखडपाङ्गनस्य प्रणतसुरचक्रचूडामणिमरीचि-मञ्जरीपिञ्जरितचरणनखकेशरस्य भगवतो बालशशाङ्कशेखरस्य शशाङ्क-वासरावचितौ निःशङ्कसाहसाङ्केन भूभृता समादिष्टाः स्मो यदेतस्य महामहस्य विलोकनोत्कण्ठया विविधविषयवासिनो विशारदाः शार-दानुवृत्तिवृत्तयो वर्त्तुलीकृतास्तेषामनुरञ्जने भवतावहितेन भवितव्य मिति ।

प्रविश्य नटी । को एत्थ उवाश्रो ।

सूत्र । प्रिये ! अस्ति किल भरद्वाजकुलजन्मना जनकजनपदीयेन रामचन्द्र-शर्म्मणः पुत्रेण वंशमणिकविनोपनिबद्धं गीतदिगम्बरं नाम रूपक-मिति .. .. .. .. .. .. ।

नटी । नाह को एत्थ रामचन्दो ।

सूत्र । प्रिये न जानासि यस्यैषा प्रशस्तिपङ्क्ती ।

निर्द्दोषा कोषवृन्दे नटति पटुतया नाटके साटकेऽपि

न्याये वैशेषिके वा विलसति सविशेषैव सांख्येति मुख्या ।

गद्ये पद्येऽतिहृद्ये सहृदयहृदयानन्दिनी यस्य बुद्धि-

र्जातः श्रीविल्वपक्षाभिधकुलजलधौ चन्द्रमा रामचन्द्रः ॥ इत्यादि ।

End. महा । एवमस्तु ।

Colophon. इति निष्क्रान्ताः सर्व्व ॥ सकामकामेश्वरो नाम चतुर्थोऽङ्कः । शुभमस्तु ।

शाके १५७७ आषाढकृष्णपञ्चमीबुधे ।

तुलाधिरूढे नृपतिप्रतापे
प्रभाकरे धूतसमस्तपापे ।
सुवर्णकान्ते विमले निशान्ते
रत्नाकरे विप्रगणा ममज्जुः ॥
प्रतापमल्लप्रभुकल्पितायां
जगत्त्रयेऽस्मिन्नतुला तुलायाः ।
यदुत्तनौचेषु पयोमयीव
हिरण्मयी वृत्तिरिवाविरासीत् ॥ ?

विषयः । मुदितमदेशो नाम प्रथमोऽङ्कः ।
मानिनीमानभङ्गो नाम द्वितीयोऽङ्कः ।
विरक्तविरूपाक्षो नाम तृतीयोऽङ्कः ।
सकामकामेश्वरो नाम चतुर्थोऽङ्कः ।

---

( १६०६ । क । ) दानवाक्यसमुच्चयः . By योगीश्वर . 10 × 1 inches. Folia, 28. Lines, 5 on a page. Extent, 386 çlokas. Character, Nāgara. Date, (?). Appearance, old. Prose and verse. Generally correct.

**Beginning.** ॐ नमो नारायणाय ।
पुराणागमवाक्यानि परामृश्य बुधैः सह ।
योगीश्वरेण क्रियते दानवाक्यसमुच्चयः ॥
उत्पाद्य दानसामग्री दातव्या वा सुसम्मता ।
प्रसङ्गाद् ग्रहहोमादिवाक्यमप्यत्र दर्शितम् ॥
तत्र खुरशृङ्गविवर्जितकृष्णाचर्म्म १ तथा स्वल्पकृष्णाचर्म्म २ गोमयेन लिप्तायां तु भुवि कुशानास्तीर्य्य मृगाजिनद्वयं प्राग्रीवं स्थापनीयम् । इत्यादि ।

**End.** एवमन्येष्वपि दुष्टग्रहेषु समिद्विशेषेण होमनीय(?)मिति ।

**Colophon.** इति दानवाक्यं समाप्तमिति । ८४८ । मङ्गल महाश्रीः । इति शुभमिति ।

विषयः । सम्प्रदानकाले विहितानां वाक्यावलीनामेकत्र निबन्धनम् । प्रसङ्गतो दुष्टग्रहादीनां शान्तिविधायकवाक्यानाञ्च समावेशः ॥

---

( ४६८ । ग । ) दुर्घटवृत्तिः . By पवनदेव . Revised by सर्व्वरक्षित . 14 × $1\frac{1}{2}$ inches. Folia, 97. Lines 5 on a page. Extent, 1,940 çlokas. Character, Maithila. Date, (?). Appearance, old. Prose. Generally correct.

**Beginning.** ॐ नमः शिवाभ्याम् ।
नत्वा पवनदेवेन सर्व्वज्ञं ज्ञानहेतवे ।
दृष्टदुष्टकुलाम्भोजकोषवीकाशभास्वता ॥

14

शाकमहीपतिवत्सरमाने एकनभोनवपञ्चविताने ।
दुर्घटवृत्तिरकारि सुदेवकण्ठविलसद्धारलतेव ॥
वाक्याच्छरणदेवस्य छात्रोपग्रहपीडया ।
श्रीसर्व्वरक्षितेनैषा संक्षिप्य प्रतिसंस्कृता ॥ इत्यादि ।

End. निप्रतिभ्यां स्तम्भेरिति खर्परे शरि-वा-लोपो वक्तव्य इति निरः सकारस्य विसर्ज्जनीयलोपः ।

Colophon. इति दुर्घटे मतुप् पादः ॥

विषयः । व्याकरणशास्त्रम् ।

---

( १०७८ । ग । ) देवामृतपञ्चरात्रम् ( खण्डितम् ). 8×1¼ inches. Folia, 28. Lines, 6 on a page. Extent, 441 çlokas. Character, Newārī Date, (?). Appearance, old. Verse. Incorrect.

Beginning. ॐ नमो भगवते वासुदेवाय ।
मेरुपृष्ठे सुखासीनं ब्रह्मा लोकपितामहम् ।
सनत्कुमारः श्रीमन्तं पृच्छते परमेश्वरम् ॥ (?)
सनत्कुमार उवाच ।
कोऽयं विष्णुः परो देवः सर्व्वशास्त्रेषु पठ्यते ।
किम्नु मूर्त्तिरमूर्त्तिर्वा अजातो जात एव वा ॥
.. .. .. .. .. .. .. ।
.. .. .. .. .. .. .. ॥
कथं वा स्थाप्यते विष्णुर्लोकनाथो जगद्गुरुः ।
प्रतिष्ठां तस्य देवस्य श्रोतुमिच्छामि तत्वतः ॥ इत्यादि ।

End. पद्मं पश्चिमतो न्यस्य वायव्यां तु हलं न्यसेत् ।
मुषलं चोत्तरे दद्यादीशान्यां शृङ्गि विन्यसेत् ॥

Colophon. इति देवामृते पञ्चरात्रे एकादशमः पटलः ।
(अतः परं खण्डितम् ।)

विषयः । इति देवामृते पञ्चरात्रे द्वितीयः पटलः ।
„ „ „ तृतीयः „ ।

इति देवामृते पञ्चरात्रे चतुर्थः पटलः ।

| | | | | | |
|---|---|---|---|---|---|
| ,, | ,, | ,, | पञ्चमः | ,, | । |
| ,, | ,, | ,, | षष्ठमः | ,, | । |
| ,, | ,, | ,, | सप्तमः | ,, | । |
| ,, | ,, | ,, | अष्टमः | ,, | । |
| ,, | ,, | ,, | नवमः | ,, | । |
| ,, | ,, | ,, | दशमः | ,, | । |
| ,, | ,, | ,, | एकादशमः | ,, | । |

---

( ११८६ । ) नरपतिजयचर्य्याटीका. ( स्वरोदयदीपिकानाम्नी । ) By जगज्ज्योतिर्मल्ल. 15 × $1\frac{1}{2}$ inches. Folia, 202. Lines, 5 on a page. Extent, 4,798 çlokas. Character, Maithila. Date, Saka. 1536. Appearance, fresh. Prose. Generally correct.

**Beginning.** ॐ नमोऽस्तु हरिहरजगदम्बाचरणेभ्यः ।

हरफणिमणिबिम्बे वीक्ष्य बिम्बं स्वकीयं
झटिति परपुरन्ध्रीसङ्गमं शङ्कमाना ।
किमिति किमिति केयं केयमित्युग्रवाणी
हरतु दुरितजातं मामकं श्रीभवानी ॥

यत्र स्वरोदयपयोनिधिपारयाने ब्रह्मा हरो हरिरपि....खिन्नः ।
मोहेन तत्र यदहं शिशुरुद्यतोऽस्मि नूनं तदत्र चरणौ शरणौ भवान्याः ॥

आसीद् विश्वविशोभिनिर्म्मलयशोराशौ रघोरन्वये
विख्यातो जययत्तमल्लनृपतिर्दीतावदाताशयः ।
यो राज्यं मिथिलां विजित्य मगधं गत्वा गयां पौरुषाद्
यो नेपालमकण्टकं व्यरचयज्जित्वा नृपान् पार्व्वतान् ॥
प्राच्यां यो वङ्गदेशं तदनु सुरनदीं दक्षिणे दिग्विभागे
विख्यातः पश्चिमायां प्रबलसदसिना गोरखापालपातः ।
भूमिं सप्ताहगम्यामपि धनददिशो योऽवधीकृत्य भुक्त्वा
रेमे दोर्दण्डशौण्डः प्रखरतरलसत्काण्डकोदण्डपाणिः ॥

पुत्रास्त्रयस्तस्य नृपस्य जाता दाक्षिण्यदानादिगुणावदाताः ।
ज्यायानभूत् तेषु वलत्प्रतापः श्रीरायमल्लः स्फुरदुग्रचापः ॥
वाग्वत्याः परसरितस्तु पूर्व्वभागे श्रीभक्ताभिधवरपत्तनाभिरामे ।
येन श्रीनयविनयप्रदानसारस्तुल्यत्वात् पितु – – – हि राज्यभारः ॥

ततः समजनि स्फुरत्तरभुजोष्मदर्पानलो
दयाविनयदानवान् भुवनमल्लनामा नृपः ।
– – – – – –
परिपालयन् प्रमुदिताः प्रकामं प्रजाः ॥

श्रीप्राणमल्लो नृपतिस्ततोऽभुदखण्डदोर्मण्डलबाणवर्षः ।
श्रौदार्य्यगाम्भीर्य्यदशाङ्गराज्यपयोधिवृद्धौ सकलः सुधांशुः ॥
श्रीविप्रमल्लो नृपतिस्ततोऽभुदभूतपूर्व्वप्रवलप्रतापः ।
यः पूर्णचन्द्रो जनतानुरागे त्यागे हरिश्चन्द्र इवापरो यः ॥

तस्मात्त्रैलोक्यमल्लः समजनि रजनीजानिजेता यशोभिः
साहित्यन्यायशास्त्रागमवरकवितारण्यसञ्चारसिंहः ।
दाता भोक्तावदाताशयगतिरनघश्चण्डिकायाद्सेवा-
षण्डीभूताधिजातः शिवचरणसरोजन्मचिन्ताद्विरेफः ॥
तत्पुत्रो दानकर्णो जयति जयजगज्ज्योतिमल्लो नरेन्द्रो
ज्योतिःसाहित्यशास्त्रस्मृतिविविधकलाम्भोधिपारङ्गमज्ञः ।
नारीणामप्यरीणां सपदि मुखविधुं यस्य दृष्ट्वातिकष्टाद्
वैवर्ण्य– – मूर्च्छाप्रभृतिबहुविधा हन्त भावा भवन्ति ॥

.. .. .. .. .. .. .. ..

याचते पुत्रपौत्रादीन् भाविनो भूमिपालकान् ।
एष निःशेषलोकानामानन्दजनको नृपः ॥
स्वरोदयाख्यं सगुणं पुस्तकं व्यस्तदूषणम् ।
धर्म्मार्थकाममोक्षाणां साधनं क्रूरसाधनम् ॥
नेपालेऽस्मिन् दुर्लभं य– – सौ– – दृष्टं नैव चाकर्णितं वा ।
अध्येतव्यं सर्व्वथा चिन्तनीयं पुत्रप्रीत्या पालनीयं भवद्भिः ॥

.. .. .. .. .. .. .. ..

आश्विनशुक्लदशम्यां शाके षड्दहनबाणविधुकलिते ।
शतदशदण्डकसमये देयमुदाहरणमस्माभिः ॥

प्रारिप्सितग्रन्थविघ्नविघाताय कृतं देवतानमस्काररूपं मङ्गलं शिष्य-
शिक्षार्थं ग्रन्थकृदादौ निबध्नाति स्पष्टमिति । इत्यादि ।

**End.** ग्रहमयं ग्रहाधीनमतोऽशुभं न भवतीत्यर्थः ।

**Colophon.** इति श्रीशिवचरणारविन्दमकरन्दमैरन्दसदानन्दितविबुधवृन्दसमस्त-
प्रक्रियाविराजमानमहाराजाधिराजश्रीश्रीमज्जगज्ज्योतिर्मल्लविरचिता
श्रीस्वरोदयदीपिका समाप्ता ।

.. .. .. .. .. .. .. .. ।

.. .. .. .. .. .. .. .. ॥

शुभमस्तु श्रीरस्तु शाके १५३६ लसं ४९४ . . . . श्रीजगज्ज्योतिर्मल्ल-
निदेशमासाद्य श्रीवंशमणिशर्म्मा व्यलेखीदिदं पुस्तकम् ।

---

( १६४८ । च ) नागरकसर्व्वस्वम् . 8 × ½ inches. Folia, 39. Lines, 5 on a page. Extent, 487 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमो मकरध्वजाय ।

सकृत्तमपि यं स्मरन्नभिमतां मनोहारिणीं
लभेत मदविह्वलां लड्डकामिनीं कामुकः । (?)
समुल्लसितडम्बरं सुरुचिराङ्गरागारुणं
नमामि सुमनःशरं सततमार्य्यमञ्जुश्रियम् ॥
केचिद् भाषान्तरकृततया कामशास्त्रप्रबन्धा
दुर्विज्ञेया गुरुतरतया केचिदल्पार्थकाश्च ।
तत्पद्मश्रीविरचितमिदं सर्व्वसारं सुबोधं
शास्त्रं शीघ्रं शृणुत सुधियोऽभीष्टसर्व्वार्थकामाः ॥
नानाविचित्रैः सुरतोपचारैः क्रीडासुखं जन्मफलं नराणाम् ।
किं सौरभेयीशतमध्यवर्त्ती वृषोऽपि सम्भोगसुखं न भुंक्ते ॥

छित्त्वास्मकामं शमयेद् वशी यो
नितम्बिनीनां मदनज्वरार्त्तिम् ।
कृपान्वितो मन्मथशास्त्रवेदी
समाप्नुयात् स्वर्गसुखं सुधीरः ॥ तथाचाह महेश्वरः ।
कामन्त्यक्त्वात्मनः कामां कामव्याधिनिपीड़िताम् ।
चिकित्सयति यो नित्यं पदं प्राप्नोति कामिकम् ॥
ज्ञानेऽस्य शास्त्रस्य धनाशयानां तिष्ठन्तु तावद्धनधान्यलाभाः ।
सुतार्थिनां नापि सुता दुरापाः श्रद्धावतां साधयतां प्रयत्नात् ॥ इत्यादि ।

End. द्वितयविधविधानं देवतामन्त्रपूजा
दयितयुवतिशिक्षा सत्प्रतिग्राहकाणाम् ।
प्रथममुदितमस्मिन् वीक्ष्य सिद्धैकवीर-
मपरमतिरहस्यं शाङ्करं कामतन्त्रम् ॥
आसीद् ब्रह्मकुले कलाग्रनिलयो यो वासुदेवः कृती
तस्य स्नेहवशाच्चिरं प्रतिमुहुः संप्रेरणात् साम्प्रतम् ।
दीप्तेयं रतिशास्त्रदीपकलिका पद्मश्रियो धीमतो-
ऽद्यार्थान् प्रकटीकरोतु जगतां संहृत्य हार्द्दं तमः ॥
राजा धर्म्मरतोऽस्तु निर्जितरिपुः षड्वर्गवश्यो वशी
निःक्लेशाः कृतिनो भवन्तु मुदिताः सत्कारलाभान्विताः ।
अन्योन्यप्रियताप्रसन्नमनसः सर्व्वत्र सन्तु प्रजा
नित्यं तिष्ठतु सर्व्वसत्वनिचयैः संपूरिता मेदिनी ॥

Colophon. इति पण्डितपद्मश्रीज्ञानविरचिते नागरकसर्व्वस्वे सुतोदयो नामाष्टमः
परिच्छेदः समाप्तः । इति नागरकसर्व्वस्वं परिसमाप्तम् ॥
यथा दृष्टं तथा लिखितं लेखको दोष न क्रियते ।
यदि शुद्धम्वा मशुद्धम्वा स दोषो न जायते ॥ (?)

विषयः । इति पण्डितपद्मज्ञानविरचिते नागरकसर्व्वस्वे त्रिवर्गनिर्णयो नाम
प्रथमः परिच्छेदः ।
द्वितीयः परिच्छेदः ।
रत्नपरीक्षा तृतीयः ।

गन्धाधिकारश्चतुर्थः परिच्छेदः ।

सङ्केतकथनं पञ्चमः ।

षष्ठः परिच्छेदः ।

द्वारनिर्देशो नाम सप्तमः परिच्छेदः ।

इति रतिविवेको नामाष्टमः ।

स्वदाररक्षणो नाम नवमः परिच्छेदः ।

बालादिपथ्याक्रमलालनो नाम दशमः परिच्छेदः ।

इति मदनोदयो नामैकादशः परिच्छेदः ।

नाडीसंक्षोभणभावनाभक्त्योपदेशो नाम द्वादशः परिच्छेदः ।

इति मदनाडीस्वभावाख्यो नाम त्रयोदशः परिच्छेदः ।

विषयविभागो नाम चतुर्दशः परिच्छेदः ।

इत्यालिङ्गनानि दश ।

दशनपदान्यष्ट ।

इत्युत्थानस्थितकरणानि चतुर्विंशतिः ।

इत्यासीनकरणे द्वे ।

इत्यधोमुखकरणे ।

उत्थितकरणानि सप्त ।

वामाचरितप्रकाशो नाम सप्तदशः परिच्छेदः ।

इति अष्टमः ( अष्टादशः ) परिच्छेदः ।

---

(१३२० । क ।) नित्याह्निकतिलकम् . $8 \times 1\frac{1}{4}$ inches. Folia, 78. Lines, 5 on a page. Extent, 1,072 çlokas. Character, Newārī. Date, (?). Appearance, old. Verse. Incorrect.

**Beginning.** ॐ नमः परशम्भवे ।

शशधरसदृशसरोजे अल्पकदेवाक्षपानके चरणौ ।

शितरजभास्वररश्मिलौ शम्भोर्नित्यं पान्तु जनान् ॥

यस्य प्रसारमण्डलमाब्रह्मस्तम्भभुवनपरान्तगम् । (?)

स श्रीनाथकुलेशः श्रीकुब्जिकाधिदेवो जयति ॥

कुकारः पार्थिवो बीजो अक्षिकोपरिसंस्थितः ।
का काली शिवगा वक्रा सा श्रीकुब्जिका जयति ॥
सृष्टा यया पराविद्य हंसवर्त्तिद्वीपसत्तजा ।
सा जनेशी कली काली संस्थिता पश्चिमे पथे ॥
वेदात् परमं शैवं शैवाद्दक्षिणमुत्तमम् ।
दक्षिणात् पश्चिमं श्रेष्ठं अतः परतरं नहि ॥
विज्ञाय श्रीकुब्जिकायाः श्रीकुजेश्वरसहितायाः ।
नृणां सर्गोपिद्वैत्वर्थं नित्याह्निकमिहोच्यते ॥
ज्ञानार्णवमगाधोऽयं श्रीशम्भुशासनो महान् ।
तत्पारं परं गच्छन् वीची श्रीकण्ठसंज्ञकः ॥
तच्चरणैर्यथादृष्टं श्रीमत्पश्चिमशासने ।
पारम्पर्य्यक्रमायातं सुगोप्यमनुलिख्यते ॥
स्वगोत्राणां हितार्थाय श्रीमच्छ्रीकण्ठसूनुना ।
सुश्लकेन कियद् गूढं सोपदेशं जये ननु ॥
आधाराविसुसूक्ष्मान्तं परान्तं परनिर्णयम् ।
कथितं येन सुस्पष्टं तं श्रीकण्ठगुरुं नमे ॥

श्रीभैरव उवाच ।

अथातः संप्रवक्ष्यामि आश्रमाणां स्थितिं प्रिये ।
येनासौ वर्त्तितो योगी भेलकं त्रिविधं लभेत् ॥ इत्यादि ।

End. पश्चिमान्वयसारोऽयं अनुष्ठानतिलकं परम् ।
नित्याह्निकं स्वगोत्राणामोलितयमुदीरितम् ॥ ?
गुरुचरणरेणुना जयेन परमार्थिनाम् ।
संगृहीतं परामृतं श्रीमच्छ्रीकण्ठसूनुना ॥
लिखितयजनशम्भोः सर्व्वमाएह्य दिव्ये
सुखविषयनिधानः सर्गमोक्षैकहेतुः ।
परतरपरमाया सर्व्वकायान्तवीरा
जय जय परयागः सर्व्वयागाधिराजः ॥ (?)

**Colophon.** इति श्रीमत्पश्चिमशासनीयनित्याह्निकतिलकं समाप्तम् । श्रीमद्विजयकामदेवस्य राज्ये संवत् ३१७ वैशाख पौर्णमास्यां आचार्यश्रीहरिहरस्य नित्याह्निकतिलकं निष्पन्नमिति शुभम् । श्रीनाथाय नमः ।

**विषयः ।** इति सोत्तरीययज्ञोपवीतलक्षणम् । पञ्चप्रणवोद्धारः । चतुर्विधन्यासः । कूटाक्षर्णध्यानम् । समयामन्त्रोद्धारः । सन्ध्यावन्दनविधिः । शान्तिवलिः । मन्त्रपीठार्चनम् । शक्तिध्यानम् । पिण्डोद्धारः । महावलिः । इत्यादि ।

---

(१०७६ । क ।) न्यायरत्नाकरः or नयरत्नाकरः. (एकादशाध्यायमात्रम् ।)

By श्रीचन्द्र. 10×1 inches. Folia, 52. Lines, 6 on a page. Extent, 1,148 çlokas. Character, Maithila. Date, Lakṣmaṇa Era, 264. Appearance, old. Prose. Generally correct.

**Beginning.** ॐ नमो नारायणाय ।

अत्रावान्तरकार्य्यतन्त्रतैवाध्याया इति श्रीकरः । तथाहि कार्य्यार्थमनुष्ठानमतः कार्य्यतन्त्रत्वादेव तत्तन्त्रता नान्यथा । तथाकरणस्य प्रधानादेरशादेश्चाभेदात् कार्य्यस्याङ्गापूर्व्वस्य तन्त्रत्वं सुज्ञानं । इत्यादि ।

**End.** तथा वाजपेये क्रतुपशवः प्राजापत्याश्च तत्र + + + + क्रतुपशूनां तथा + + + + सौम्येन व्यवयात् पूर्व्वस्य कृष्णाग्रारस्य पुरोनुवाक्या + + + वेति शेषं भाष्यादावनुसन्धेयमिति ॥

**Colophon.** इति महामहोपाध्यायश्रीचन्द्रकृतौ न्यायरत्नाकरे एकादशोऽध्यायः सम्पूर्णः ॥ लसं २६४ कल्हौ ग्रामे महामहोपाध्यायश्रीरत्नाकरात्मजेन पठता श्रीहरिकरेण लिखितमिदं पुस्तकम् ।

यथा यथा निरूपय जगत् तथा तथा वृथा ।
मुरारिपादपूजनं परं स्थिरं विभावय ॥
यदक्षरं ब्रह्म यशश्वरः पुमान्
गुणोर्म्मिसृष्टिस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः
स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥
गरीयोभिर्विद्वत्परिषदि सदोद्गीतमहिमा
महोपाध्यायश्रीमान् गुणरतिरभूद् यस्य जनकः ।

15

अथो चन्द्रः श्रीमानकृत नयरत्नाकरमिमं
निबन्धं पोमालीकुलकलमकेदारमिहिरः ॥ शुभम् ।

विषयः । मीमांसाशास्त्रम् ।

---

(३८९ । घ ।) पदसूर्य्यप्रक्रिया. By उत्सवकीर्त्ति. $10 \times 1\frac{1}{2}$ inches. Folia, 40. Lines, 5 on a page. Extent, 606 çlokas. Character, Newārī. Date, (?). Appearance, old. Prose. Incorrect.

**Beginning.** ॐ सिद्धिः । ॐ नमः श्रीमहागणपतये ।
वाचा चन्द्रसमुद्भूतो मनःक्षीरार्णवाश्रुगात् ।
व्यापकोऽनेकशक्तीनां षोड़शात्मैव धातुवान् ॥ (?)
सत्तादिर्धातुहेतुस्तरणिष्टणिष्टे चाव्ययो लिङ्गसंज्ञा
व्याकृष्टिचोद्भवादिः कृदकृतकथनो यो नवात्माष्टमूर्त्तिः ।
संख्याकालोपसर्गाद्यवयवसगुणाः शास्त्रसर्गं च सर्गा
रुद्रोपेन्द्रप्रजेशः प्रकृतिपरयुतो धातवेऽस्मै प्रणौमि ॥
सर्व्वधर्म्मगुणादीनां मतमादाय भास्वरम् ।
पदसूर्य्यो मयोद्योतो लिख्यते ध्वान्तशान्तये ॥
बालानां तिमिरबुद्धीनां स्वस्वान्ते सन्तामपि च । (?)
समक्षं गुणिनः सर्व्वे सर्व्वशास्त्रार्थवेदिनः ॥ युग्मकम् ।
क्रियाकारकसम्बन्धो विना वाक्येन दुर्घटः ।
विभक्तिद्वययोगेन यत्र बोधमदुर्घटम् ॥
उदेति पदसूऽर्य्योयं स्वान्तध्वान्तस्य नाशकः ।
तमोहीनेन चित्तेन दृश्यते निर्म्मलं पदम् ॥
इह विभक्तौ – द्वयौ स्यादित्यादि ।
– – – – – – – अम् औ अस् द्वितीया ॥ इत्यादि ।

**End.** जीर्य्यतेरतृन् । अतृन् भवति । जरन्त इति स्थितिः । स्त्रीपुंनपुंसके ।
जरन् । जरती । जरत् ॥ एवं शठ – – समाप्ताविति ।

**Colophon.** इति श्री – सरङ्ग-उपाध्यायोत्सवकीर्त्तिकृतौ पदसूर्य्यप्रक्रियायां वर्त्तमान-
विभक्तिविरचित नाम प्रथमः ॥ (अतः खण्डिता ।)

विषयः । व्याकरणशास्त्रम् ।

---

(९८४ । ख ।) पाण्डवविजयनाटकम् . By जयरणमल्लदेव . 10×1 inches. Folia, 44. Lines, 5 on a page. Extent, 660 çlokas. Character, Newāri. Date, (?). Appearance, old. Prose and verse. Generally correct.

**Beginning.** ॐ नमो नाट्येश्वराय ।

हस्तेन्यस्ताम्बुजस्योदरजननसुरस्योत्तमाङ्गप्रधानं
मुण्डावद्धालिमालामचलगतितमां राजतां कन्धरेऽस्मिन् ।
यं चात्मीयोत्तमाङ्गं श्रवसि फणिपतेः कं सहस्रं धृतं तद्-
भीमाख्योऽसौ कपाली त्रिजगति विदितः पातु वो नृत्यनाथः ॥ (?)

... ... ... ... ... ... ...

ततः प्रविशति-सूत्रधारः । अये समुदेति भगवान् सूर्य्यः ... ... ...
परिक्रम्य । यदहमादिष्टोऽस्मि निखिलसामन्तचक्रचूडामणि ... ... ...
चरणकमलेन सकलगान्धर्व्वविद्यागुणरत्नाकरेण ... ... ... ... ...
श्रीमता जयरणमल्लदेवभूपालेन । य एषः ... ... ... ...

नायल्लदेवीरमणो भुवनप्रसिद्धः
कीर्तिप्रभाधवलिताखिलदिग्विभागः ।
प्रत्यर्थिवीरकुमुदाकरचण्डरोचिः
संराजते विजयमल्लकुमारकोऽयम् ॥

.. .. .. .. .. .. .. .. ..

सूत्र । प्रिये अस्त्येतत् श्रूयतां । श्रीमता श्रीश्रीजयरणमल्लदेवेन राज्ञा स्वयं निर्म्माय गीतवाद्य – – – – – भिनयनवनाट्यरस – – समस्त नाटकलक्षणालङ्काराणि रचनाचमत्काररमणीयं पाण्डवविजयं नाम नाटकं नाटयितव्यम् । इत्यादि ।

**End.** प्रविश्य दुर्य्योधनः । अहो वृकोदरस्य प्रगल्भता । पश्य रे पश्य —

एषोऽयं रिपुकाननान्तकमहाकल्पान्तदावानलः
क्रुद्धः सङ्गरसिंहविक्रम – – स्त्रैलोक्यरक्षाक्षमः ।
एषा शस्त्रगदावचालनभुजो दुर्य्योधनोऽसौ वली
त्वां हन्तुं समुपागतोऽयमधुना जागर्षि – – – – ॥

(अतः परं खण्डितम् ।)

विषयः। युधिष्ठिरस्य राजसूययज्ञारम्भात् परतरघटनामवलम्ब्यारब्धोऽयं ग्रन्थः। असमाप्तत्वादङ्कानामनिर्देशाच्च कियन्तमवधिं यावदिति प्रकाशनं दुष्करम्। नूनं सभापर्व्वविवृतं विषयमवलम्ब्य कृतोऽयं ग्रन्थ इतित्वस्य "सभापर्व्वनाटक"मिति नामान्तरञ्च दृष्टं प्रमापयतीत्यलम्।

---

(१२६१। क।) प्रतिष्ठातन्त्रम्. 8×1 inches. Folia, 37. Lines, 7 on a page. Extent, 777 çlokas. Character, Newārī. Date, (?). Appearance, very old. Verse. Generally correct.

**Beginning.** ॐ नमः शिवाय।

ईश्वर उवाच।

+ + + + + + कृत्वा सुनिश्चलं।

लिङ्गं मूले ततः सम्यस्वेशाच्छाद्य सर्व्वतः॥

रक्तां कृत्वा ततस्तस्मिन् ज्योतिर्ज्ञानविशारदं।

ततः सुसंस्पृशेद् विद्वान् दै + + + + + + रात्॥ इत्यादि॥

**End.** निश्वासाख्ये (?) महातन्त्रे बीजभेदे महाभये।

प्रतिष्ठातन्त्रमाख्यातं समाप्तं शास्त्रमुत्तमम्॥

**Colophon.** (नास्ति।)

विषयः। इति स्थाप्यमाने लिङ्गगुणे दोषपटलम्।

इति दिक + न्त पटलम्।

इति पिण्डिकौस्थापन(?) पटलम्।

इति देव्यामते प्रतिष्ठातन्त्रे प्रतिष्ठापटलम्।

इति प्रतिष्ठाकाले कर्म्मपटलं परिसमाप्तम्।

इति चण्डयागपटलम्।

इति प्रतिष्ठातन्त्रे गुरुपूजापटलम्।

इति मुखलिङ्गलक्षणपटलम्।

इति देव्यामते प्रतिष्ठापद्धतिः।

इति गद्य (?) वास्तुपटलम्।

---

( १६३३ । ८ । ) प्रपञ्चसारतन्त्रम् . 12 × 1½ inches. Folia, 124. Lines, 6 on a page. Extent, 3,100 çlokas. Character, Bengali. Date, Laksmana Era, 408. Appearance, old. Verse. Generally correct.

**Beginning.** ॐ श्रीमहागणेशाय नमः ।

अकचटतपयाद्यैः सप्तभिर्वर्णवर्गै

र्विरचितमुखबाहुपादमध्याख्यहृत्का ।

सकलजगदधीशा शाश्वता विश्वयोनि

र्वितरतु परिशुद्धिं चेतसः शारदा वः ॥

[illegible] ।

[illegible] ॥

[illegible] ।

वक्तारमजमव्यक्तमरूपं मायिनं विभुम् ॥

[illegible] ।

मरुत्संघट्टनोत्कीर्णलहरीकणशीतले ॥

उद्यदादित्यकिरणप्रशान्तशिशिरोदये ।

[illegible] ॥

अनन्तभोगे विमले फणायुतविराजिते ।

शयितं शार्ङ्गिणं शौरिशर्व्वपद्मभुवस्तदा ॥

तुष्टुवुर्हृष्टमनसा विष्टरश्रवसं विभुम् ।

सूक्तिभिः स्तुतिभिः प्रीतः स्वमूर्त्तिं स व्यदर्शयत् ॥

[illegible] ।

अष्टमीचन्द्र — — — ललाटामायतभ्रुवम् ॥

———————————— ।

———————————— ॥

तां दृष्ट्वा तरलात्मनो विधाधोक्षजशङ्कराः ।

अतिष्ठन्नितिकर्त्तव्यमूढास्तत्राब्रवीद् वचः ॥

[illegible] ।

किं मूलाः किं क्रियाः सर्व्वमस्मभ्यं वक्तुमर्हसि ॥

इति पृष्टः परं ज्योतिरुवाच प्रमिताक्षरम् ।
यूयमक्षरसम्भूताः सृष्टिस्थित्यन्तहेतवः ॥ इत्यादि ।

**End.** इत्थं मूलप्रकृत्यक्षर – – – – – – जातप्रवृत्त-
त्तेत्राद्याबद्धभूतेन्द्रियगुणरविचन्द्राग्निसंप्रोतरूपैः ।
मन्त्रैस्तद्देवताभिर्मुनिभिरपि जपध्यानहोमार्चनाभि-
स्तन्त्रेऽस्मिन् यन्त्रभेदैरपि क्रमल – – दर्शितोऽयं प्रपञ्चः ॥
यदाश्रयध्वं प्रकृतिप्रभावतो विभिन्नतारां समा + तौजसः । (?)
जगन्ति पुष्णन्ति रवीन्दुवह्नयो नमोऽस्तु तस्मै परिपूर्णतेजसे ॥

**Colophon.** इति श्रीप्रपञ्चसारे त्रयस्त्रिंशतिः पटलः सम्पूर्णः ।
इति श्रीप्रपञ्चसारः समाप्तः ॥ – – – –
लसं ४०८ कार्त्तिक शुक्ल – – – – – ॥

---

(१०७७ । ड ।) प्रबोधचन्द्रोदयटीका. By रुचि. 12 x 1 inches. Folia, 113. Lines, 5 on a page. Extent, 1,695 çlokas. Character, Bengali. Date, (?). Appearance, old. Prose. Generally correct.

**Beginning.** तत्रादौ तावत् सर्व्वविद्याविदग्धः सकलशास्त्रविशारदः सकलवेद-वेदान्ततत्वज्ञः सकलभाषाचतुरः सकलरसविशेषज्ञः संसारसुखविमुखो मुमुक्षुर्महाकारुणिकः कृष्णमिश्रः स्वविज्ञतां प्रकाशयन् सकलविद्या-स्वरूपं निरूपयन् दुःखमयसंसारसागरनिमग्नसकललोकमुज्जीहिर्षन् नाटककौतुकव्याजेन शृङ्गारादिरसोपदर्शनेन रभसमुत्पादयन् सकल-लोकान् प्रत्यक्षीकृत्य वेदान्तसिद्धान्तं बोधयितुं शान्तरसप्रधानं प्रबोध-चन्द्रोदयाभिधानं नाटकमारभमाणो नान्दीश्लोकमवतारयति मध्याह्ना-र्केत्यादि । इत्यादि ।

**End.** इयमेव च जीवन्मुक्तिः कथ्यते सोऽयमानन्दः । आनन्दो वाञ्छितप्राप्ति-रितिदशरूपकोक्तः ॥ कृतिमाह सर्व्वथेति लब्धार्थशंसनरूपत्वात् ।
श्रीचन्द्रसिंहस्य नृपस्य वाक्यैः
प्रबोधचन्द्रोदयनाटकस्य ।
ग्रन्थाननेकानुपजीव्य यत्ने-
नोट्टीकृतेयं रुचिनात्मबुद्ध्या ॥

नमस्कारााञ्जलिं मौलौ निधायाभ्यर्थये सतः ।
मनागालोचनेनायं सफलः क्रियतां श्रमः ॥
सन्दृश्यते सज्जनदृष्टिपूतं सर्व्वं भवेल्लोकपरिग्रहाय ।
टीका तदेषा मदनुग्रहेण सद्भिर्मनागप्यवलोकनीया ॥

विषयः । प्रबोधचन्द्रोदयनामकस्य नाटकस्य व्याख्यानम् ।

---

(१०७८ । ख ।) भैरवानन्दनाटकम्. By मणिक. 6 x 1 inches. Folia, 98. Lines, 4 on a page. Extent, 637 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** ॐ नमो नाटेश्वराय ।

त्रिपुरदनुजं हत्वा नृत्यन्महेश्वरनायके
प्रवरमुनिभिर्देवैर्हृष्यन्मनोभिरभीक्षिते ।
नयनगुरुणा (?) नाम्नी याभून्महोत्सवकारिणी
भवतु सततं सेयं सिद्धिर्ममापि च सद्गती ॥

.. .. .. .. .. ..

.. .. .. .. .. ..

अलमतिपल्लवितेन । यदहमादिष्टोऽस्मि भगवत्पशुपतिचरणकमल- ... ... ... निरन्तरेण ... ... ... रघुवंशचक्रचूडामणिना राजल्ल-देवीरमणेन श्रीमता श्रीजयस्थितिराजमल्लदेवेन । य एषः

चण्डक्षितिपालमण्डनमणिः सन्मन्त्रचूडामणिः
सर्व्वज्ञानमणिः स्वधर्म्मसरणिः सूर्य्यान्वयग्रामणीः ।
विश्वप्राणमणिर्विशेषविदुषां सम्मानपूजामणिः
श्रीमांच्छ्रीस्थितिराजमल्लनृपतिः सर्व्वार्थिचिन्तामणिः ॥

अग्रतोऽवलोक्य । अये विविधगुणिगणालङ्कृतस्यैव नेपालेश्वरस्याति-मनोहरा परिषदियं । .. .. .. .. .. तत् किमिदानीमतिविलम्ब्यते गृहिण्या ।

प्रविश्य नटी । अज्जउत्त इअह्मि ।

सूत्र । प्रिये इदमादिष्टोऽस्मि यदद्यास्मौ सूनोः कुमारश्रीजयधर्म्ममल्लदेवस्य .. .. .. विवाहमहोत्सवदर्शनोत्सुकानां .. .. .. समाज्ञः ।

श्रीनाटेश्वरवरलब्धनाट्यवेदविशारदस्य राजवर्द्धनस्य सूनोः श्रीगुरुचरण-मुद्राङ्कितमस्तकस्य मणिकनामधेयस्य कवेः कृतिभैरवानन्दनाटकदर्शना-काङ्क्षा वर्त्तते । तत् त्वया भरतपुत्रकुशीलवैः सह सङ्गीतमनुसृत्य यथावत्प्रयोगेन नाटयितव्यमिति । इत्यादि ।

**End.** खण्डितम् ।

विषयः । मदनावतीनाम्नीं कामपि सुरसुन्दरीमृषिशापान्मानवीभूतां भूतलागतां सखीद्वितीयां मनोहारिणीमवलोक्य भैरवनामकस्य नायकस्यातितरामुत्कण्ठा । ततस्तया सह मेलनाद् भैरवस्य महानानन्दश्चेत्यस्य संक्षेपतो वृत्तान्तः ।

---

(२२६ । घ ।) (१६४८ । ज ।) भोजदेवसङ्ग्रहः. 10×1 inches. Folia, 30. Lines, 5 on a page. Extent, 600 çlokas. Character, Newārī. Appearance, old. Prose and verse. Generally correct.

**Beginning.** ॐ नमः सर्व्वज्ञाय ।

सर्व्वज्ञमदयमनादिमनन्तमीशं मूर्द्धाभिवन्द्य वचनैर्विविधैर्मुनीनाम् ।
श्राव्यप्रबोधमुदयज्ञमुदानिदानं(?) दामोदरो व्यरचयद् गुणिनः क्षमध्वम् ॥
करवदरसदृशमखिलं लिखितमिव तौ निषिक्तमिव हृदये ।
सचराचरं त्रिभुवनं यस्य स जीयाद् वराहमिहिरमुनिः ॥
स्वस्याभिधेयविपुलाभिधानबहुसङ्ग्रहैरजातमुदः ।
लघुमलघुवाच्यसङ्ग्रहमवदधतु सुपद्यगद्यमिमम् ॥

श्रीभोजदेवनृपसङ्ग्रहसर्व्वसारं
सारञ्च सङ्ग्रहगणस्य वराहसाम्यात् ।
योगीश्वरादिबुधसाधुमतं गृहीत्वा
ग्रन्थो यथागमकृतो न विकल्पनीयः ॥
वक्ष्यामि भूपमधिकृत्य गुणोपपन्नं
विख्यातजन्मसमयं प्रविभक्तभाग्यम् ।
अज्ञातसूतिमथवा विदितेऽस्य भाग्यं
सामुद्रयात्रिकनिमित्तशतैः पृथक्कैः ॥ इत्यादि ।

**End.** शाके सम्वत् १२८७ फाल्गुनशुक्लद्वितीयायां रेवतीनक्षत्रे शुक्रदिने शुभलग्ने लिखितमिदं पुस्तकं राज्ये श्रीश्रीजयार्जुनदेवस्य यथादृष्टं तथालिखितं उदकानलमित्यादि रक्षितव्यं ।
प्रागल्भ्यहीनस्य नरस्य विद्याः
शस्त्रा गता कापुरुषस्य हस्ते ।
अन्धस्य किं हस्तगते स्थितोऽपि
निर्वर्तयन्ते त्वमिह प्रदीपः ॥ (?)

---

(१३६३ । त ।) मञ्जुश्रीसाधनम् . 10 × 1 inches. Folia, 6. Lines, 6 on a page. Extent, 126 çlokas. Character, Newārī. Date (?). Appearance, old. Verse. Incorrect.

**Beginning.** ॐ नमः सर्व्वज्ञाय । विश्वकर्म्मणे नमः ।
जगतां सृष्टिकर्त्तारं स्थितिसंहारकारकम् ।
वरदाभयपीताङ्कीपुस्तकान्तचतुर्भुजा ॥ (?)
गृहादिसर्व्ववस्तूनां लक्षणानि प्रवक्ष्यते ।
शुभाशुभविधिज्ञेया लोकानां हितकाम्यया ॥ (?)
यथाशोभा तथार्थत्वा लाचेव वर्त्तलक्षणम् ।
शिल्पिकेन तथा कृत्वा गृहादिसर्व्ववस्तु ॥ ? इत्यादि ।

**End.** ज्येष्ठाङ्गुली भिक्षुवरद्विजानां
मध्याङ्गुली भूपतिविड्जनानाम् ।
कनीयसी शूद्रजनान्त्यजात्य
कार्य्येषु योज्या गुरुसंप्रदायैः ॥ (?)

**Colophon.** इति मञ्जुश्रीसाधने प्रतिमालक्षणं समाप्तम् ।
इति सम्पूर्णं श्रीमत्-नेपालसंवत्सरे ।
नेपालाब्दगते + + + + + + + ।
+ + + + + + एकादश्यां कुजे दिने ॥
लिखित + + + + महाविहारे निवासितभिक्षुश्रीधर्म्मरक्षितेन स्वार्थं – – – –

विषयः । शिल्पशास्त्रम् ।

---

16

(११२४ । ख ।) महादाननिर्णयः. By वाचस्पति. 12×1 inches. Folia, 92. Lines, 5 on a page. Extent, 1900 çlokas. Character Maithila. Date, Lakṣmaṇa Era, 392. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो नारायणाय ।

अभिनवनवनीतप्रीतमाताम्रनेत्रं विकचनलिनलक्ष्मीस्पर्द्धिसानन्दवक्त्रम् ।
हृदयभवनमध्ये योगिभिर्ध्यातनीलं नवगगनतमालश्यामलं कञ्चिदीडे ॥
आसीन्मैथिलमेदिनीशतमखः प्रत्यर्थिसीमन्तिनी-
नित्योद्गीतभुजप्रतापतपनप्रोत्तप्तसप्तार्णवः ।
चञ्चत्कीर्त्तिकुमुद्वतीपरिमलप्राग्भारिभूमण्डलो
राजा श्रोत्रियवंशभूषणमणिः श्रीमान् भवेशः कृती ॥
अस्यान्ववायममलं विमलीकरिष्यन्
कीर्त्त्या दिशो दश मुहुर्धवलीकरिष्यन् ॥
संग्रामसीमनि भटांस्त्रिदशीकरिष्य-
न्नाविर्बभूव तनयो हरसिंहदेवः ॥
खड्गोल्लीलालेशप्रतिविजितवैरिक्षितिपति-
प्रियाभिर्निस्तन्त्रं कृतचरणसेवाविधिरतः ।
कृतक्रीडो नित्यं समिति नरसिंहो नरपति-
र्यशश्चन्द्रोद्योतैरजनि रजनीजानिविजयी ॥
विरोधिवरवर्णिनीनयनवारिकल्लोलिनी-
विलुप्तघनजाङ्गलं जगदनूपमेवाभवत् ।
यदीयसमरोद्यमे विकसति स्फुरद्विक्रमे
ततो गुणमहान्तराऽजनि भैरवेन्द्रो नृपः ॥
अयं वाग्विलासानतीतः कवीनां गुणैर्दोःप्रतापानतीतो भटानाम् ।
त्रिलोकीपतिप्रेयसीवासभूमिः पुनीते जगन्मण्डलं भैरवेन्द्रः ॥
विधाय सरसीः शतं नगरपत्तनादीनदात्
विजित्य रिपुभूपतीनदित यस्तुलापूरुषान् ।
स एष नृपभैरवः समरसीम्नि पञ्चाननो
जयत्यविधिदारको जगति राजवृन्दारकः ॥

श्रीवाचस्पतिधीरं सहकारितया समासाद्य ।
श्रीभैरवेन्द्रनृपतिः स्वयं महादाननिर्णयं तन्यते ॥
अथ महादानानि । इत्यादि ।

**End.** अत्र षोड़षमहादानानामनेकाधिकारिकत्वादेकमहृत्त्यनुपपत्तेर्नैकप्रयोग-
साध्यत्वमतोऽपुनरावृत्तेर्मिलितमहादानषोड़शसाध्यत्वाभावेनास्य तारक-
मात्रत्वमिति द्रष्टव्यम् ।
श्रीरूपनारायणभूमिपालकृतो महादानविनिर्णयोऽयम् ।
यशःप्रसूनाञ्चितदिक्पतीनामाकल्पमाकल्पतु भूपतीनाम् ॥

**Colophon.** इति महामहोपाध्यायमिश्रवाचस्पतिविरचितो महादाननिर्णयः
समाप्तः ॥ लसं ३९२ वैशाख वदि १२ चन्द्रे दिने समाप्त ।

---

(१३२० । द ।) महालक्ष्मीमतभट्टारकः. 9 × 1½ inches. Folia, 78. Lines, 6 on a page. Extent, 1,504 çlokas. Character Newārī. Date, Newār Era, 380. Appearance, old. Verse. Incorrect.

**Beginning.** – – – – विश्वयोनिर्जनुष्टतलयकृत् शश्वदङ्घ्रिप्रभात्मा
यः स्वामी पञ्चपञ्चाश्रमचतुरिपुवत्प्रातिभानां द्विविद्यः ।
दृग्दृश्यं तं सपादं त्रिदशगुरुतनुं – – – – –
सत्सत्यं नौमि शम्भुं जगदवनिसुधाप्राप्तिहेतोः सुगम्यम् ॥ ?
श्रीमद्धिमवतः पृष्ठे शतषष्ठवविस्तृते ।
योजनानां निशानाथशिलातलशिखाश्रये ॥
– – – – – चन्द्रसूर्य्यधनञ्जयाश्रिते ।
चतुष्पदार्थसंकूठे षड्इन्द्रियार्थमन्दिरे ॥
.. .. .. .. .. ..
.. .. .. .. .. ..
.. .. .. .. .. ..

श्रीदेव्युवाच ।
श्रुता मयागमाः शम्भो शास्त्रं नानार्थदं श्रुतम् ।
विद्याविद्यागतं किन्तु – – – – हि तत् ॥

यच्चाधुना सुसंक्षेप ———————— प्रश्नम् ।

समागमाभिधं ब्रूहि पञ्चसाध्यपदं नृणाम् ॥ इत्यादि ।

End. [illegible] ।

संहिता शम्भुसंप्रोक्ता महालक्ष्मीमतेश्वरः ॥ (?)

Colophon. इति चतुर्विंशतिसहस्रे श्रीमहामन्त्रसारे श्रीमहालक्ष्मीमतभट्टारके कृति-पयसाधनकथनो नाम दशम आनन्दः । समाप्तः श्रीमहालक्ष्मीमत-भट्टारक इति ।

[illegible] ।

मासि चैत्रेऽसिते पक्षे पञ्चम्यां भृगुवासरे ॥

महामताब्धिःपीयूषं श्रीमल्लक्ष्मीमतं हितम् ।

धीमतः संख्यपाजस्य पुण्यज्ञानविवृद्धये ॥

कायस्थोदयहर्षेण हर्षेण लिखितं द्रुतम् ।

भ्रान्तिसंक्षेपदोषोऽस्मिन् शोधनीयो हि धीधनैः ॥

यद्यक्षरपरिभ्रष्टमात्राहीनश्च यद्भवेत् ।

क्षन्तुमर्हसि तत्पापं लिखितं मन्दबुद्धिना ॥

महाराजाधिराजपरमेश्वरपरममाहेश्वरपरमभट्टारकश्रीमज्जयभीमदेवराजे।

इति मङ्गलमहाश्रीः ॥

विषयः । इति पुद्गलाद्यात्मविचारो नाम । १ आनन्दः ।

इति चतुर्विंशतिसहस्रे श्रीमहामतसारे श्रीमहालक्ष्मीमतभट्टारके शरीर-विचारो नाम । २ ।

इति इन्द्रियार्थविचारो नाम । ३ ।

इति देवादिपञ्चविचारो नाम । ४ ।

इति अर्चाविचारो नाम । ५ ।

इति पृथग्राज्यनिरूपणो नाम । ६ ।

इति पीठाप्रभावकथनो नाम । ७ ।

इति सोपन्यासकथनो नाम । ८ ।

इति न्यासनिरूपणो नाम । ९ ।

इति कृतिपयसाधनकथनो नाम । १० ।

(२८५ । ख ।) मृत्युजिदमृतीशविधानं or ०अमृतेशतन्त्रम् . 10 × 1 inches. Folia, 89. Lines, 5 on a page. Extent, 1,335 çlokas. Character, Newārī. Date, Newār Era, 320. Appearance, old. Verse. Generally correct.

**Beginning.** ॐ नमः शिवादिभ्यो गुरुभ्यः ।

यस्त्रिधा त्रिष्ववस्थासु रूपमास्थाय शक्तिमान् ।
उद्भवस्थितिसंहारकृत्स्नं विश्वस्य शक्तितः ॥
विदधाति नमस्तस्मै शुद्धामृतमयात्मने ।
शिवाय ब्रह्मविष्ण्वीशपराय परमात्मने ॥
कैलासशिखरासीनं देवदेवं महेश्वरम् ।
क्रीड़न्तञ्च गणैः सार्द्धं पार्व्वत्या सहितं हरम् ॥
दृष्ट्वा प्रमुदितं देवं प्राणिनां हितकाम्यया ।
उत्सङ्गादवतीर्य्याशु पादौ जग्राह पार्व्वती ॥
पप्रच्छ परया भक्त्या सन्तोष्य परमेश्वरम् ॥

श्रीदेव्युवाच ।

भगवन् देवदेवेश लोकनाथ जगत्पते ।
यत् त्वया महदाश्चर्य्यं कृतं विस्मयकारकम् ॥
सर्व्वस्य जगतो देव किं नु मे परमेश्वर ।
दुर्विज्ञेयं दुराराध्यं रहस्यं न प्रकाशितम् ॥
कार्त्तिकेयस्य न मया (यि) न सुरेषु गणेषु च ।
योगेश्वरीणां मातृणां ऋषीणां योगिनां नहि ॥
तदद्य मे जगन्नाथ सुप्रसन्नो यदि प्रभो ।
प्रार्थयामि प्रपन्नाहं निःशेषं वक्तुमर्हसि ॥ इत्यादि ।

**End.** अमृतेशस्य देवस्य मृत्युजिद्भैरवस्य तु ।
परापरविभेदं च यो विन्दत्यस्य सर्व्वशः ॥
सोऽचिरादमृतं – – – – – न्नात्र संशयः ।
.. .. .. .. .. .. ..
.. .. .. .. .. .. ..
न देयं पापशीलानां क्रोधिनां कामिनां तथा ॥

.. .. .. .. .. .. ..

ददाति यदि मोहेन खेहेन धनलिप्सया ।
गच्छति नरकं घोरमित्याज्ञा पारमेश्वरी ॥
— — — — अस्यपालनात् सिद्धिमाप्नुयात् ।
पालनाच्च भवेद्देवि मृत्युजित् परमेश्वरः ॥

Colophon. इति मृत्युजिदमृतीशविधाने मन्त्रमाहात्म्य — — — — — — पटलः ।
समाप्तमिदं मृत्युजिदमृतीशविधानं सम्पूर्णमिति शुभम् । संवत् ३२० ।

विषयः । इ० तन्त्रावताराधिकारः । १ ।
इ० मन्त्रोद्धारविधिः । २ ।
इ० यजनाधिकारः । ३ ।
इ० दीक्षाधिकारः । ४ ।
इ० अभिषेकसाधनाधिकारः । ५ ।
इ० स्थूलाधिकारः । ६ ।
इ० सूक्ष्म + नाधिकारः । ७ ।
इ० कालवञ्चनः । ८ ।
इ० सदाशिवाधिकारः । ९ ।
इ० दक्षिणचक्राधिकारः । १० ।
इ० उत्तरतन्त्राधिकारः । ११ ।
इ० कुलाम्नायाधिकारः । १२ ।
इ० सर्व्वविद्याधिकारः । १३ ।
इ० सर्व्वाधिकारः । १४ ।
इ० १५ ।
इ० व्याप्त्यधिकारः । १६ ।
इ० पक्षाधिकारः । १७ ।
इ० वश्याकर्षणाधिकारः । १८ ।
इ० १९ ।
इ० राजरक्षाधिकारः । २० ।
इ० छिद्रपाताद्यधिकारः । २१ ।

इ० जीवाकर्ष + ह्यधिकारः । २२ ।

इ० मन्त्रविचारवर्णनः । २३ ।

इ० मन्त्रमाहात्म्य – – २४ ।

---

(१०७६ । ग ।) रघुवंशटीका. (शोभनाभिधा) By श्रीगर्भ. 10 × 11 inches. Folia, 94. Lines, 5 on a page. Extent, 1,410 çlokas. Character, Nāgara. Date, (?). Appearance, old. Prose. Correct.

**Beginning.** ॐ नमः शिवाय ।

वागर्थाविव्यादि । वाक् च अर्थश्च वागर्थौ । अजाद्यदन्तमिति अर्थ-शब्दस्यैव पूर्व्वनिपाते प्राप्ते धर्म्मादिष्वुभयमिति वचनादुभयं भवति ॥ इत्यादि ।

**End.** वाच्यलिङ्गं मतं तुर्य्यं मन्दयोरपि सुन्दरमिति + + + । ८२ ।

**Colophon.** इति वैद्यकश्रीगर्भकृतायां शोभनाभिधानायां प्रथमः सर्गः ॥

इति रघुवंशटीकायां शोभनाभिधानायां षष्ठः सर्गः समाप्तः ।

---

(१६२३ । क ।) रत्नकरण्डिका. By द्रोण. 10 × 1½ inches. Folia, 200. Lines, 5 on a page. Extent, 2,500 çlokas. Character. Nāgara. Date, Saṃvat, 1189. Appearanee, very old. Verse. Correct.

**Beginning.** + + + + +

प्रणम्य शिरसा विष्णुं शारदा + + + + + ।

लिखति वाजसनेय + + + + + क्रियाविधानं वक्ष्यामः ॥ इत्यादि ।

**End.** कृतसंयोगात् पादयो – – कारणं ।

एकादश्युपवासेषु – – – – ॥

– – – – द्रोणेनाकारि यत्नतः ॥

**Colophon.** इति द्रोणविरचितो रत्नकरण्डिकानामस्मृतिसमुच्चयः समाप्तः ॥

ॐ स्वस्ति—संवत्—११८९ वैशाख शुदि – – – –

विषयः । धर्म्मशास्त्रम् । (जीर्णत्वात् कीटदष्टपत्रावलीत्वाच्च नास्य सम्यक् विवरणं ग्रहीतुमलम् ।)

---

(१०७६ । ख ।) रूपसाधनम् . By सुभूतिचन्द्र. 10×1½ inches. Folia, 96. Lines, 6 on a page. Extent, 2,160 çlokas. Character, Newārī. Date, (?). Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो वागीश्वराय ।
नत्वा शिवं विधुविरिञ्चिकरीन्द्रवक्त्रां
वागीश्वरीं गुरुपदं जनकं कविञ्च ।
चेतः शिशोर्जड़रुजान्तकजायु दिव्यं
श्रीरूपसाधनवरं विमलं प्रवक्ष्ये ॥
मैनाक इत्यादि । पातु रक्षतु कौऽसौ मुनिः सर्व्वाकारेण सर्व्वपदार्थानां यथावद्बोधनात्मनां मुनिः । अथवा अकथ्यकथने मौनयोगान्मुनिर्भगवान् सम्यक्सम्बुद्धः ॥ कथम्भूतः । शाक्यः शाकेषु भवः शाक्यः । अथवा शाक्यस्यापत्यं पौत्रादिकं शाक्यः । इत्यादि ।

End. उक्तार्थेत्यादि । उन् लोपः । अकारेण सन्धिः । मनस् शब्दरूपसाधनं । ६२ ॥ इकारतकारान्तान्यप्रसिद्धानि ॥

Colophon. इति सुभूतिचन्द्रमहाकवेर्विरचिते सुप्प्रकरणे नपुंसककाण्डानि द्वितीयानि परिच्छेदानि समाप्तानि ॥ (?)

विषयः । सुबन्तरत्नाकरनामकस्य व्याकरणशास्त्रस्य व्याख्यानम् ।

---

(१३७६ । क ।) शिवधर्म्मः (शान्त्यध्यायमात्रम्) . 10×1 inches. Folia, 20. Lines, 5 on a page. Extent, 250 çlokas. Character, Newārī. Date, Newār Era, 522. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ।
नन्दिकेश्वर उवाच ।
अतः परमिदं गुह्यं रुद्रोद्गीतमहोदयम् ।
महाविघ्नप्रशमनं महाशान्तिकरं शुभम् ॥
अकालमृत्युशमनं सर्व्वव्याधिनिवारणम् ।
परचक्रप्रमथनं सदाविजयवर्द्धनम् ॥
सर्व्वदेव – – – समभीष्टफलप्रदम् ।
सर्व्वशान्त्यधिका – – – शाश्वतम् ॥ इत्यादि ।

**End.** शान्त्यध्यायमिदं पुण्यं न देयं यस्य कस्यचित् ।
शिवभक्ताय दातव्यं शिवेन कथितं पुरा ॥

**Colophon.** इति शिवधर्म्मशास्त्रे नन्दिकेश्वरप्रोक्तशान्त्यध्यायः समाप्तः । संवत् ५२२ भाद्रपदशुक्लद्वितीयायां ।

विषयः । दुष्टग्रहादीनां शान्तिविधायकविविधदेवतास्तवसङ्ग्रहः ।

---

(१३२० । ग ।) श्रीदत्तपद्धतिः. 10 x 1 inches. Folia, 132. Lines, 5 on a page. Extent, 2,640 çlokas. Character, Maithila. Date, Lakṣmaṇa Era, 299. Appearance, old. Prose and verse. Correct.

**Beginning.** ॐ नमो नमस्ते शशिमध्यगाय ।
सम्यक् तातनगेश्वराद् बहुगुणाद् वैशेषिकान्विक्षिकी-
वेदव्याकरणान्यधीत्य निखिलं काव्यादिकं ज्योतिषम् ।
दातुः संसदि सम्मतो नरपतेः श्रीदेवसिंहस्य स
श्रीदत्तो वितनोति पद्धतिमिमामेकाग्निदानोचिताम् ॥
तत्र परम्परागतपरप्रदत्तक्रयजयकुसीदकृषिसेवावाणिज्यादिन्यायार्जित-धनस्य निषिद्धेतरे काले देशे च वंशविद्यावृत्तिविशुद्धसत्पात्रे श्रद्धया प्रतिपादनमिहामुत्र च श्रेयसे भवति । इत्यादि ।

**End.** तुलापुरुषमहादाने यजमानतुलैवैका संख्या सुवर्णस्य हिरण्यगर्भेऽपि चाष्ट-चत्वारिंशदङ्गुलविस्तारद्वासप्तत्यङ्गुलोच्छ्रायगृहनिर्वाहिका परं सुवर्ण-स्यैका संख्येति + + + + अत्र न लिखितं । + + स्मरणपद्धतौ सुप्रपञ्चितमेवास्माभि + + + + + ।
पुराणपौराणिकवाक्यवेदनिबन्धबद्धस्मृतिशास्त्रदृष्टा ।
प्रकाशितं + + + + + मिष्टमतो बुधा बुद्धिपथं नयध्वम् ॥

**Colophon.** इति महामहोपाध्यायमिश्रश्रीनगेश्वरात्मजावसथिक + + + + + ध्यायश्रीश्रीदत्तपद्धतावेकाग्निविधिमहादानविधानं पूर्णं । समाप्तोऽयं ग्रन्थः । शुभमस्तु । लसं २९९ पौष शुदि ९ चन्द्रे महोपाध्यायश्रीनर — — — — महानुभावानामनुज्ञामवाप्य खएरायां वासस्य माद्ध श्रीधनेश्वरेण लिखितेयं पुस्तीति ।

विषयः । धर्म्मशास्त्रम् ।

17

---

(११११४ । क ।) सिद्धसारसंहिता. By रविगुप्त. 8 × 1½ inches. Folia, 97. Lines, 5 on a page. Extent, 1,212 çlokas. Character, Newārī. Date, (?). Appearance, very old. Prose and verse. Generally correct.

**Beginning.** ॐ नमः सर्व्वज्ञाय ।

सर्व्वं प्रणम्य सर्व्वज्ञं दुर्गगुप्तस्य सूनुना ।
संहिता सिद्धसारेयं रविगुप्तेन वक्ष्यते ।
आयुर्व्वेदोदधि + + मशक्ता येऽल्पमेधसः ।
तेषामियं प्रताराय विहिता तन्त्वणा दृढा ॥
ब्रह्मा प्रोवाच यं स्वर्गे वेदमायुर्निबन्धनम् ।
शिष्येभ्यः कथयामास काशिराजाय तं क्रमात् ॥
तस्यानुगानिशालाक्तं कायभूतचिकित्सितं ।
शल्यौ गदवयोवाले रत्ता + + विवर्द्धनं । (?)
पुरुषा व्याध्यधिष्ठानं महाभूतगुणात्मकं ।
शारीरमानसाः सन्तु सहजा व्याधयो मताः ॥
शारीरा + कुष्ठाद्याः क्रोधाद्या मानसाः स्मृताः ॥ इत्यादि ।

**End.** बुद्धिमेधा स्मृतिकरं सन्नस्याग्नेश्च दीपनं । (?) इति श्रुतिः ।
( अतः परं खण्डिता । )

विषयः । चिकित्साशास्त्रम् ।

---

(१३६३ । ठ ।) सिद्धान्तसारपद्धतिः. By भोजदेव. 10 × 1½ inches. Folia, 71. Lines, 6 on a page. Extent, 1,384 çlokas. Character, Newārī. Date, Newār Era, 187. Appearance, old. Prose and verse. Generally correct.

**Beginning.** ॐ नमः शिवाय ।

यमासाद्य निवर्त्तन्ते विकल्पाः सुखदुःखयोः ।
— — — — — — — ॥
— — — — — विधिं तथा ।
पवित्रारोहणश्चैव प्रतिष्ठाश्च — — — ॥ इत्यादि ।

**End.** सैषा क्रमेण नित्यादिकर्म्मस्मरणपद्धतिः ।
भवाब्धिमुत्तितीर्षूणां — — नौरिव निर्म्मिता ॥

यद् विप्रकीर्ण – – – – – स्फुटार्थं
नित्यादिकर्म – – – – – – ।
तत् संगतञ्च लघुवाप्यपरिस्फुटञ्च
श्रीभोजदेवजगतीपतिनाभ्यधायि ॥

Colophon. इति महाराजाधिराजश्रीभोजदेवविरचितायां सिद्धान्तसारपद्धतौ जीर्णोद्धारविधिः समाप्तः । संवत् १८१ कार्त्तिकशुक्लदिवातृतीयायां भौमदिने लिखितमिति । शुभमस्तु ।

विषयः । इति सूर्य्यपूजाविधिः ।
इति महाराजाधिराजश्रीभोजदेवविरचितायां सिद्धान्तपद्धतौ नित्यकर्म-विधिः समाप्तः ।
इति मुद्रालक्षणं समाप्तम् ।
इति प्रायश्चित्तविधिः ।
इति दीक्षाविधिः ।
इति साधकाभिषेकः ।
इति आचार्य्याभिषेकविधिः ।
इति पादप्रतिष्ठाविधिः ।
इति लिङ्गप्रतिष्ठाविधिः ।
इति द्वारप्रतिष्ठाविधिः ।
इति हृत्प्रतिष्ठाविधिः ।
इति ध्वजप्रतिष्ठाविधिः ।
इति जीर्णोद्धारविधिः ।

---

(७०२ । घ ।) सुगतिसोपानम् . By गणेश्वर . 10×1½ inches. Folia, 90. Lines, 5 on a page. Extent, 1,800 çlokas. Character, Maithila. Date, Lakṣmaṇa Era, 224. Appearance, old. Prose and verse. Generally correct.

**Beginning.** ॐ नमो नारायणाय ।

वेदस्मृतिपुराणादि दृष्ट्वा लोकहितैषिणा ।
कृतं सुगतिसोपानं श्रीगणेश्वरमन्त्रिणा ॥

गङ्गास्मरणं नरकागम + + + ति कीर्त्तनं सर्व्वपापविमुक्तिपूर्व्वक-
रुद्रलोकगमनफलं जन्मवयार्ज्जितपापक्षयफलं वा ॥ इत्यादि ।

**End.** वैश्वदेववल्यनन्तरञ्च सप्त प्रस + + + + + + + +
+ + + ज्ञातिभिः सह स्वयं भुञ्जीत ॥

**Colophon.** इति सप्रक्रियामहासान्धिविग्रहिकठक्कुरदेवादित्यमहामत्त + +
+ + + + + महाराजाधिराजश्रीगणेश्वरकृतं सुगतिसोपान-
पुस्तकमिदं समाप्तं । शुभमस्तु लिखितमिदं + + + + +
+ नेपालराज्यावस्थितश्रीललितपत्तने ठक्कुरश्रीमतिशर्म्मणा लिखितं ।
लसं २२४ आश्विन वदि + + + + + ।
यत्कर्म्म कुर्व्वतो नास्य जुगुप्सा मैति पुत्रक ।
तत्कर्त्तव्यमशङ्केन यन्न गोप्यं महाजनैः ॥

विषयः । धर्म्मशास्त्रम् ।

---

(११६५ । क । ) सूर्य्यसिद्धान्तभाष्यम् . By चण्डेश्वर . 10×1½ inches. Folia, 224 (leaves 1 to 10 missing). Lines, 5 on a page. Extent, 3,920 çlokas. Character, Maithila. Date, Lakṣmaṇa Era, 392. Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** (१म पत्रात् १० म पत्राणि न सन्ति अतो विंशपत्रे प्रारब्धस्य द्वितीया-
ध्यायस्य प्रारम्भवाक्यं लिखितम् । )
अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः ।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः ॥
रवीन्द्वोः सर्मं मन्दोच्चाख्यौ न्यूनाधिकारिणौ । भौमादीनामपि मन्दो-
च्चाख्याः प्राग्गतयः न्यूनाधिकारिण्यः । इत्यादि ।

**End.** एतत्ते सर्व्वमाख्यातं रहस्यं परमाद्भुतम् ।
ब्रह्मे तत्परमं पुण्यं सर्व्वपापप्रणाशनम् ॥
दिव्यं चतुर्ग्रहर्क्षाणां चरितं ज्ञानमुत्तमम् ।
विज्ञायार्कादिलोके – – – प्राप्नोति शाश्वतम् ॥
इत्युक्ता मयमामन्त्र्य सम्यक् तेनाभिपूजितः ।
दिवमाचक्रमेऽर्कांश प्रविशन्स्वमण्डलम् ॥ ?

सयोऽथ दिव्यं तज्ज्ञानं ज्ञात्वा साक्षाद् विवस्वतः ।
कृतकृत्यमिवात्मानं मेने निर्धूतकल्मषः ।
ज्ञात्वा तमृषयश्चाथ सूर्य्याल्लब्धवरं मयम् ।
परिवव्रुरुपेत्य — — — पप्रच्छुरादरात् ॥
स तेभ्यः प्रददौ प्रीतो ग्रहाणां चरितं महत् ।
अत्यद्भुततमं लोके रहस्यं ब्रह्मसम्मतम् ॥
इति सप्तार्थः स्लोकः ।

Colophon. इति मैथिलवाजपेयसोमयाजिश्रीचण्डेश्वराचार्य्यविरचिते सूर्य्य-सिद्धान्तभाष्ये पञ्चदशोऽध्यायः । लसं ३९२ फाल्गुन शुदि ७ चन्द्रे रत्नपुरनगरे श्रीका + शर्म्मणा लिखितैषा पुस्तीति । ॐ नमो भवाय । ॐ गणेशाय ।

विषयः । इति मैथिलवाजपेयसोमयाजिश्रीचण्डेश्वराचार्य्यविरचिते सूर्य्यसिद्धान्त-भाष्ये मध्यगतिः । प्रथमोध्यायः ।

इ० स्फुटगतिः । २ ।

इ० उपकरणाध्यायः । ३ ।

इ० चन्द्रग्रहणाध्यायः । ४ ।

इ० सूर्य्यग्रहणाध्यायः । ५ ।

इ० छेद्यकाध्यायः । ६ ।

इ० ग्रहदन्द्वाध्यायः । ७ ।

इ० ताराविक्षेपाध्यायः । ८ ।

इ० ग्रहनक्षत्राणामुदयास्तमयाध्यायः । ९ ।

इ० पौर्णमासाशृङ्गोन्नतिः (?) १० ।

इ० व्यतीपातवैधृताध्यायः । ११ ।

इ० गोलाध्यायः । १२ ।

(१९०८ । क ।) हरिचरितकाव्यम् . By चतुर्भुज . 14 × 1 inches. Folia, 87. Lines, 5 on a page. Extent, 1,250 çlokas. Character, Maithila. Date, (?). Saka 144+. Appearance, old. Verse. Generally correct.

**Beginning.** ॐ नमो गणेशाय ।

सुरसमूहसमीहितसिद्धये धरणिधारणगोद्विजवृद्धये ।
यदुकुलेऽवततार य एष नः सततमस्तु मुदे मधुसूदनः ॥
मुदिरमेदुरमिन्दु – – – – – लोभनलोचनम् ।
मुररिपुं तड़िदुज्ज्वलवाससं भजत रासरसोत्सवलालसम् ॥
नवरसोल्लसितेऽम्ब सरस्वति त्वमिह मामव काव्यसरस्वति ।
– – – – – – – – – – ॥
विदितधरणिहृदयः स दयालुं योगशयन – – – सुचिरशयालुम् ।
हरिमवबोध्य कृतस्तवराजः कनकगिरिं सहते न – – – ॥
इत्यादि ।

**End.** इत्येवं निजविक्रमेण च मिथोभेदेन च क्वापि यो
भूमेर्भारभरं जहार परमानन्दस्वरूपो हरिः ।
तन्मूर्त्तिं परिभावयन्नविरतं लीलाश्च तस्य – – –
मुक्तिं क्षिप्रमवाप्नुयां स भगवान् संसारसिन्धौ तरिः ॥

**Colophon.** इति हरिचरिताख्ये नव्यसत्काव्यमुख्ये
प्रसरदमृतधारे वर्णितेशावतारे ।
कृतकलुषनिरासे तुष्टबालाविलासे
अधिकदशविसर्गः प्राप्त एषोऽत्र सर्गः ॥
ग्रामोत्तमोऽस्त्यमलमञ्जुगुणैकपुञ्जः
श्रीमान् करञ्ज इति वन्द्यतमो वरेन्द्रग्राम् ।
यत्र श्रुतिस्मृतिपुराणपदप्रवीणाः
सच्छास्त्रकाव्यनिपुणाः स्म वसन्ति विप्राः ॥
कीर्णैः प्रजापतिगुणैः परिपूर्णकामः
श्रीस्वर्णरेख इति विप्रवरोऽवतीर्णः ।
तं ग्राममग्रगणनीयगुणं समग्रं
जग्राह शासनवरं नृपधर्म्मपालात् ॥

तदन्वयक्षीरसमुद्रचन्द्रो बभूव भुन्दूरिति भूसुरेन्द्रः ।
आर्यैं यं आचार्य्यवरोऽभिषिक्तः – – सुराणां गुरुणापि – – ॥
त्रयीपरः काश्यपगोत्रभास्करस्तत्पुत्र आचार्य्यवरो दिवाकरः ।
– – – – – – – – – ॥

नित्यानन्दः कवीन्द्रोऽभवदतिविभवः कंसविध्वंसिनोऽंश-
स्तद्वंशस्यावतंसो भृशमकृशयशो भारते यो बभार ।
– – – – – – – –
– – – – – – – – ॥

नानामुनीनां वचनानि सम्यग्-
विचार्य्य तत्त्वार्थमथाधिगम्य ।
सदा सदाचारपरायणो य-
श्चक्रे प्रमोदात् स्मृतिकौमुदीञ्च ॥

काश्यामुपास्य भगवद्भवपादपद्म-
मत्यादरेण सुचिरेण गृहानुपेत्य ।
जज्ञे सुतं स निजवंशवतंसमीश-
मीशस्य विश्वविदितं शिवदाससंज्ञम् ॥

– – – – – –
– – – – – – ।
प्राज्ञो महा – – – –
स्वदारतुष्टोऽजनयत् तनूजान् ॥

सश्रीकनारायणमिश्र आद्यो
मन्त्री महान् माधवपाठकोऽथ ।
प्रौढप्रभावोऽनु च भानुशर्म्मा
श्रीमान् कनीयांस्तु चतुर्भुजोऽभूत् ॥

यस्य – – – जिह्वायां स्वर्णेन मधुना समम् ।
विलिख्य त्रैपुरं मन्त्रं पितेदं पद्यमैच्यत ॥

व्याकारेऽप्रतिमः स्मृतावनुपमः साहित्यविद्योत्तमः
षट्तर्कागमसत्तमः कविसभासम्भावना – – – ।

( १६१ )

श्रीकृष्णार्पितचेत – सुरवचोवैचित्र्यसद्मानन:
श्रीमानेष चतुर्भुजो विजयतां – – – पञ्चानन: ॥
भागीरथीपरिसरे परमा – – –
श्रीरामकेलिनगरे बहुशिष्टजुष्टे ।
सौवर्गवर्गवसताविव जन्मभू – –
श्रीमानसौ पितृकृते वसति स्म धीमान् ।
व्याकारसारमधिगम्य स सम्यगादौ
ज्येष्ठात् – – – सुविशुद्धबुद्धेः ।
शास्त्रं परं पितु – – – विचिन्त्य काव्यं
धीरोऽकरदमुमुदारतरं प्रबन्धम् ॥
शरविधुमनुभिः शकस्य वर्षे परिगणितेऽथ नभस्यशुक्लपक्षे ।
प्रतिपदि शशिवासरे सुपूर्णं हरिचरिताह्वयनव्यकाव्यमेतत् ॥
यावद् वेदो विलसतितरामृग्यजुःसामभेदो
रम्यं रामायण – – – प्रमाणं पुराणम् ।
– – – – – – – – –
– – – कविकुलमुदे कल्प्यतां काव्यमेतत् ॥
भट्टाचार्यचतुर्भुजेन रचिते ग्रन्थेऽत्र पौरन्दरे
श्रीगोविन्दपदारविन्दयुगलौ (?) सौरभ्यविभ्राजिते ।
– – – युगाम्बुराशिशशभृत्संख्य – – – –
श्रीमान् भानुकरोऽकरोल्लिपिमिमामानन्दसन्दोहदाम् ॥

विषयः । क्षीरोदधिशयानस्य भगवतो नारायणस्य ब्रह्मादिदेवानामभ्यर्थनया पृथिव्या भारमपनेतुं देवकीगर्भे जन्मग्रहणाङ्गीकरणं ततः श्रीकृष्णरूपेणावतीर्णेन तेन या या लीलाः कृतास्तासामेकैकशो वर्णनम् ।

# DESCRIPTION OF THREE MANUSCRIPTS IN GUPTA CHARACTER IN THE DARBAR LIBRARY.

(२७७।) निश्वासतत्त्वसंहिता. Folia, 114. Lines, 6 on a page. Extent, 4,500 çlokas. Date (?). Appearance, old. Verse. Correct. Complete.

**Beginning.**

ॐ नमः शिवाय ।

रिचीक उवाच ।

गतोऽहं पूर्व्वमाशायां पुष्पाणि समिधस्तथा ।
अपूर्व्वं दृष्टमाश्चर्य्यं तद् दृष्ट्वा कौतुकान्वितः ॥
अष्टाशीतिसहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ।
\+ \+ \+ \+ \+ \+ \+ \+ ॥
\+ \+ \+ \+ कथय मम पृच्छतः ।
त्वं वेत्ता सर्व्वशास्त्राणां शैवानाञ्च विशेषतः ।
तेन पृच्छामि भगवन् येन वेत्सि मतङ्ग त्वम् ॥

मतङ्ग उवाच ।

शृणु वत्स समासेन प्रवक्ष्यामि तवाखिलम् ।
नैमिषे वसमानैस्तु श्रुतं \+ \+ \+ ॥
तत्रैव दीक्षितो ब्रह्मा केशवश्च रिचीकक: ।
कौतूहलान्विताः सर्व्वे विस्मयं परमं गताः ॥
परस्परं वदन्त्येव सर्व्वशास्त्रविशारदाः ।
कथं दीक्षा प्रपद्येत मुक्त्वा वेदोक्तमागमम् ।
न हि वेदात् परश्चान्यद् योगी \+ \+ ॥
सांख्ययोगस्य वेत्तासौ कथं विष्णुश्च दीक्षितः ।
\+ \+ \+ \+ \+ \+ \+ \+ ॥

18

निश्वासमुखमूलसूत्रदेव्युवाच ।

श्रावत्त्व देवदेवेश दीक्षा निर्व्वाणगामिनी ।
शिवतत्वं परञ्चैव यं विदित्वामृती भवेत् ॥ इत्यादि ।

Colophons. ६ पत्रे,—इति निश्वासमुखतत्वसंहितायां लौकिकधर्म्मे प्रथमः पटलः । श्लोकशतं सप्ताशीत्यधिकम् ।

९ ,, इति निश्वासमुखतत्वसंहितायां लौकिके द्वितीयः पटलः । श्लो १२२ ।

१५ ,, इति निश्वासमुखतत्वसंहितायां लौकिके तृतीयः पटलः । श्लोक १९७ ।

१८ ,, इति निश्वासमुखतत्वसंहितायां चतुर्थः पटलः । श्लोकशतं सप्तविंशोत्तरं । चतुःस्रोताः लौ ६४३ ।

१९ ,, इति निश्वासतत्वसंहितायां मूलसूत्रे प्रथमः पटलः । श्लो २३ ।

१९ ,, इति ० द्वितीयः पटलः । १३ ।

२० ,, इति मूलसूत्रे तृतीयः पटलः । श्लोक १७ ।

२० ,, इति मूलसूत्रे चतुर्थः पटलः । श्लोक १८ ।

२१ ,, इति मूलसूत्रे पञ्चमः पटलः । श्लोक २५ ।

२२ ,, इति मूलसूत्रे षष्ठः पटलः । श्लो (२) ५ ।

२२ ,, इति मूलसूत्रे सप्तमः पटलः । श्लो २० ।

२३ ,, इति मूलसूत्रे अष्टमः पटलः । श्लो २० ।

२४ ,, इति निश्वासतत्वसंहितायामुत्तरसूत्रे प्रथमः पटलः । श्लो ४१ ।

२५ ,, उत्तरसूत्रे द्वितीयः पटलः । श्लोक ४१ ।

२६ ,, उत्तरसूत्रे तृतीयः पटलः । श्लो २४ ।

२७ ,, उत्तरसूत्रे चतुर्थः पटलः ।

२९ ,, उत्तरसूत्रे पञ्चमः पटलः । श्लो ५२ ।

सूत्रोत्तरश्लोक २०८ समाप्तञ्च ।

३२ पत्रे,—इति निश्वासतत्वसंहितायां नयसूत्रे यासप्रकरणं प्रथमः पटलः । श्लो १३० ।

३५ ,, नयसूत्रे प्रकृतिविचारे द्वितीयः पटलः । १०२ ।

३७ ,, इति निश्वासतत्वसंहितायां नयसूत्रे रूपविचारस्तृतीय श्पटलः । श्लो ७१ ।

४१ ,, इति निश्वासतत्वसंहितायां नयसूत्रे परमाखुतसद्भाव-विचारः चतुर्थः पटलः । श्लो ४६६ ।
श्रौतसूत्रत्रय समाप्तः ।

४५ ,, इति निश्वासतत्वसंहितायां गुह्यसूत्रे प्रथमः पटलः । श्लोक ।

४८ ,, इति गुह्यसूत्रे द्वितीयः पटलः । श्लो १३० ।

५१ ,, इति गुह्यसूत्रे सर्व्वसिद्धिसन्दोहस्तृतीयः पटलः । श्लो ११२ ।

५४ ,, इति गुह्यसूत्रे चतुर्थश्पटलः । लो १३३ ।

५७ ,, इति गुह्यसूत्रे पञ्चमः पटलः । श्लो ११२ ।

६१ ,, इति गुह्यसूत्रे षष्ठश्पटलः । श्लो १४० ।

६९ ,, इति गुह्यसूत्रे सप्तमः पटलः । श्लोक २९२ ।

७२ ,, इति गुह्यसूत्रे प्रक्रियायोगपटलः । १४९ ।

८० ,, इति निश्वासतत्वसंहितायां गुह्यसूत्रे नवमः पटलः । श्लोकशतद्वयनवत्यधिक ।

८२ ,, इति निश्वासतत्वसंहितायां गुह्यसूत्रे दशमः पटलः । श्लोकशतमेकादशोत्तरम् ।

८७ ,, इति निश्वासतत्वसंहितायां गुह्यसूत्रे एकादशमः पटलः ।

८९ ,, इति निश्वासतत्वसंहितायां गुह्यसूत्रे मातृकाप्रस्तावो द्वादशमः पटलः । श्लोका एकून षष्टि ।

९३ ,, इति निश्वासतत्वसंहितायां गुह्यसूत्रे ब्रह्मोद्धारः त्रयो-दशमः पटलः । श्लो १८९ ।

९६ ,, सद्योजातस्य कल्पः समाप्तः ।

१०० पत्रे,—अघोरस्य कल्पः समाप्तः ।
१०१ „ इत्येव तत्पुरुषस्य कल्पः ।
१०२ „ तत्पुरुषस्य द्वितीयकल्पः ।
१०३ „ इति निश्वासतत्वसंहितायां गुह्यसूत्रे पञ्चानां परित्राणं पटलः । श्लोकानि सतानि त्रीणि पञ्चोनषष्ठ्यधिकानि ।
१०८ „ कवचोद्धारः पटलः ।
११० „ इति निश्वासतत्वसंहितायां गुह्यसूत्रे पञ्चदशमः पटलः । श्लोका द्वादश ।
११२ „ इति निश्वासतत्वसंहितायां गुह्यसूत्रे रैतविद्याविधान-पटलः षोड़शमः । श्लोक द्वाषष्टिः सार्द्धः ।
११३ „ इति निश्वासतत्वसंहितायां गुह्यसूत्रे वीजाशिवस्यकः + + पटलः । श्लोका ८१ ।
११४ „ इति निश्वासतत्वसंहितायां गुह्यसूत्रेऽष्टाद + + विंशत् + + + + सहस्रचतुष्टयं श्लोकं शतानि पञ्च च ॥

---

(१६४७ ।) लङ्कावतारः. Folia, 24. Lines, 6 on a page. Extent, 522 çlokas. Date, Newār Era, 28.

**Beginning.** उमापतिं नमस्कृत्वा + + + + ।
वक्ष्यामि भो स्विरात्रीणां तन्मे शृण्वन्तु साधवः ॥
× × × × × × ×
ब्रह्मघ्नानां कृतघ्नानां रोघ्नानां (?) पापकर्म्मिणाम् ।
त्रायन्ते सर्व्वथा साध्या अन्येषान्तु सर्वेतरा ॥
निदानमेतद्दुद्दिष्टम्तव राजा विभीषण ॥ इत्यादि ।

**End.** सम्वत् २८ (आत्तराणङ्कानि ।) कार्त्तिककृष्णदिवाष्टम्याम् ।

विषयः । चिकित्साशास्त्रं आरोग्यार्थशान्तिस्वस्त्ययनादिसंहितम् ।

---

(२२६ ।) स्कान्दपुराणम् . Folia, 247, Lines, 5 to 7 on a page. Incomplete. Leaves are not in order.

**Beginning.** प्रथमपत्रस्थः कश्चित् श्लोकः ।

तीर्थसंप्लवनार्थाय पौर्णमास्यां कृताह्निकाः ।
पौराणिकाः संपश्यन्तः सूतं सत्यपरायणम् ॥

पुष्पिकाः ;— स्कान्दपुराणे नन्दिकेश्वरमहाभाग्यं आदितप्रभृतिराध्यायाश्च चतुर्विंशत् ।
श्लोकास्तत्वेन ८१५ (?)
„ अन्धकनन्दियुद्धे अध्यायः (३८) स्कान्दपुराणोकप्रदानिक ।
„ अन्धक तपः प्रयाणे अध्यायः ।
६२ पत्रे,— „ नरकवर्णने तपो नाम ।
„ नरकवर्णने वैतरणीं नाम ।
६८ „ „ रौरवं नाम नरकवर्णनेऽध्यायः ।
६९ „ „ नरकवर्णने महारौरवं नाम ।
„ नरकवर्णने तपोतिश्चं ।
७२ „ „ नरकवर्णने कुम्भीपाकं नाम असिपत्रं नाम ।
७८ „ „ नारकीयमोक्षणे । ४३ ।
„ देव्यावरप्रदानं नाम । ४५ ।
„ संसारातिवर्णनं नाम । (४५)
„ वाराणसी + + कारणः । ४७ ।
८४ „ „ देव्यावरप्रदाने । ४ (८) (?)
८५ „ „ सोमनन्दिदेव्योर्वरप्रदाने । ४ (९) (?)
आदितः प्रभृति एकत्वेन श्लोकसहस्त्रत्रयम् ।
स्कान्दपुराणे कौशिकाभिषेकः । ११० ।
„ कौशिकशापः । ११५ ।
„ शुम्भनिशुम्भसैन्यवर्णनम् ।
१०१ „ „ देवासुरसङ्ग्रामे शुम्भनिशुम्भाभिजाय (?) (१२०)
१०७ „ „ शुम्भनिशुम्भसङ्ग्रामे देवीयुद्धजयः ।

१११ पत्रे,—स्कन्दपुराणे महिषासुरवधः ।

११२ ।

११३ ।

११५ ।

११६ ।

„ ध्यानविधौ (प्रथ) मोऽध्याय । १२२ ।

१२० ।

१२१ „ „ ध्यानविधौ द्वितीयः अध्यायः । १२३ ।

„ ध्यानविधौ चतुर्थः अध्यायः । १२५ ।

„ ध्यानविधौ षष्ठः । १२७ ।

„ ध्यानविधौ सप्तमः अध्यायः । १२९ ।

„ अन्धकवरप्रदानो नामाध्यायः । १३० ।

„ हिरण्याक्षनिर्याने अध्यायः । १३३ ।

„ पूहरवरोऽध्यायः । (?) १३४ ।

„ देवासुरसङ्ग्रामाध्यायः । १३५ ।

„ युद्धलाभः । १३७ ।

१३५ „ „ असुरत्रासनोऽध्यायः ।

१३६ „ „ युद्धे अध्यायः ।

„ युद्धे अध्यायः । १४० ।

„ अध्याय १४१ युद्ध ।

„ युद्धे अध्यायः । १४२ ।

१४२ „ „ वरुणालयसमरे अध्यायः । १४३ ।

„ युद्धे अध्यायः । १४४ ।

„ युद्धे अध्यायः । १४५ ।

१४४ „ „ युद्धे अध्यायः । १४६ ।

„ युद्धे अध्यायः । १४७ ।

१४८ „ „ युद्धे अध्यायः । १४८ ।

„ युद्धे अध्यायः ।

१४९(?) पत्रे,—स्कान्दपुराणे यमलोकाभिगमने अध्यायः । १५० ।

१५० ,, ,, राज्यवर्णनो नाम अध्यायः । १५१ ।

१५१ ,, ,, ब्राह्मण + + अध्यायः । १५२ ।

,, गय (?) गमने अध्यायः । १५४ ।

१५५ ,, ,, सागरप्रवेशे अध्यायः । १५५ ।

१५० ,, ,, किङ्करावेशे अध्यायः । १५५ ।

१५८ ,, ,, किङ्करयुद्धे अध्यायः । १५६ ।

१५९ ,, ,, असुरसन्देशने अध्यायः । १५६ ।

,, वराहयुद्धे अध्यायः । १५८ ।

,, विप्रचित्तिपातने । १५९ ।

,, वराहाध्यायने अध्यायः । १६० ।

,, + + + त्तेपणे अध्यायः । १६१ ।

१६५ ,, ,, हिरण्यवधे । १६२ ।

,, वृकस्थले अध्यायः । (?) १६३ ।

१६७ ।

१६८ ,, ,, वराहरूपसंहारे अध्यायः । १६४ ।

१६९ ,, ,, वराहोत्सवे अध्यायः । १६ + ।

१७१ ।

१७२ ।

१७३ ।

१७४ ।

१७५ ,, ,, मन्दरारोहणे । १६६ ।

१८१ ,, ,, अमृतमथने नीलकण्ठोपाख्याने महादेवस्तोत्राध्यायः । १६७ ।

१८२ ,, ,, अमृतमथने युद्धे । १६८ ।

१८३ ।

१८४ ।

१८५ ।

१८७ पत्रे,—स्कन्दपुराणे चामरे अध्यायः । १६९ ।

१८८ ।

१८९ ।

,, यातुधानाख्याने अध्यायः । १७२ ।

,, + + अध्यायः । १७३ ।

,, जमदग्निवरप्रदानो अध्यायः । १७४ ।

१९४ ।

१९५ ।

१९६ ,, ,, हरिश्चन्द्रपुरवर्णनाध्यायः । १७५ ।

१९७ ।

१९८ ,, ,, नाम (?) माहात्म्ये अध्यायः । १७६ ।

२०२ ,, ,, गङ्गावतरे अध्यायः । १७७ ।

२०४ ,, ,, गङ्गावतरणे अध्यायः । १७८ ।

,, अध्यायः । १७९ ।

,, रणोद्योगः । १८० ।

,, अन्धकयुद्धे मन्दरवर्णनं अध्यायः । १८१ ।

२११ ,, ,, अन्धकमथने व्यूहरचनाध्यायः । १८२ ।

२११ ,, ,, गणयुद्धे अध्यायः । १८३ ।

२१२ ,, ,, गणयुद्धे । १८४ ।

,, गणयुद्धे । १८४ ।

२१४ ,, ,, गणयुद्धे । १८५ ।

२१५ ,, ,, गणयुद्धे । १८६ ।

२१६ ,, ,, जाम्बवधे । १८७ ।

२१७ ,, ,, गणयुद्धे । १८८ ।

२१७ ,, ,, गणयुद्धे । १८९ ।

२१८ ,, ,, गणयुद्धे अध्यायः । १९० ।

२१९ ,, ,, गणयुद्धे अध्यायः । १९१ ।

२२० ,, ,, गण + + अध्यायः । १९२ ।

स्कान्दपुराणे गणयुद्धे अध्यायः । १९३ ।

२२० पत्रे,— ,, गणयुद्धे अध्यायः । १९४ ।

२२७ ,, स्क (न्दपुराणे ग) णयुद्धे अध्यायः । १९७ ।

स्कान्दपुराणे गणयुद्धे अन्धकने + + । १९८ ।

२२७ ,, ,, गणयुद्धेऽसुरशापे अध्यायः । १९९ ।

,, युद्धभूमिवर्णने । २०२ ।

,, अन्धकविजये । २०३ ।

२३४ ,, ,, गणयुद्धेऽन्धकमथने अन्धकमथनं समाप्तञ्च ब्रह्मणाः स्तवः । २०४ ।

२३५ ,, ,, अन्धकवधः ।

,, भूमिजापुत्रवर्णने अध्यायः । २०७ ।

,, तरुविवाहे ब्राह्मणामन्त्रण । २०८ ।

२४१ ,, ,, तरुपुत्रग्रहणे विप्रामन्त्रणं समाप्त अध्यायः । २०९ ।

२४२ ।

२४४ ,, ,, अशोकतरुपुत्रग्रहणे समाप्तं अशोकतरुपुत्रग्रहणञ्च अध्यायः । २१० ।

२४+ ।

२४८ ,, ,, स्कान्दाभिषेकानुज्ञाते । २११ ।

२५१ ,, ,, सेतोपद्याभिषेके (?) अध्यायः । २१२ ।

२५२ ।

२५३ ,, ,, + + + पे अध्यायः । २१३ ।

१५४ ।

२५७ ,, ,, श्वेतवरप्रदाने अध्यायः । २१४ ।

,, + + वर्णने अध्यायः । २१५ ।

२६४ ,, ,, त्रिपुरबधे अध्यायः । २१६ ।

,, त्रिपुरबधे सुरवर्णनं अध्यायः । २१७ ।

,, त्रिपुरबधे समाप्तं त्रिपुरबधेति अध्यायः । २१८ ।

,, प्रह्लादचरित्रे अध्यायः । २२० ।

19

स्कन्दपुराणे योगविधौ पञ्चमः अध्यायः । २२६ ।

,, योगविधौ अष्टमः ।

१८४(?)पत्रे,— ,, योगविधौ नवमः ।

,, काम्रुकूटामाहात्म्यं नाम । (२४०) ।

,, सगरोत्पत्तिः अध्यायः । २६८ ।

२०३ ,, ,, सहोदरसंवादे । २६९ ।

,, वाराणस्यावलोकने जैगीषव्यधनदपञ्चचूड़ानां वरप्रदानं नामाध्यायः । २७८ ।

३२१ ,, ,, सती प्रवेश अध्यायः ।

३३० ,, ,, सुकेशवरप्रदाने ।

३३८ ,, ,, उपमन्युवरप्रदानः ।

,, दक्षयज्ञप्रमथने । (३२९) ।

आदितः प्रभृति सर्व्वतल्लेम (८(?)५४) ।

स्कन्दपुराणे दक्षशापानुकीर्त्तनं नाम । ३(?)४३ ।

,, ईश्वरार्चनविधिः ।

## DESCRIPTION OF SOME RARE PAPER MANUSCRIPTS IN THE DARBAR LIBRARY.

(१४१८।) अमृतोदयनाटकम् . By गोकुलनाथ. 10 × 5 inches. Folia, 30. Lines, 10 on a page. Extent, 900 çlokas. Character, Nāgara. Date, Saṃvat, 1848. Appearance, new. Prose and verse. Generally correct.

**Beginning.** ॐ नमो भगवते वासुदेवाय ।

ब्रह्माण्डविन्दुगणवर्षणवारिवाह
वन्दस्व मुञ्चसि निषिञ्चसि जीवनञ्च ।
सृष्टं त्वया सु(?)परदृष्टिविलोपकष्टं
निर्मोष्टुमर्हति तवैव विवेकविद्युत् ॥

अपि च । असकृदुपरमद्भिरङ्कभेदैर्नटगणनिःक्रमणाद् विविक्ताङ्कः ।
अविदितमुखसन्धिरामुखान्तो निगमकरेस्तव रूपकप्रबन्धः ॥

किञ्च । न दहति सगरान्वयं न पाशात्
प्रभवति नाप्यलिकादुदेति चक्षुः ।
न च किमपि शृणोति नेत्रवर्गो
मम कथमस्तु तव स्तवेऽधिकारः ॥

नान्द्यन्ते सूत्रधारः ।

निर्वर्त्तित एष प्रत्याहरणावतारणादिभिरङ्गरूपबृंहितः पूर्व्वरङ्गः । साम्प्रतमवसरो गुरोर्गोकुलनाथस्य गिरां प्रबन्धमभिनेतुमुपनतश्चासौ प्रशान्तपरिजनोपप्लवः शिशिरमासः । इहहि — — — — — —

परिक्रम्य । अयमहं भोः चित्रकूटनगरवासी मूलमस्मि सर्व्वस्यास्यस्य रागो नाम कामरूपो नटः । तस्य ममामृतोदयं नाम नाटकमभिनिनीषतः पूर्व्वपरिगृहीताभोगभूमिकापरिहारेण विविक्तवेशपरिग्रहमुरीकुर्व्वन्तु भावमिश्राः । इत्यादि ।

End. अपवर्गः । मातरहं पूर्णोऽस्मि । तथापीदमस्तु ।
संसारात् मा + निर्व्वेदं सर्व्वे निर्व्वाणलिप्सया ।
श्रवणान्मननाद्ध्यानात् पश्यन्तु पुरुषोत्तमम् ॥

Colophon. इति निष्क्रान्ताः सर्व्वेऽपवर्गप्रतिष्ठा नाम पञ्चमोऽङ्कः समाप्तश्चायं ग्रन्थः ।
सम्वत् १८४८ ।

विषयः । श्रवणसम्पत्तिर्नाम प्रथमोऽङ्कः ।
मननसिद्धिर्नाम द्वितीयोऽङ्कः ।
निदिध्यासनधर्म्मसम्पन्नाम तृतीयोऽङ्कः ।
परमात्मदर्शनं नाम तुरीयोऽङ्कः ।
अपवर्गप्रतिष्ठा नाम पञ्चमोऽङ्कः ।

---

(१३०६ ।) अरिष्टनवनीतव्याख्या . (श्रीधरा .) By नवनीतनर्त्तनकवि . 12×2 inches. Folia, 54. Lines, 7 on a page. Extent, 1,114 çlokas. Character, Newārī. Date, Newār Era, 800. Appearance, fresh. Prose and verse. Incorrect.

Beginning. ॐ नमो विघ्नहर्त्रे ।
अरिष्टनवनीतं यद् होराशास्त्रात् समुद्धृतम् ।
व्याख्या विरच्यते तस्य श्रीधराख्या मनोहरा ॥
प्रथमं प्रबन्धारम्भे अभिमतदेवतानां नमस्कृत्य प्रबन्धसंज्ञां कर्त्तृसंज्ञाञ्च प्रकाशयति ।
श्रीरङ्गेशं नत्वा होराशास्त्राम्बुधीन् समालोच्य ।
नवनीतनर्त्तनकविररिष्टनवनीतमाजह्रे ॥
अरिष्टनवनीतं अरिष्टसारं अरिष्टमतिमरणसूचकमशुभं । तथोक्तं वैजयन्त्यां रिष्टारिष्टे शुभाशुभे इति । इत्यादि ।

End. एवमुक्तेन प्रकारेण बलानि विचार्य्य रिष्टग्रहस्य बलमधिकं चेद् रिष्टमस्तीति जानीयात् । रिष्टापवादग्रहस्य बलमधिकं रिष्टिर्नास्तीति ।
— — — — रिष्टमस्त्येव ॥

Colophon. इत्यरिष्टनवनीतव्याख्याने रिष्टापवादो नाम षष्ठः परिच्छेदः । शुभमस्तु ।
संवत् ८०० फाल्गुन शुक्लः षष्ठी । बुधवारे ॥

विषयः । इति० साधारणपरिच्छेदः । १ ।
इति० मात्ररिष्टपरिच्छेदः । २ ।
इति० पित्ररिष्टपरिच्छेदः । ३ ।
इति० सर्व्वारिष्टपरिच्छेदः । ४ ।
इति० सुतारिष्टपरिच्छेदः । ५ ।
इति० अरिष्टापवादः । ६ ।

---

( १६१७ । ) अश्वमेधनाटकम् . By सुमतिजितामित्र . 16 × 4½ inches. Folia, 37. Lines, 9 on a page. Extent, 2,015 çlokas. Character, Newārī. Date, Newār Era, 810. Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** श्रीश्रीनृत्यनाथो जयति । श्री गुरवे नमः ।
नान्दीगीतम् । मालवरागे । ज । झ । प । माङ्गले ।
त्रिभुवननायकं, ताण्डवनृत्यरतं
विधुवरतिलकसुवेशम् ।
विदितनटवरं, सुपिङ्गजटं
ललितहारभुजगेशम् ॥
दितिसुतनाशककलितरङ्गगतं
त्रिनयनसुपद्मसुखम् ।
अर्द्धहैमनिभमर्द्धकुमुदकुन्दसितं
अभिनयनिपुणमहेशम् ॥
पश्यति सुरगणो भवनृत्यं
चलितं नूपुररवललितम् ।
भक्तवरदायकगजचर्म्मवसनं
सुललितशङ्कररूपम् ॥
वहति जटातटे गाङ्गजलविमलं
सहृदयहृदयहारि ।
सुमतिजितामित्रकृतहरवर्णनं
परिसुखयतु भक्तजनम् ॥

( १५० )

नान्दीश्लोकः ।

सानन्दं चन्द्रचूडस्थितशशितनुतः कान्तयालिङ्गिताङ्गी-
गौरीशो दिव्यमूर्त्तिर्दनुजकुलरिपुः कुन्दकर्पूरगौरः ।
स्वच्छन्दं रङ्गसंस्थो नटभवनभवं विघ्नजालं विधुन्वन्
नृत्येशः पातु नित्यं जगदखिलमिदं देवदेवो महेशः ॥

सूत्र । आर्य्ये गुणवति कमलवदने त्वरया इतस्तावदागम्यताम् ।

नटी । अज्जउत्त वन्दामि । इअह्मि को निअओ अनुचिट्ठिअदुत्ति ॥

सूत्र । आर्य्ये सकलनृपतिचक्रचूडामणिना श्रीश्रीसुमतिजयजितामित्रमल्लदेवेन श्रीश्रीश्रीस्वेष्टदेवताप्रीतिकामनया जैमिनिभारतोक्ताश्वमेधिकाभिनयमभिनेतुमादिष्टोऽस्मि । .. .. .. .. .. ।
अयि कमलविलोचने नानादेशादागतभूमिपालकविवरविदग्धजनसामाजिकानाञ्च चेतोरञ्जनाय श्रीसुमतिजयजितामित्रमल्लदेवाज्ञया संस्कृतेन जैमिनिभारतोक्ताश्वमेधिकाभिनयमभिनेतुं युधिष्ठिरद्रौपदीरूपञ्च ग्रहीतुमावां गच्छावः ॥ इत्यादि ।

End. सर्व्वे । तथास्तु । ... ।

Colophon. इति जैमिनिभारतं सम्पूर्णम् ॥
सुमतिश्रीजितामित्रो मल्लदेवो महीपतिः ।
युधिष्ठिरस्य यज्ञस्य नृत्यारम्भं करोति हि ॥
श्रीसूर्य्यवंशशतपत्रसहस्ररश्मि-
र्नेत्रीभवन्नृपतिकैरवकाननेन्दुः ।
भक्तापुरे जयति भूपशिरस्थरत्न-
भाभिर्विचित्रपदपङ्कजरञ्जितश्रीः ॥
जितामित्रमल्लं गोपालं गोपालः ।
जितामित्रमल्लः सपुत्रं पुनातु ॥
सम्वत् ८१० पौष सुदि — ॥

(११६१।) अश्ववैद्यकम्. By दीपङ्करः. 8 × $2\frac{1}{2}$ inches. Folia, 85. Lines, 6 on a page. Extent, 1,419, çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Incorrect.

**Beginning.** ॐ नमः सर्व्वज्ञाय ।

शिवं प्रणम्य सर्व्वज्ञं तज्ज्ञाः किमपि यं विदुः ।
सशिष्यं शालिहोत्रञ्च वाजिशास्त्रञ्च कारयेत् ॥
श्रीनिधानकरो नाम भिषगासीत् यगार्यकृत् ।
कान्तारवासिनीवैद्यवंशदुग्धाब्धिचन्द्रमाः ॥
तस्माद्रागार्णवामज्जज्जन्तुसन्तारकारणम् ।
अभून्नानाकरः श्रीमान् बुद्धः शुद्धोदनादिव ॥
श्रीमद्दीपङ्करस्तस्य सूनुर्गुरुनतोऽभवत् ।
दीपङ्करपदाम्भोजरजोरञ्जितमूर्द्धजः ॥
तेन सज्जनदासेन गाढ़मालिङ्ग्य दुर्जनम् ।
संक्षेपतस्तुरङ्गाणां लक्षणं सचिकित्सितम् ॥
अध्यायानां नवत्येव श्लोकाः शतत्रयोदशाः ।
पूर्व्वशास्त्राणि संहृत्य प्रयोगादुपलक्ष्य च ॥
तदेतल्लिखितं किञ्चिदात्मनः स्मरणाय तत् ।
सन्तः स्वीकर्त्तुमर्हन्ति परकीर्त्तिं – – – – ॥
हस्त्यश्वरथपादातं नृपतेः कीर्त्तितं बलम् ।
तत्र मुख्यतया राजन् वाजिनः शत्रुमर्द्दनाः ॥ इत्यादि ।

**End.** तैले च तिलतैलं स्यात् काले च वदरं तथा ॥
निर्घण्टकाध्यायः ।

**Colophon.** इदं चाश्ववैद्यकशास्त्रं दीपङ्करकृतं समाप्तम् ॥

विषयः । अश्वचिकित्साशास्त्रम् ।

---

(७६५।) अश्वायुर्वेदः. By गण. 12 × 4 inches. Folia, 41. Lines, 11 on a page. Extent, 1,353, çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमो भगवते वासुदेवाय ।

प्रणिपत्य धवलतनूमघतिमिरहरं गोपतिंहरशशाङ्कम् ।
अश्वायुर्वेदनिधिं महामतिं शालिहोत्रञ्च ॥
ये शालिहोत्र – – – गर्गैस्तु महर्षिभिः पुरा गदिताः
तुरङ्गशास्त्रयोगाः शान्त्यै विकाराणाम् ।
तेषां मध्या+ +जनसारतरं हयहितार्थमुद्धृत्य
रचितः स्वयं समासेन संग्रहः सिद्धयोगानाम् ॥
धर्म्मार्थकामसिद्धिर्यथा तुरङ्गैर्भवेत् तथा पूर्व्वं
कथितं महामतिभिः तथापि वक्ष्ये समुद्देशम् ।
अश्वैर्हस्तगता पृथ्वी श्रीरश्वैर्विपुलं यशः ।
विजयश्च भवत्यश्वैरश्वा हर्म्म्यविभूषणाः ॥ इत्यादि ।

End. वृषो निम्बं वृहत्यौ च गुडूची कटुका वचा ।
गोमूत्रेण समायुक्तं श्लेष्मघ्नं पित्तमुत्तमम् ॥
काथुपिण्ड । ( अतः परं खण्डितम् । )

विषयः । अश्वायुर्वेदे गणकृते सिद्धयोगसंग्रहे अश्वप्रशंसाध्यायः ।
अश्वायुर्वेदे गणकृते सिद्धयोगसंग्रहे आवर्त्ताध्यायः ।
इति सर्व्वाङ्गलक्षणाध्यायः ।
इति मिश्रको नामाध्यायः ।
अश्वायुर्वेदे गणकृते सिद्धयोगसंग्रहे महादोषाध्यायः ।
तालुगलक्षणम् । कुलाध्यायः । वयोज्ञानम् । वर्णाध्यायः । क्षेत्रविभाग-प्रवेशः । पुण्ड्राध्यायः । व्याधिनिर्द्देशः क्रियासूत्रम् । गुग्गुलुविधिः । लवणविधिः । श्यामाकविधिः । माष-यव-चणक-गोधूम-मुद्ग शस्य-विधिः । रसविधिनिश्चयः । रसवीर्य्यविधिः । द्रव्यगुणदोषनिश्चयः । खादनविधिः । दशमूलविधिः । महातिक्तकविधिः । शिरीषाद्यघृत-विधानम् । पञ्चतिक्तकघृतविधानम् । तैलविधिः । वृहत्-कटुपिण्डिका-विधिः । इत्यादि ।

---

( १५०० ) आचारदीपकम्. By गङ्गाविष्णु. 12 × 4 inches. Folia, 59. Lines, 10 on a page. Extent, 1,622 çlokas. Character, Nāgara. Date, Saka Era, 1674. Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः । निर्विघ्नमस्तु ।

पार्व्वतीनन्दनं वन्दे गजवक्त्रं चतुर्भुजम् ।
भर्तॄणां विघ्नहन्तारं देवं मूषिकवाहनम् ॥
आचारदीपकं नाम सर्व्वाचारं जगद्धितम् ।
स्वल्पपाठोऽल्पबुद्धिश्च निबध्नामि नृपाज्ञया ॥
विद्वद्भिरवलोक्येदं शोधनीयं प्रयत्नतः ।
द्विजातीनां सुकृत्यं हि मुनिसङ्गमतान्वितम् ॥

तत्र दक्षोक्तम् ।

प्रातरुत्थाय कर्त्तव्यं यद् द्विजेन दिने दिने ।
तत्सर्व्वं संप्रवक्ष्यामि द्विजानामुपकारकम् ॥ इत्यादि ।

**End.** आपत्कालेषु विप्रस्य शौचाचारं न चिन्तयेत् ।
स्ववशमुद्धरेत् (?) पश्चात् स्वस्थो धर्म्मं समाचरेत् ॥

देवलः । शास्त्राचम्य (?) शुचित्वं तु न प्रत्यक्षादिसाधनम् ।
शास्त्रं तत् कृतशौचानामाशङ्का नैव विद्यते ॥
इति श्री त्रि० गङ्गाविष्णु० आ० द्रव्यशुद्धिः । ३ ।
आसीद्धर्म्मैकराशिः प्रभुरहह मुकुन्दाभिधानो वदान्यो-
ऽप्यर्थिस्व + नयज्ञः समरविजयकृत् कीर्त्तिसम्पूरिताशः ।
श्रीमान् भूपालचूडामणिविमलपदोऽतिप्रतापानलेन
दग्धारातिर्जितोर्व्वीपतिरमरवरांशावतारो नृपेन्द्रः ॥
तस्यात्मजोऽभून्नृपतिप्रधानो-
ऽनङ्गीतिनामा सुकृती वदान्यः ।
त्रिशृङ्गदेशादिमहीधरोऽस्य
हम्बीरनामाभवदात्मजाग्र्यः ॥

20

राजा मुख्यस्तत्सुतोऽभूत् तुलाख्य-
स्तत् पुत्रो जातः प्रतापाभिधश्च ।
शौर्य्यौदार्य्योजान्वितौ प्राप्य पुत्रौ
यः स्वर्वासं प्राप्तवान् यौवराज्ये ॥
तत्-पुत्रो दामोदरसंज्ञोऽभूत् भूपालोऽभूद् दयालुः ।
भूभृत्-कृत्यज्ञोऽस्य सुतोऽभूत् कीर्त्त्या युक्तो दिग्विजयाख्यः ॥
कामराजदत्तनामकोऽभवत् तदात्मजो
राज्यसौख्यनिस्पृहश्शमादिसंयुतः ।
तस्य योऽभवत् सुतस्त्रिविक्रमाभिधो नृपः
शत्रुवर्गनाशकृत् स्ववर्गपालकः सुधीः ॥
दन्तिचित्योर्दानदो नीतिकर्त्ता
विद्यावन्तो यत्र गर्ज्जन्ति सार्थाः ।
कृत्याकृत्यालोचनार्थं निबन्धं
कर्त्तुं सो मामाश्रितं त्वादिदेश ॥
विद्वान् गौतमवंशजो द्विजवरः श्रीरामभद्राभिध-
स्तत्पुत्रो जयदेवनामधरणीदेवोऽभवत् पुण्यवान् ।
तत्पुत्रोऽल्पमतिर्निबन्धमकरोदाचारदीपाभिधं
गङ्गाविष्णुरनेक + + मवलोक्याज्ञाधरो भूपतेः ॥
यद्यपि ग्रन्थनिर्म्माणयोग्यमध्ययनं न मे ।
तथापि क्षम्यतां प्राज्ञैः साहसोऽयं नृपाग्रहात् ॥

Colophon. इति श्रीत्रिविक्रमनृपाज्ञया गङ्गाविष्णुद्विजविरचित-आचारदीपकग्रन्थः समाप्तः ॥

श्रीशाके १६७४ ज्यैष्ठ शुदि ५ पञ्चमीलिखितमिदं पुस्तकं शिवशर्म्म-भुवनेशाभ्याम् ।

विषयः । इति० आत्मचिन्तनविधिः ।
,, मूत्रपुरीषोत्सर्गविधिः ।
,, शौचविधिः ।
,, दन्तधावनविधिः ।

इति० यज्ञोपवीतविधानम् ।

,, दर्भविधिः ।

,, प्रणवविधिः ।

,, प्राणायामविधिः ।

,, स्नानविधिः ।

,, वस्त्रतिलकविधी ।

,, सन्ध्याविधिः ।

,, अभिवादनविधिः ।

,, मङ्गलावीक्षणविधिः ।

,, सामान्यदेवपूजा ।

,, अध्ययनविधिः ।

,, योगक्षेमविधिः ।

,, मध्याह्नस्नानतर्पणविधिः ।

,, गृहदेवार्चनविधिः ।

,, वैश्वदेवबलिनित्यश्राद्धकर्म्मविधिः ।

,, भोजनविधिः ।

,, सायंसन्ध्याहोमादिरात्रिपूर्व्वार्द्धकृत्यविधिः ।

,, शयनस्त्रीगमनविधिः ।

,, योगप्रकारः ।

,, स्पृष्टास्पृष्टविधिः ।

,, द्रव्यशुद्धिः ।

---

((३)११८।) काकचण्डेश्वरीमतम् . $10 \times 3\frac{1}{2}$ inches. Folia, 50. Lines, 7 on a page. Extent, 700 çlokas. Character, Nāgara. Date, (?). Appearance, new. Verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।

भगवादिदेवदेवेशमहं पृच्छामि शङ्करम् ।

स्कन्दाद्याश्च महामाया भक्ता चैव विनायकैः ॥

( १५६ )

श्रीवक्रतुण्डाय नमः ।

कैलासशिखरासीन उमासार्द्धं जगद्गुरुः ।
योगिन्यष्टकतन्त्रे च गुह्याद् गुह्यतरं परम् ॥
सर्व्वज्ञानप्रकाशाय सर्व्वज्ञा सर्व्वकृत्क्रुधः ।
एतैः कार्य्यं कथं देव त्वया सर्व्वं ममोपरि ॥

श्रीईश्वर उवाच ।

कङ्काली कालरात्री च काकचण्डा च चाम्बिका ।
कङ्काली कालरात्री च काकचण्डेश्वरी मता ॥
एवमाद्या तथा कान्यौ योगिनीगणनायकैः ।
नृत्यवाद्यवचोभेदैः सानन्दैर्हृष्टचेतसाम् ॥
ततस्तं भैरवं देवं योगिनीगणवेष्टितम् ।
केचित् स्तुवन्ति संहृष्टाः केचित् स्तुवन्ति हृष्टकाः ॥
केचिन्नृत्यन्ति तस्याग्रे केचिद्धास्यञ्च कुर्व्वते ।
एतैस्तु ज्ञानभक्तैस्तु अर्चितस्तत्र भैरवः ॥

श्रीदेव्युवाच ।

दृष्ट्वा तु भैरवं देवं पञ्चवक्त्रं त्रिलोचनम् ।
सानन्दं त्रिदशेशञ्च बद्धाञ्जलिरभाषत ॥
काकचण्डेश्वरी देवी उमादेवी च भैरवी ॥

श्रीभैरव उवाच ।

सारभूतं यथा देवि महाज्ञानञ्च निर्भयम् ।
ज्ञानवादात्तु यत्पूर्व्वं मानवैश्चाल्पसिद्धिदः ॥
न पश्यति इदं ज्ञानमल्पपादै सगामिनाम् ।
वेदानाञ्च वयोऽर्थेन न सिद्धिस्तेन विद्यते ॥
अथवा संवरारोहे काकचण्डेश्वरीमते ।
मुक्तार्थं निखिलं देवि सर्व्वोपाधिविवर्जितम् ॥

श्रीकाकचण्डेश्वर्य्युवाच ।

कथं काये स्थितो जीवः कोऽसौ जीवः प्रकीर्त्तितः ।
कस्मात् स कुरुते कर्म्म स्थितः संसारपञ्जरे ॥

जराव्याधिदरिद्रेण ग्रस्तः संसारबन्धने ।
एके क्रमन्ति जंघत्वे एके स्कन्धवहेन तु ॥
जयशब्दश्च माङ्गल्यं एकस्यानेकजन्तवः ।
किं कुर्व्वाणमकुर्व्वन्ति तस्मात् त्वं ब्रूहि शङ्कर ॥

श्रीईश्वर उवाच ।

शृणु त्वं काकचाण्डे साधकानां हितं प्रिये ।
गुह्याद्‌गुह्यतरं वाक्यं त्वया पृष्टं वरानने ॥
कथयामि समासेन काकचण्डेश्वरि शृणु ।
योऽसावात्मा परो नित्य अनादिनिधनेश्वरः ॥
स्वरूपं निर्गुणं वापि सर्व्वव्यापी निरामयः ।
अनादिकर्म्मसम्बद्धः कायस्थो भवने सदा ॥
जीवोपाधिमयं कर्म्म अज्ञाने संप्रवर्त्तते ।
तस्मात् कर्म्म प्रयत्नेन संसारे सेवते त्वसौ ॥
करोति विविधं कर्म्म संसारे काममोहितः ।
द्रव्योपायं न जानाति कालभोगेन हेतुना ॥

.. .. .. .. .. .. ..

.. .. .. .. .. .. ..

एकस्तु कथितं भद्रे यत् त्वया परिपृच्छता ।
किमन्यत् पृच्छसे भद्रे तथान्यत् कथयाम्यहम् ॥
काकचण्डेश्वरीशास्त्रं कथितं निश्चयाम्यहम् ॥

इति काकचण्डेश्वरीमते ।

काकचण्डेश्वर्य्युवाच ।

कथयामि महादेव कामभोगप्रसाधनम् ।
अर्थः संपद्यते येन अक्लेशात् परमेश्वर ॥
तदहं श्रोतुमिच्छामि कथयस्व प्रसादतः ।
पादुकापलयो पञ्च दिव्यस्त्रीकामसाधनम् ॥
अञ्जनं ईदृशञ्चैव गुटिका चैव खेचरी ।
साधकानां हितं देव भूचराकाशगामिनी ॥

जलुकाबन्धमित्याह धातुवादरसायनम् ।
जारणं मारणञ्चैव अभ्रकस्य च द्रावणम् ॥
अर्थोपायञ्च देवेश ब्रूहि मे त्रिपुरान्तक ।
रसकर्म्म यथा देव सारभूतं वदस्व मे ॥

महादेव उवाच ।

शृणु त्वं काकचासुण्डे साधकानां हितं प्रिये ।
कथयामि समासेन प्रश्नं यत् सिद्धिसाधनम् ॥
न द्रव्येण विना सिद्धिर्न भोगं काममेव च ।
द्रव्यहीना नरा मर्त्त्ये प्रेतरूपेण संस्थिताः ॥

.. .. .. .. .. .. ..

.. .. .. .. .. .. ..

तस्मात् साधय देवेशि रसेन्द्रं साधकेश्वरः ।
तदेवं कथयाम्यस्य साधकानां हितं प्रिये ॥ इत्यादि ।

**End.** कृष्णसारमृगशृङ्गकं यथा सूक्ष्मचूर्णकृतहण्डिकास्थितम् ।
भावयेत् खुहिलमोचिकारसे उद्धृतं सम्पुटवह्निदाहितम् ॥
चण्डेश्वराख्यं प्रवदन्ति सन्तः दत्वा जलेनैव सव्योषकररम् ।
प्रभातकाले ह्युदयोदये वा भूतं ज्वरं शान्तिमुपैति चोक्तः ॥
कुष्ठं गन्धकविषदोत्रिफला पारदः समः ।
भृङ्गाम्बुमर्द्दिताश्चैते मुद्गमाषवत्रीकृताः ॥
ज्वरं हन्त्यष्टभिर्यामैस्त्वष्टप्रहरकाणि वा ॥

**Colophon.** इति काकचण्डेश्वरीमतं समाप्तम् ॥ शुभमस्तु सदा ।

---

(१५४६ ।) कातन्त्रविस्तरः. By वर्द्धमान. 12×3 inches. Folia, 85. Lines, 6 on a page. Extent, 1,638 çlokas. Character, Nāgara. Date, Samvat, 1589. Appearance, old. Prose. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

महेश्वरं नमस्कृत्य कुमारं तदनन्तरम् ।
सुगमः क्रियतेऽस्माभिरयं कातन्त्रविस्तरः ॥

अभियोगपराः पूर्व्वं भाषायां यत्र प्रपेदिरे ।
प्रायेण तदिहास्माभिः परित्यक्तं न किञ्चन ॥
सिद्धो वर्णसमाम्नायः । तत्र चतुर्द्दशादौ स्वराः । दश समानाः तेषां द्वौ द्वावन्योन्यस्य सवर्णौ ॥ इत्यादि ।

End. अनुपसर्गात् फुल्लक्षीवकृशोल्लाघाः । उत्फुल्लसंफुल्लपरिकृशाः । अवर्णादूटो वृद्धिः ॥

Colophon. इति श्रीमत्कर्णदेवोपाध्यायश्रीवर्द्धमानविरचिते कातन्त्रविस्तरे कृत्प्रकरणे षष्ठः पादः समाप्तः ॥ संवत् १५८९ समए कार्त्तिकशुदि तृतीया गुरौ । मिश्र – – – लिखापितम् । शुभं भवतु ।

विषयः । इति श्रीमत्कर्णदेवोपाध्यायश्रीवर्द्धमानविरचिते कातन्त्रविस्तरे प्रथमः सन्धिः समाप्तः ।
,, द्वितीयः सन्धिः समाप्तः ।
,, तृतीयः सन्धिः समाप्तः ।
,, चतुर्थः सन्धिः समाप्तः ।
,, पञ्चमः सन्धिः समाप्तः ।
,, नाम्नि प्रथमः पादः समाप्तः ।
,, ,, द्वितीयः ,, ,, ।
,, ,, तृतीयः ,, ,, ।
,, कारके प्रथमं प्रकरणम् ।
,, ,, द्वितीयं ,, ।
,, ,, तृतीयं ,, ।
,, ,, चतुर्थं ,, ।
,, समासविस्तरे प्रथमं प्रकरणम् । द्वितीयं । तृतीयं । चतुर्थञ्च ।
,, तद्धिते प्रथमं प्रकरणम् । ततः – २—१० प्रकरणानि ।
,, आख्यातविस्तरे प्रथमं प्रकरणम् । ततः – २—७ प्रकरणानि ।
,, कृद्विस्तरे प्रथमं प्रकरणम् । ततः – २—६ प्रकरणानि ।

इति समाप्तम् ।

( १२९४ । ) **कालमाधवकारिकाव्याख्यानम्** . 10 × 4 inches. Folia, 32. Lines, 11 on a page. Extent, 990 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose. Incorrect.

**Beginning.** श्रीमहागणाधिपतये नमः ।

नत्वा गजाननदेवमगजाननदेव – – ।
कालमाधव – – – – विरचिष्ये यथामति ॥
विघ्नविघाताय मङ्गलमाचरति । वागीशाद्या इति । इत्यादि ।

**End.** त्रयोदश्यादित इति । एतदपवादं दर्शयति नित्यनैमित्तिकेति ।

**Colophon.** इति श्रीमद्धर्म्मशास्त्रपारावारीणा – – सद्रामचन्द्रभट्टात्मजभट्ट-वैद्यनाथसूरिकृते कालमाधवीयकारिकाव्याख्याने पञ्चमं प्रकरणं सम्पूर्णं ।
काशीविश्वेश्वरो विजयते । शुभमस्तु ।

---

(२) १३० । ) **कालीकुलार्णवतन्त्रम्** . 12 × 4 inches. Folia, 56. Lines, 7 on a page. Extent, 1,176 çlokas. Character, Newārī. Date, Newār Era, 867. Appearance, fresh. Prose and verse. Incorrect.

**Beginning.** ॐ नमो गणाधिपाय ।

श्रीवीरनाथोवाच ।

कैलासशिखरासीनं देवं त्रिभुवनेश्वरम् ।
प्रणम्य शिरसा देवी पृच्छते कालिका हरम् ॥
ॐ गुह्यकालिकाये । तथातो अथर्व्वणसंहितायां ।

श्रीदेव्युवाच ।

ॐ मर्म्माभिघातिनी नमोनमः ।
सामरस्य स्थिता देवो द्वैताद्वैतविवर्जितः ।
पृच्छते कालिका देवी भैरवं भुवनेश्वरम् ॥
प्रलयानलसङ्काशं जगद्रक्षणतत्परम् ।
देवाधिदेवतं भीष्मं द्वैताद्वैतस्य स्थापनम् ॥
येन तेषां प्रतृप्यन्ते तेषां तत्र महत् फलम् ।
तत्र तेषां महाधर्म्मा अद्वैतं नित्यभावनः ॥

द्वैतं विकल्पकं चैव अद्वैतं कथयस्व मे ।
इति पृष्ट्वा तया देवो कालिका र्त्तिणाद्वयम् ।
गुह्यकाल्याक्रमं पुण्यं षडाम्नायप्रपूजितम् ॥

श्रीभैरव उवाच ।

शृणु देवी महागुह्यं प्रलयानलसन्निभम् ।
कथयामि समासेन गोपनीयं प्रयत्नतः ॥ इत्यादि ।

**End.** ॐ फ्रं सिद्धिकालीके आद्यायननवपञ्चचक्रेश्वरीमिलयघोराट्टहासिनी कलासहस्रनिवासिनी खं ३ ह्स्रौं फ्रं ३ अवर्णेश्वरी प्रकृत्यापरशिवनिर्व्वाणदायिनी स्वाहा । १०० मूलशताक्षरीमन्त्राः ॥

**Colophon.** इति श्रीकालीकुलार्णवं सम्पूर्णं ॥
यादृशं पुस्तकं — — — । शुभ सम्वत् ८६१ पौष शुदि ७ सोमदिने सम्पूर्णं लिखितमिति शुभम् ।

---

( १५३८ । ) कालीतत्वम् (आचारप्रतिपादनतत्वम्) (खण्डिताद्यम्) By राघवभट्ट. 10 × 3 inches. Folia, 15 ( leaves 1–3 are missing). Lines, 7 on a page. Extent, 177 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

**Beginning.** ( ४र्थ पत्रस्य प्रारम्भवाक्यं लिखितम् । )

कालीतन्त्रेऽपि ।

वलिदानं विना देवि हिंसां सर्व्वत्र वर्जयेत् ॥ इति ।
वीरद्रव्यापहारी च दिव्यस्त्रीनिन्दकस्तथा ।
कौलतन्त्रमनूनाञ्च साधकानां तथा पुनः ॥
कौलिको निन्दको यस्तु प्रायश्चित्तं समाचरेत् ॥
इति धर्म्मलोपादिजातपापक्षयार्थं धर्म्मप्राप्त्यर्थञ्च दिव्यवीरयोरर्च्चनं कुर्य्यात् ॥ इत्यादि ॥

**End.** नित्या नैमित्तिकी काम्या दिनरात्र्युभयक्रमात् ।
कर्त्तव्या कुलशास्त्रज्ञैः पूजावैभवविस्तरैः ॥

21

Colophon. इति श्रीराघवभट्टविरचिते श्रीकालीतत्त्वे आचारप्रतिपादनं नामैकादशतत्त्वम् ॥

विषयः । तान्त्रिकाणामाचारनिरूपणम् ।

---

(१५३८।) कालीतत्त्वम् (प्रायश्चित्तविधिः) By राघवभट्ट. 10×3 inches. Folia, 5. Lines, 7 on a page. Extent, 60 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Incorrect.

Beginning. अथ प्रायश्चित्तविधिरुच्यते ।
तदुक्तं लिङ्गागमे ।
शृणु देवि प्रवक्ष्यामि प्रायश्चित्तमनुत्तमम् ।
तद्विशुद्धिविधिश्चैव भैरवेण भाषितम् ॥
गुरुत्यागकरः शिष्यः प्रायश्चित्ती भवेद्ध्रुवम् ।
लक्षं श्रीपादुकां जप्त्वा तस्मात् पापाद् विशुध्यति ॥ इत्यादि ।

End. तत्प्रायश्चित्तहीनानामशक्तानां कुलेश्वरि ।
दिव्यवीरार्चनं तेषां प्रायश्चित्ताय कल्प्यते ॥

Colophon. इति श्रीराघवभट्टविरचिते कालीतत्त्वे प्रायश्चित्तविधौ चतुर्दशतत्त्वं ।

---

(१६६३।) कुलसारसङ्ग्रहः (आदिखण्डितः). 11×3 inches. Folia, 7. Lines, 7 on a page. Extent, 107 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Incorrect.

Beginning. – – – विधिं देव श्रोतुमिच्छामि तत्त्वतः ।
एतन्मे संशयं छिन्धि केन चिन्त्यमिदं मतम् ॥
श्रीईश्वर उवाच ।
– – ते कथयिष्यामि कुलसारं समासतः ।
एतत् प्रसन्नो मे देवि ब्रह्माग्रे कथितं पुरा ॥
तत्र ब्रह्मा समग्रेण निजगाद यथा शृणु ॥ इत्यादि ॥

End. विश्वस्तम्भानि कर्माणि – – – – मारणम् ।
जयस्मि विभवे न्यूनं तस्य तुल्यं कथं सुराः ॥

**Colophon.** इति श्रीअमृतमथने सोमभुजङ्गवल्यां कुलसारसङ्ग्रहे षट्त्रिंशति-पटलः समाप्तः ॥

सोमभुजङ्गपद्धतिमिति समाप्तः ॥

शुभमस्तु साधकानां ॥

---

( १४१२ । ) गणकमण्डनम्. By नन्दिकेश्वर. 12×4 inches. Folia, 8. Lines, 12 on a page. Extent, 252 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।

नत्वा देवं गणेशञ्च श्रीमद्वेदाङ्करायजः ।

नन्दिकेश्वरसंज्ञोऽहं वक्ष्ये गणकमण्डनम् ॥

पूर्व्वाश्लेषा च मूलाग्निमघा – – – – नि च ।

अधोमुखानि भान्येषु खननोद्धारणानि च ॥

हस्तत्रयं – – – – – – – मित्रादित्येन्द्रभानि च ।

तिर्य्यङ्मुखानि तेषु स्यात् पशूनां दमनादिकम् ॥

— — — —

मृदुध्रुवचरक्षिप्रैर्व्विदितैः प्रथमार्त्तवम् ।

शुभं समूल – – शेषे – – सुखावहम् ॥

इति प्रथमार्त्तवं । इत्यादि ।

**End.** पुष्यः परकृतं हन्ति न तु पुष्यकृतं परः ।

दोषस्त्वनिष्टगेपीन्दौ पुष्यः सर्व्वार्थसाधकः ॥

इति पुष्यार्कप्रशंसा ।

— — ( अतःपरं खण्डितम् । )

विषयः । इति प्रथमार्त्तवम् ।

,, ऋतुस्नानम् ।

,, गर्भाधानम् ।

,, सीमन्तोन्नयनम् ।

,, सूतिकागृहप्रवेशः ।

इति कर्णवेधः ।

,, अक्षरप्रवेशः ।

,, शिल्पविद्यारम्भः । इत्यादि ।

---

( १४१२ । ) गायनलोचनम् . 10×4 inches. Folia, 4. Lines, 8 on a page. Extent, 80 çlokas. Character, Nāgara. Date, Saka Era, 1706. Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

अथ गायनलोचनानि लिख्यन्ते ।

प्रातर्गेयस्तु देशाख्यो ललितः पटमञ्जरी ।
विभाषो भैरवी चैव कामोदो गोण्डगीर्य्यपि ॥
एकावराड़ी मध्याह्ने सायं कार्णाटमालवौ ।
नाटश्चैव विशेषेण प्रेषा ज्ञेयास्तु सर्व्वदा ॥
नाटो गौड़ो वराड़ी च गुर्ज्जरी देशिरेव च ।
पूर्व्वाह्ले गानमेतेषां निषिद्धमिति सद्विदः ॥ इत्यादि ।

**End.** दैवदानवगन्धर्व्वाः सदा गीतानि कुर्व्वते ।
मया च सेवितं गीतं तस्माद्गीतं प्रशस्यते ॥

**Colophon.** इति गायनलोचनं समाप्तम् ।

सङ्गीतचूड़ामणौ ।

तकारे पवनः प्रोक्त एकारे कमलासनः ।
नकारे नन्दिकेशः स्यादाकारे मधुसूदनः ॥
ब्रह्मा-विष्णु हराद्याश्च रागे तिष्ठन्ति सर्व्वदा ।
तेन सङ्गीतमात्रेण विघ्नं नश्यति निश्चितम् ॥
शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गीतं फणी तथा ।
हा कष्टं शिव साक्षी त्वं न विदन्ति सुता मम ॥
गुणिहस्तगताः काष्ठशिलाद्याः शिल्पसाधनम् ।
निरक्षरनरः कोऽपि न जानाति गुणक्रमम् ॥
श्रीशङ्करः प्रीयतात् । श्रीशाके १७०६ भाद्रवदि ५ ।
सद्दिने लिखितमिदं किरीटमालिशर्म्मणा ॥
लेखकपाठकयोः शुभमस्तु ।

---

(११६७।) गोलोद्देशः. By दामोदर. 11×3 inches. Folia, 62. Lines, 9 on a page. Extent, 1,589 çlokas. Character, Nāgara. Date, Newār Era, 830. Appearance, fresh. Verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।

रुष्टे यस्मिन्नवृष्टिः स्यात् तुष्टे यस्मिन् सुवृष्टयः ।
सर्व्वसिद्धिप्रदातारं तं वन्दे दुण्ढिनायकम् ॥
— — — गोलरचनां युक्तिसिद्धां मनोरमां ।
प्रवक्ष्याम्यविरोधेन ज्योतिःशास्त्रपुराणयोः ॥
गर्गः । यतो वाचो निवर्त्तन्ते मनो यत्र न गच्छति ।
नित्येदुस्येश्वरस्येच्छा वेदरूपा विजृम्भते ॥
ब्रह्म-विष्णु-महेशाद्या ब्रह्माण्डानि च देवताः ।
पूर्व्वं नानाविधाः सृष्टाः सृजिष्यत्यप्यनेकधा ॥
प्रोक्तं वेदेषु तत्सर्व्वमिदानीन्तनमुच्यते ।
रामचन्द्र महाराज ब्रह्मण्यस्मिन् प्रजापतौ ॥
ब्रह्माण्डं यादृशं सृष्टं तादृशं शृणु तत्त्वतः ॥ इत्यादि ।

**End.** कुरुवंशोद्भवो राजा कुन्तीपुत्रो युधिष्ठिरः ।
वेदवेदाभ्ररामाब्दं स्वं शकं चालयिष्यति ॥
३०४४ जातेऽधर्म्मे पुनाराजा विक्रमार्को भविष्यति ।
पञ्चत्रिचन्द्रवर्षाणि स्वं शकं चालयिष्यति ॥
१३५ शालिबाहो नृपो नाम शङ्कराराधने रतः ।
ततः खव्यष्टचन्द्राब्दं स्वं शकं चालयिष्यति ॥
१८३० नागार्ज्जुनस्ततो भूपो हत्वा म्लेच्छगणं रणे ।
चतुर्लक्षमिताब्दानि स्वं शकं चालयिष्यति ॥
४००,००० दुष्टम्लेच्छघ्नविजयाभिनन्दनमहीश्वरः । ?
अयुताब्दं स्वीयशकं चालयिष्यति धर्म्मराट् ॥
ततो जातेषु बौद्धेषु म्लेच्छेषु भगवान् हरिः ।
कल्की भूत्वा स्वर्गगजवर्षैः सर्व्वान् हनिष्यति ॥
इति दुण्ढिराजगणेशस्य नामोच्चारणपुण्यतः ।
गोलोद्देशः संगृहीतो नातिसंक्षिप्तविस्तृतः ॥

**Colophon.** इति दामोदरकृतौ गोलोद्देशे कालनिर्द्देशादेशो दशमः ॥

इति गोलादशः पफाशा । अथ संख्यापक ११०० ।

अभ्ररामगजे संख्ये नेपालाब्दे गते रवौ ।

नवम्यां वरुणे पक्षे गोलाध्यायो व्यलीलिखत् ॥

विषयः । इति० पातालनिरूपणं प्रथमः ।

इति० मृत्युलोकनिरूपणम् । २ ।

इति० स्वर्गनिरूपणम् । ३ ।

इति० मध्यगतिवासनाधिकारः । ४ ।

इति० स्पष्टगतिवासनाधिकारः । ५ ।

इति० त्रिप्रश्नवासनाधिकारः । ६ ।

इति० ग्रहणादिवासनाधिकारः । ७ ।

इति० नक्षत्रसंस्थानाधिकारः । ८ ।

इति० उत्पातोत्पत्त्यधिकारः । ९ ।

इति० कालनिर्द्देशादेशः । १० ।

---

(१४१२ ।) ग्रहदर्पणः By गौरीश्वर. 12×4 inches. Folia, 12. Lines, 9 on a page. Extent, 270 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः । श्रीगुरवे नमः ।

यद्भुजाग्रे गाढमतः परीतं

जगन्नवीभूतमिव प्रभाति ।

महोनिधिर्विश्वविभुस्त्रिमूर्त्तौ

रविर्मुदे नोऽस्तु स देवदेवः ॥

गिरं गणेशं विधिविष्णुरुद्रान् गुरून् ग्रहानर्कमुखांश्च मूर्द्ना ।

प्रणम्य गौरीश्वर आतनोति ब्रह्मोक्ततुल्यं ग्रहदर्पणाख्यम् ॥

शाकोऽङ्कमेघाग्नि ३१७९ युतः कलेः

स्यात्क्षास्ताब्दपिण्डाश्च युगावधीह । (?)

युगाधिकश्चेद् युगशेषितोऽसौ

युगाश्च दन्त्यङ्कयुतैः शरद्भिः ॥ इत्यादि ।

**End.** चरज्यार्क ११ घातस्त्रिभज्योद्धृतं तत्
फलं वर्गितस्वाक्षभावर्गयुक्तम् ।
हृता तत्पदेनार्कनिघ्नीचरज्या
भवेत् सापमज्या ततः प्राग्वदर्कः ॥

इतीह० । तथाधिकारोऽप्यगमत् तृतीय-
स्त्रिप्रश्नसंसाधनहेतुरेषः ॥
( अतः परं खण्डितम् ॥ )

**विषयः ।** इतीह गौरीश्वरसम्मितेऽर्कसिद्धान्ततुल्ये ग्रहदर्पणाख्ये ।
खचारमध्यानयनाधिकारो गतोऽयमाद्यो गणितज्ञहृद्यः ॥
इतीह० ।
एष ग्रहाणां स्फुटकर्मसिद्धेर्हेतुर्द्वितीयोऽपि गतोऽधिकारः ॥
इतीह० ।
तथाधिकारोऽप्यगमत् तृतीयस्त्रिप्रश्नसंसाधनहेतुरेषः ॥

---

( २ ) ३२ । ) ग्रहप्रकाशः By काशीनाथ. 11 × 4 inches. Folia, 22. Lines, 9 on a page. Extent, 396 çlokas. Character, Nāgara. Date, Saka Era, 1735. Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुचरणारविन्देभ्यो नमः ।

श्रीसूर्यनारायणमादिदेवं
चतुर्भुजं भास्करमण्डलस्थम् ।
त्रयीमयं विश्वविबोधहेतुं
तं नौमि नित्यं धिषणाप्तिसिद्ध्यै ॥

प्रणम्य मूर्द्ध्ना गणपं गिरित्रं गिरं गुरुं श्रीनृहरिं पितृंश्च ।
ग्रहप्रकाशं मिहिरोक्तिरीत्या सिद्धान्तसारस्य दकं व्यनक्ति ॥

.. .. .. .. .. ..

श्रीसूर्यसिद्धान्तमतं समस्तमुद्धृत्य सारं नरदेवतुष्ट्यै ।
स्वल्पक्रियं दैवविदां हिताय खेगामिनां स्पष्टतरं सुबोधम् ॥

इत्यादि ।

End. ब्रह्मोक्तं सकलं वशिष्ठमुनिवर्य्योक्तं तथा कीर्तितं
दृष्ट्वा तत्वविवेकभेदममलं श्रीसौरभाष्यादिकम् ।
सिद्धान्तोक्तमहाखिलं लघुकृतं सिद्धान्तसाराख्यं
नाल्पोच्चं करणं श्रीसूर्य्यभणितं श्रीकाशिनाथोऽकरत् ॥

Colophon. इतीह सौरोक्तग्रहप्रकाश-
राजेन्द्रविक्रमनृपस्य जनुःप्रकाशात् ।
श्रीकाशिनाथगणकेन विनोदितोऽय-
मलंकृतोऽयमगमत् समाप्ति ॥ ?
सूर्य्योपदेशाल्लिखितं मयात्र एकादशाख्योऽधिगतोऽधिकारः ।

विषयः । इतीह० । खेगामिमध्यानयनाधिकारः ॥
,, पञ्चाङ्गपत्रानयनाधिकारः ॥
,, न भोगपष्टानयनाधिकारः ॥
,, त्रिप्रश्नसंज्ञानयनाधिकारः ॥
,, श्रीतांशुपर्व्वानयनाधिकारः ॥
,, मार्त्तण्डपर्व्वानयनाधिकारः ॥
,, चन्द्रार्क .. पर्व्वद्वयाधिकारः ।
,, पातद्वयो साधनकोऽधिकारः ॥ (?)
,, सौरादिमानानयनाधिकारः ॥
,, कालस्य विम्बानयनाधिकारः ॥

---

(१६१२ ।) चतुरङ्गतरङ्गिणी By वंशमणि. 12×2 inches. Folia, 15. Lines, 4 on a page. Extent, 165 çlokas. Character, Maithila. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

Beginning. ॐ नमस्तस्यै ॥
यत् त्वं केलिपणे पराजितवती कल्याणि शोणाम्बुजं
तद्देहि + तदीश दर्शय करं हे नाथ तद्दृश्यताम् ।
इत्युक्ते रमया करेण कलहं तस्याः कराम्भोरुहं
स्मेरस्मेरमुखः सुखाय जगतां देवोऽस्तु दामोदरः ॥

श्रीकृष्णानन्दरायस्य वाचा विनयशालिनः ।
बुधो वंशमणिश्चक्रे चतुरङ्गतरङ्गिणीम् ॥ इत्यादि ॥

**End.** हनने यत्र वटिकाद्वयशेषोऽस्ति – – – ।
उत्थानं तच्चतूराजी – – – प्रकीर्त्तितौ ॥
तादृशहननप्रवेश – – – – मुत्थानत्वमित्यर्थः ॥

**Colophon.** इति श्रीमद्दो – – – – वंशमणिकृतायां चतुरङ्गतरङ्गिण्यां द्वितीयप्रवेशादितरङ्गः । समाप्ता चेयं चतुरङ्गतरङ्गिणी ।

---

(११९२।) चमत्कारचिन्तामणिः. By ऋषि. 6×3 inches. Folia, 7. Lines, 13 on a page. Extent, 182 çlokas. Character, Nāgara. Date, (?). Appearance, old. Verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।
न चेत् खेचराः स्थापिताः किं चक्रे
न चेत् स्पष्टगाः स्थापितैर्ग्रहैन्द्रैः ।
अभावाद्धि ते स्पष्टता कोऽत्र हेतुः
फलैरेव सर्व्वं ब्रुवे तानि तस्मात् ॥
तनुस्थो रविस्तुङ्ग × ष्टि विधत्ते
मनस्थं तपे दारदायादवर्गात् ।
वपुः पीड्यते वातपित्तेन नित्यं
स वै पर्य्यटन् ह्रासवृद्धिं प्रयाति ॥
धने यस्य भानुः स भाग्याधिकः स्यात्
चतुष्पात् सुखं सद्व्ययं स्वं च पाति ।
कुटुम्बे कलिर्जायते जाययापि
क्रिया निष्फला याति राभस्यहेतोः ॥ इत्यादि ।

**End.** शिखी रिपुगः पादनेत्रे च पीडा
स्वयं राजतुल्योऽप्ययं सत्करोति ।
रिपुर्नाशनं मातुले × × शर्म्म-
रुजैः पीड्यते वस्तिगुह्ये सदैव ॥
इति केतुभावफलम् ॥

22

**Colophon.** इति ऋषिविरचिते चमत्कारचिन्तामणौ भावाध्यायः समाप्तः ।

विषयः । रविभावफलम् । चन्द्रभावफलम् । भौमभावफलम् । बुधभावफलम् । गुरुभावफलम् । शुक्रभावफलम् । शनिभावफलम् । राहुभावफलम् । केतुभावफलम् ॥

---

(३)७६ ।) चिकित्सामृतम् (मध्यखण्डितम् ।) By मिल्हन. 12 × 5 inches. Folia, 134. Lines, 7 on a page. Extent, 2,437 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

बीजं श्रुतीनां सुधनं मुनीनां
जीवं जडानां महदाद्रिकानाम् ।
आग्रियमस्त्रं भवपातकानां
किञ्चिन्महः श्यामलमाश्रयामि ॥
एक्वा कपोलमधुवारि मधुव्रताली
कुम्भस्थलीमदविभूषणलोहिताङ्गी ।
माणिक्यमौलिरिव राजति यस्य मौलौ
विघ्नं शतं हरतु विघ्नपतिः सदा वः ॥

.. .. .. ..

केचित् सन्ति निघण्टवोऽतिलघवः केचिन्महान्तः परे
केचिद् दुर्गमनामकाः कतिपये भावस्वभावस्थिताः ।
तस्मान्नापि लघुर्न वापि विपुलः ख्यातादिनामा सतां
प्रीत्यै द्रव्यगुणान्वितोऽयमधुना ग्रन्थो मया बध्यते ॥
. सर्व्वकार्य्येण यत् साध्यं प्रकारस्थितिकारणम् ।
आयुर्वेदोपदेशस्तु कथ्यमानः सुखावहः ॥

(श्लोकाश्चैते चिकित्सामृतस्य किं न वेति महान् सन्देहः । मन्ये चास्य प्रथमपत्रं नास्ति । अतो द्वितीयपत्रस्य प्रारम्भवाक्यं लिख्यते ।)

... वरस्य ।
दीप्तानलस्यापि विपाकशुद्धि-
स्तस्यातिसारः सममेव यातः ॥

अतीसारनिदानं ।

आशावामातिसारे त्रिकगुदतृषणा.... स्थूलाभिपत्ते
तापा....सगार्त्ति प्रबलतरमहारोषकाद्येति गन्धे ।
अस्मिन् दोषानुसारव्यतिकरविहितैर्लङ्घनाद्यैरुपायैः
क्वाथैः पेयादिपथ्यैः कृतपुटविधिभिर्भेषजैः....मकुर्य्यात् ॥
अवेदनं सुसंपक्वं दीप्ताग्नेः सुचिरोत्थितम् ।
नानावर्णमतीसारं पुटपाकैरुपाचरेत् ॥ इत्यादि ॥

**End.** शुष्कं कासति यः प्रभातसमये सम्पूर्णकायोऽथवा
हीनाङ्गः कफकासवानथ निजं छायां विकारावृताम् ।
पश्यत्येव मुखं न दर्पणगतं यो वातिसारी भृशं
शूनो वा जठरे नरः स नियतं प्राप्नोति याम्यं सुखम् ॥
इति कतिपयवृत्तैः सारभूतं मयोक्तं
पटुमतिपठनार्थं प्राणिरिष्टप्रबन्धम् ।
विविधमुनिसुवाक्यैश्चापरैः सूक्ष्मरूपं
विदुरखिलगदज्ञा दीर्घपाठ+सारे ॥

**Colophon.** इति चिकित्सामृते मिल्हनकृते रिष्टाधिकारः ॥
पूर्व्वाचार्य्यप्रबन्धोदधिपरिमथनात् प्राप्य फेनोपमानान्
योगान् सिद्धोपयोगान् प्रविहितममलं सच्चिकित्सामृताख्यम् ।
नानाच्छन्दोविनोदानुभवपरिलसच्छास्त्रमेतद्भिषग्भ्य-
स्तावद्दद्यात् सुभूभृत्सदसि वरयशोवावलम्बी पयांसि ॥ १
श्रीसूरसेनदेशे त्रिभुवनपालेन भूमिपालेन ।
त्रिभुवनगिरिरतिदुर्गः पूर्व्वं दुर्गाधिपः सृष्टः ॥
तत्र च जायससंज्ञो वंशो भूपालवंशजोऽभूत् ।
तत्र कुलोद्धरनामा वैद्याचार्य्योऽजनि प्राज्ञः ॥
तद्वंशजो गुणाढ्यो मिल्हननामाखिलामयज्ञाने ।
भेषजविधौ च बुद्धिर्यस्याश्चर्य्यप्रदा लोके ॥
तेन कृतं वरशास्त्रं हिताय लोकस्य दिल्लिकानगरे ।
द्वादशशतेष्वशीत्या सहिते विक्रमनृपस्याब्दे ॥

गर्जनकगौड़गूर्जरपर्य्यन्तां मेदिनीं महीनाथे ।
शासत्युवैर्जवनहम्बीरे समसुद्दीनाख्ये ॥
यो देवेश्वरतनयो गङ्गाधरसंज्ञको द्विजः ।
योऽन्यः पवित्रसद्द्विजपुत्रो ग्रहचारविकीर्त्तिः ॥ (?)
सद्वैद्यपद्मपुत्रो लोहटसंज्ञश्च बुद्धिमानपरः ।
एषां प्रपाठनाय प्रविस्तृतं धर्म्महेतोश्च ॥
ये वाञ्छन्ति च पुण्यं नृपपुरतश्च प्रभावमपि भिषजः ।
प्रपठन्तु तेऽपि मुक्त्वा नित्यं मात्सर्य्यमुग्रं च ॥
दोषाश्च चिह्नान्यपि भेषजानि
स्वभावसिद्धानि च तत्त्वविद्भिः ।
दृष्टान्यनादिप्रथितानि तस्मात्
काव्यापरत्वं मुनिवाक्यतोऽत्र ॥
यो मालवेशार्जुनवर्म्मणो गुरुः
कवीश्वरः श्रीमदनाभिधानः ।
समाहितं तेन महात्मना परं
यशोऽर्थिना शास्त्रमिदं भिषक्प्रियम् ॥
श्रग्रोतवंशोदयमाधवस्य सुस्नेहसाहाय्यवशात् पवित्रम् ।
विकाशितस्यात्मयशः प्रदीपवत् सुशास्त्रमेतत्कविमिल्हनेन ॥
शास्त्रेऽस्मिन् ग्रन्थसंख्यायां सहस्राणां चतुष्टयम् ।
द्वात्रिंशदक्षरैः श्लोकैर्विद्यते गणिते सति ॥
इदं चिकित्सामृतनामधेयं सुशास्त्रसारं भिषजां हिताय ।
— — — — मिल्हनेन परोपकाराय सतां विभूतिः ॥
विगलितसकलकलङ्का निर्म्मलहृदया सदैव या वसति ।
— — — — — विमले स जयति सरस्वती सुचिरम् ॥
.. .. .. .. .. .. .. ..

विषयः । इति० भगन्दराधिकारः ।
,, विस्फोटकाधिकारः ।
,, श्लीपदाधिकारः ।

इति० वातरोगाधिकारः ।

,, उन्मादाद्यधिकारः ।

,, मदात्ययदाहाधिकारः ।

,, नानाक्षुद्ररोगाधिकारः ।

,, नेत्ररोगाधिकारः ।

,, नासामयाधिकारः ।

,, स्त्रीरोगाधिकारः ।

,, बालरोगाधिकारः ।

,, विषाधिकारः ।

,, वाजीकरणविधिः ।    इत्यादि ।

---

(७६६ ।) चिञ्चिनीमतसारसमुच्चयः. $7 \times 2\frac{1}{2}$ inches. Folia, 69. Lines, 6 on a page. Extent, 1,428 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Incorrect.

**Beginning.** ॐ नमो महाभैरवाय ।

दिव्यार्कबोधकमलोदरगर्भसंस्थं
विश्वात्मकं परमनिर्म(ल) सिद्धनाथम् ।
येनावतारितमहार्णवमध्यचन्द्र-
द्वीपान्तरं परमचिञ्चिनिचित्प्रकाशम् ॥
तन्मध्यनिर्गतमहाकुलवेधयन्ति
दिव्यान्तरीक्षगगनान्तरभूतलेषु ।
पातालचक्रविवरान्तरग्राहन्तीं
नमामि पश्चिमक्रमाद्वयश्रीकुकालाम् ॥

.. .. .. .. .. ..
.. .. .. .. .. ..

द्वितीयपत्रं नास्ति ।)

शाम्भवं आनवं ? शाक्तं भेदं श्रुत्वा मया प्रभो ।
कष्टात् कष्टतरं — — — — स साध्यं योगवित्तकैः ॥

ध्यानयोगरताः केचित् केचित् जप्यापरायणाः ।
प्राणायाममयाः केचित् अर्द्धचन्द्रकलाक्रमम् ॥
विन्दुभेदरताः केचित् सांख्यज्ञाने स्थिताः परे ।
परकर्म्मरताः केचित् चक्षुन्मीलितसंस्थिताः ॥
सर्व्वे क्लिश्यन्ति ते नाथ न किञ्चित् प्रत्ययो भवेत् ।
विनान्वयप्रभेदेन आज्ञासिद्धिप्रकाशितम् ॥
सर्व्वशास्त्रार्थहृदयं – – – मुत्तमोत्तमम् ।
श्रीचिञ्चिनीमतसारस्य समुच्चय वदस्व मे ॥ इत्यादि ।

देव्युवाच ।

श्रुतं मया सर्व्वं मतसारसमुच्चयं ।
अद्यापि संशयो नाथ मन्त्रविद्या वदस्व मे ॥

.. .. .. .. .. .. ..

भैरव उवाच ।

शृणु देवि प्रवक्ष्यामि मन्त्रविद्या समुद्धरेत् ।
भूप्रदेशे समे शुद्धे अलिना लेपयेत् प्रिये ॥ इत्यादि ।

End. ब्रह्मेन्द्रविष्णुरुद्राणां नित्यं पूजयते प्रिये ।
जप्यमाना धियं दद्यात् खेचरत्वं प्रयच्छति ॥

Colophon. इति श्रीचिञ्चिनीमते सारसमुच्चये द्वादशः पटलः समाप्तः ॥

विषयः । चिञ्चिनीविद्यासाधनम् ॥

---

(११११ ।) कुचयोगोद्भूतदोषशान्तिविधिः. By वाचस्पतिमिश्र. $10 \times 4\frac{1}{2}$ inches. Folia, 9. Lines, 9 on a page. Extent, 510 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशो जयतितरां ।

सुरगणार्चितपादसरोरुहं तुम इहोन्दुरुपृष्ठसमारुहम् ।
निखिलविघ्नविनाशकरं परं गणपतिञ्च भवार्त्तिहरं सुरम् ॥
श्रीवृन्दारकवृन्दवन्दितपदद्वन्द्वाम्बुजाराधना-
लब्धानेकमनोरथस्य भुवनप्रख्यातकीर्त्तेश्चिरम् ।

श्रीमत्साहवहादुरस्य तनुते श्रीकृत्रयोगोद्भवं
प्राप्याज्ञां सुविधिं सुनिर्म्मलमतिः श्रीमिश्रवाचस्पतिः ॥
अथ भृगुसिद्धान्तोक्तछत्रयोगसूचितमार्गानुसारेण पूजास्थले शुक्लकम्बलासनमास्तीर्य्यार्घ्यजलेनासनमभ्युक्ष्य नृसिंहयन्त्रप्रयोगो लिख्यते ।
इत्यादि ।

**End.** कृतजप-होम-तर्पणमार्जनदशांशसंख्यया ब्राह्मणभोजनं कारयेत् दक्षिणादिना सन्तोष्य गुरुमभ्यर्च्य वस्त्रालङ्कारैः सन्तोष्य तदाशीर्व्वादं गृहीत्वा यथासुखं विहरेत् श्री । गुरुभ्यो नमः ।

**Colophon.** इति छत्रयोगोद्भूतदोषशान्तिविधिः समाप्तः ।
श्रीशाके शरपुष्करावनिधरप्रालेयरोचिर्मिते
तिग्मांशौ वृषराशिगे मकरगे जीवे तपस्तौ शुचौ ।
शुक्ले ब्रह्मतिथौ शिवर्त्तविलसद्गौरांशुवारेऽकरोत्
सन्तादीनवलोक्य पद्धतिमिमां श्रीमिश्रवाचस्पतिः ॥

विषयः । छत्रयोगसूचितपूर्व्वजन्मोपार्जिताखिलाघौघचयपूर्व्वकरक्तवातराजरोगकासश्वासाद्यखिलरोगोपशमनद्वारा यथोचितशुभफलप्राप्तिकामस्य श्रीनृसिंहयन्त्रपूजनम् । तदङ्गभूतमयुतसंख्यको गोविन्दषोडशाक्षरमनुजपः । सहस्रसंख्यको होमः । शतसंख्यकं तर्पणम् । दशसंख्यकं मार्जनम् । शक्त्यनुसारेण ब्राह्मणभोजनञ्च ।

---

( २५३ । ) जयद्रथयामलम्. 10×3 inches. Folia, 96. Lines, 7 on a page. Extent, 2,520 çlokas. Character, Newārī. Date, Newār Era, 762. Appearance, new. Prose and verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः । नच्छोगनौनससुद्भवम् । ?
तत्र प्रभृत्यसौ वीरो यत्र यत्र विचारयेत् ।
सद्यो तत्रास्य वरुणं प्रकाशमुपयान्ति हि ॥ ?
अचर्य्यं वहलं हृद्यं नात्र कार्य्या विचारणा ।
वरुणध्वजाविधाने पञ्चम ॥
अथ तं संप्रवक्ष्यामि पातचक्रध्वजाविधिं ।
यन्न कस्यचिदाख्यातं मुक्त्वा त्वं वीरवन्दिते ॥

तैलिकानां गृहं गत्वा कुम्भकारगृहं तु वा ।
तत्र तत्पतिभिः सार्द्धं यजेत परमेश्वरीम् ॥
वर्त्तुले मण्डले कृष्णो षड्विन्दुप्रविलाञ्छिते ।
सर्व्ववीरोपचारेण यजेत् तत्र महाशिवाम् ॥ इत्यादि ।

End. इह नु कानि कुलार्णवमध्यगानि गदितं त्रिदशेन्द्रविलासिनि ।
भ्रम विचित्रकलान्तविटृंभितं त्रिदशभैमेदगतं प्रणतं यथा ॥ ?

Colophon. इति श्रीजयद्रथयामले विद्यापीठे सिद्धिलक्ष्मीविधानो नाम कल्पं ।
सम्वत् ७६२ । वैशाखशुक्लपूर्णमासि ।

विषयः । इति श्रीभैरवस्रोतसि विद्यापीठे शिरश्छेदे जयद्रथयामले चतुर्विंशति-
साहस्रके महाकालिकातन्त्रे द्वितीयषट्के एकादशमः (?) पटलः ।
इति० द्वितीयषट्के सङ्कर्षणारूपकविधाने द्वितीयः पटलः ।
इति कालसङ्कर्षणाहरहुंकारणविधिस्तृतीयः ।
इति कालसङ्कर्षण्यां चर्चिकाविधिश्चतुर्थः ।
कालसङ्कर्षण्यानन्दविधाने पञ्चमः ।
डम्बरकाल्याविधिः षष्ठः ।
इति कालिके यमकल्पो विधिः सप्तमः ।
कालसङ्कर्षण्यां गहनेश्वरीविधिरष्टमः ।
,, एकतराविधाने नवमः ।
,, शवशवरीविधिर्दशमः ।
,, वज्रवतीविधिरेकादशः ।
,, रक्ताकालीविधिर्द्वादशः ।
,, इन्दीवरीकालिकाविधिस्त्रयोदशः ।
,, धनदकाल्याविधिश्चतुर्दशः ।
,, रमण्याविधिः पञ्चदशः ।
,, ईशानकालीविधिः षोडशः ।
,, मन्त्रमाताविधिः सप्तदशः ।
(अष्टादशोनविंशौ न दृष्टौ ।)

कालसङ्कर्षण्यामादितो विंशतितमः ।

,, एकविंशतितमः ।

,, जीवकालीहृदयविधिर्द्वाविंशतितमः पटलः ।

,, सप्तात्तराहृदयस्त्रयोविंशतितमः ।

,, अरमन्त्रविधिश्चतुर्विंशतितमः ।

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे जयद्रथयामले चतुर्विंशतिसाहस्र महातन्त्रे द्वितीयषट्के अर्द्धचक्रेश्वरीविधिर्नाम पञ्चविंशतितमं हृदयम् ।

समाप्तं पञ्चविंशतिहृदयचक्रः सप्तादशमः पटलः ॥

इति जयद्रथयामले महातन्त्रे कृत्यकर्णीविधिरष्टादशमः ।

,, भैरवडाकिन्या विधिरेकविंशतितमः पटलः ।

,, कालान्तकीविधिर्विंशतितमः ।

,, वीर्य्यकाल्या विधिरेकविंशतितमः पटलः ।

,, प्रज्ञाकालीविधानं नाम द्वाविंशतितमः ।

,, कालसङ्कर्षण्यां सप्तार्णकाल्या विधानं त्रयोविंशतितमः ।

,, कालीहृदयविधाना नाम चतुर्विंशतितमः ।

,, विद्याविद्येश्वरीचक्रे मन्त्रोद्धारः प्रथमः ।

,, ,, ,, मन्त्रवीर्य्यनिर्द्देशो द्वितीयः पटलः ।

,, ,, ,, ध्यानार्चनाधिकारस्तृतीयः पटलः ।

,, ,, ,, प्रथमप्रतिहारविधिरष्टमः ।

,, ,, ,, द्वितीयप्रतिहारविधिर्नवमः ।

,, ,, ,, तृतीय ,, ,, दशमः ।

,, ,, ,, चतुर्थप्रतीहारोसाधनविधिरेकादश ।

,, ,, ,, शिरश्छेदशिवसाधनविधिस्त्रयोदशः ।

,, ,, ,, शिखासाधनविधिश्चतुर्द्दशः ।

,, ,, ,, कवचसाधनाधिकारः पञ्चदशः ।

,, ,, ,, अस्त्रसाधने विद्याविद्येश्वरी चतुर्विंशतिः ।

,, यक्षिणीचक्रे प्रथमः ।

,, ,, पाटलाविधिः ।

,, विद्यापीठे सिद्धिलक्ष्मीविधानो नाम कल्पम् ।

---

23

(११६७ ।) जातकपद्धतिव्याख्यानम् . By सूर्य्यदेवसोमयाजिन् . 10×3 inches. Folia, 70. Lines, 11 on a page. Extent, 2,114 çlokas. Character, Newārī. Date, Newār Era, 803. Appearance, fresh. Prose. Generally correct.

**Beginning.** शुभमस्तु । श्रीदक्षिणामूर्त्तये नमः । श्रीगुरुभ्यो नमः ।

श्रीसूर्य्यादिसर्व्वग्रहेभ्यो नमः ॥

जगदुदयस्थितिसंहृतिकारणमविकारि सच्चिदानन्दम् ।
श्रीमच्छ्रीकृष्णाख्यं तेजो मे हृदि सदा स्फुरतु ॥
आचार्य्यं श्रीपतिं नत्वा जातके कर्म्मपद्धतिः ।
व्याख्यायते मया स्पष्टं सूर्य्यदेवेन यज्वना ॥
पश्यन्तु तमिमं ग्रन्थं शास्त्रं न्यायोपबृंहितम् ।
पूर्व्वंजातकशास्त्राणामलङ्कारं विपश्चितः ॥

इह खलु सन्तः शिष्टाचारसिद्धं – – – – अभीष्टदेवतानमस्कारादिरूपं मङ्गलं कृत्वा ग्रन्थारम्भं प्रतिजानाति देयमपि (?) श्रीपतिराचार्य्योऽभीष्टदेवतानमस्कारपूर्व्वं जातककर्म्मपद्धत्याख्यं ग्रन्थकरणं श्लोकेन प्रतिजानाति।

नत्वा तां गुरुदैवतां त्रिसमयज्ञानोद्गतेः कारणं
तत्पादाम्बुरुहप्रसादविकसद्बोधो बुधः श्रीपतिः ।
शिष्यप्रार्थनया विचार्य्य सकलान् होरागमार्थान् बहून्
वक्ष्ये जातककर्म्मपद्धतिमहं होराविदां प्रीतये ॥

त्रैकालिकपदार्थविषयज्ञानोत्पत्तेः कारणं गुरुरूपां देवतां प्रसिद्धदेवतां प्रणम्य – – – – करिष्यामीति वाक्यार्थः ॥ इत्यादि ।

**End.** इत्थं निध्रुवगोत्रेण सूर्य्यदेवेन यज्वना ।
कृतं श्रीपतिपद्धत्यां प्रकीर्णफलनिर्णयम् ॥ श्रीदक्षिणामूर्त्तये नमः ।

**Colophon.** इति श्रीसूर्य्यदेवसोमयाजिविरचिते श्रीपतिपद्धतिव्याख्याने जातकालङ्कारे प्रकीर्णं फलाध्यायः ॥

सम्वत् ८०३ फाल्गुन शुक्लद्वितीया आदित्यवारे लिखितमिदं राजदैवज्ञपूर्णानन्देन सम्पूर्णोऽयं ग्रन्थः ।

विषयः । श्रीपतिपद्धतेर्व्याख्यानम् ।

---

(१५७८।) जातकार्णवः. By वराहमिहिर. 12 × 2½ inches. Folia, 13. Lines, 5 on a page. Extent, 195 çlokas. Character, Newārī. Date, Newār Era, 883. Appearance, fresh. Verse. Incorrect.

**Beginning.** श्रीसूर्य्याय नमः ।

कल्पाद्यब्दगणः प्रभाकरहतश्चैत्रादिमासैर्युत-

स्त्रिघ्नः खाद्रिहताग्नियुकुसुर ७७ हृतैर्लब्धाधिमासैर्युतः ।

खत्रिघ्नः सतिथिर्द्विधाशिवहतस्त्रिव्योमशैलोद्धृतै-

र्हीनो लब्धदिनावमैः सितनिशार्द्धे सावनोऽहर्गणः ॥

रव्यादिमध्यार्थं गुणकारानाह । इत्यादि ॥

**End.** अथ मध्याह्निकीच्छायानयनम् ।

दिनेशरामैरधिकं यदल्पं रसेन पंक्त्या निहितं शराग्नम् ।

पलप्रभायां वियुतं युतञ्च छाया तु सा स्याद्द दिनमध्यभागे ॥

छायानिजेष्टादिनमध्यभागे छायानिता दिक्षु हिता तयाग्ने ।

दिनेशरग्ने दिनमध्यनाड़ी श्रीमान् वराहो वदति स्वयुक्त्या ॥ (?)

**Colophon.** इति श्रीवराहमिहिरविरचिते जातकार्णवे त्रिप्रश्नाधिकारस्तृतीयः समाप्तः ॥ सम्वत् ८८३ चैत्रशुक्ल ४ लिखितसम्पूर्णमिति । शुभम् ॥

विषयः । इति० ग्रहमध्याधिकारः प्रथमः ।

इति० ग्रहस्फुटाधिकारो द्वितीयः ।

इति० त्रिप्रश्नाधिकारस्तृतीयः ।

---

(३) १०९।) जैमिनिसूत्रव्याख्या (सुबोधिनी) By नीलकण्ठ. 10 × 4 inches. Folia, 45. Lines, 10 on a page. Extent, 1,069 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose. Incorrect.

**Beginning.** श्रीगणेशाय नमः । श्रीगुरवे नमः । ॐ नमो भगवते वागीश्वराय ।

सृष्टिस्थित्यन्तकर्त्री हरिहरविधिभिः सेवितानन्ददात्री

नानातन्त्रोक्तमार्गा मुनिभिरपि – – भालचन्द्रोज्ज्वलाङ्गी ।

आरक्ताभा त्रिनेत्रा शिवशवनिलया राजराजेश्वरी सा

वाचं नो ह्यातनोतु प्रतिपदकठिने जैमिनेः सूत्रसंघे ॥

विवस्वद्दंशाग्रग्रावनिपतितधरश्रीरणभुजो-
दयाम्भोधेर्वाचा + + + + जैमिनिमुनेः ।
निरालम्बे शास्त्रे जननि गिरिजे यास्यति न किं
– – – – – – – – – ॥

अथ प्राक्तनकर्म्मानुष्ठेयकाशीवासादिना जगदुद्धारं चिकीर्षुः करुणा-
सिन्धुर्जैमिनिमुनिः ... ग्रन्थप्रतिबन्धकोपशमनाय श्रीशङ्करप्रणतिपूर्व्वकं
. . . . जातकशास्त्रमनुष्ठातुं प्रतिजानीते । इत्यादि ॥

End. सिद्धमन्यत् – अन्यत् प्रकृतं ग्रन्थानुक्तं सिद्धं शास्त्रान्तरप्रसिद्धं ग्राह्य-
मित्यर्थः ॥

Colophon. इति श्रीनीलकण्ठज्योतिर्विद्विरचितायां जैमिनिसूत्रव्याख्यायां सुबो-
धिन्यां द्वितीयाध्यायस्य चतुर्थः पादः ॥

---

(१३४०।) ज्ञानतिलकम्. 6×4 inches. Folia, 6. Lines, 7 on a page. Extent, 52 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।
नारद उवाच ।
भूतानां च – – – ष्टज्ञानं केन च लभ्यते ।
एवं ज्ञानं न जानामि पुनर्जन्म न विद्यते ॥
श्रीभगवानुवाच ।
शरीरं + विद्यानां शरीरं सर्व्वदेवता ।
शरीरं सर्व्वतीर्थानि गुरुभक्तिषु लभ्यते ॥
.. .. .. .. .. .. ..
गुरुकृपाप्रसादेन ब्रह्मविष्णुमहेश्वरम् ।
सामर्थं तत्प्रसादेन केवलं गुरुसेवया ॥ इत्यादि ।

End. विष्णुस्थाने कृतं पापं शिवस्थानेषु मुच्यते ।
शिवस्थाने कृतं पापं गुरुस्थानेषु मुच्यते ॥
गुरुस्थाने कृतं पापं वज्रलेपो भविष्यति ।
ते नरा नरके यान्ति यावच्चन्द्रो दिवाकरः ॥

Colophon. इति श्रीविष्णुनारदसंवादे ज्ञानतिलकं नाम सम्पूर्णम् ॥

---

(१०८।) भङ्गारकरवीरतन्त्रे चण्डकापालिन्याः संक्षेपपूजाविधिः. 12 × 5 inches. Folia, 25. Lines, 9 on a page. Extent, 675 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ सिद्धिकालिकायै ।

सहस्राराब्जगां देवीं चन्द्रिकोपरि संस्थिताम् ।
नमामि शिरसा भक्त्या भैरवीं भैरवासनां ॥

अथ प्रातःकृत्यम् । उत्थाय गुरुं नमस्कृत्य स्नात्वा तत्र गायत्रीं दशधा जपेत् ॥ इत्यादि ।

**End.** ततः पूजास्थानं गोमयेनोपलिप्य स्वेच्छया विहरेत् ।

**Colophon.** इति श्रीभङ्गारकरवीरमहातन्त्रे अष्टसाहस्रिकायां श्रीचण्डकापालिन्याः संक्षेपपूजाविधिः ।

---

(२)३२६।) टोडरानन्दः (वैद्यकः) (खण्डितान्तः). 16 × 4 inches. Folia, 101. Lines, 9 on a page. Extent, 3,636 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।

शिवं प्रणम्य वागीशं धन्वन्तरिमथाश्विनौ ।
क्रियते टोडरानन्दं ग्रन्थं सद्वैद्यसम्मतम् ॥
दिशन्तु शं केशवशङ्कराद्या देवाः सुदेवाव्ययसम्भवाद्याः ।
श्रीटोडरेन्द्रनृपतौ — — — — — धर्म्मस्य भूमौ परिरक्षके च ॥
— — — — कुन्तिसुतादिभि र्या पूर्व्वं कृता पद्धति — — — — ।
मूर्द्धाभिषिक्तालिकभूषणेन समुद्धृता श्रीवरटोडरेण ॥
भूदेवदेवान् भुवि दानयज्ञैः सन्तोष्य साधूनथ सर्व्ववर्णान् ।
कामैरनेकैश्च विलोक्य + + नाज्ञापयेद्दिग्विजये नरेन्द्रः ॥
प्राचीनशास्त्राणि सुदुर्गमाणि भिन्नप्रमेयाणि निरीक्ष्य सम्यक् ।
एकत्र सर्व्वन्तु भवान् सुबोद्धुं मतं कृते टोडरमल्लभूपैः ॥
श्रीटोडरो नृपवरो रसालङ्कारसन्मणिः ।
गृहीतवेषो लोकस्य रक्षार्थमिति मे मतिः ॥

साधूनां लक्षता नूनमसाधूनां विमर्द्दनः ।
तदाज्ञया सुश्रुतादिसारमुद्धृत्य सादरम् ॥
निबध्यते हितं सर्व्वं विशदाक्षरमिर्म्मलम् ।
ग्रन्थेऽस्मिन् टोडरानन्दे सर्व्वार्थपरिहृंहिते ॥

इह खलु चतुर्व्वर्गस्य साधनं शरीरं तच्चायुष्या — — तद्विकारकारिणो रोगास्तदभावहेतुचिकित्सा — — — — — — आयुर्व्वेदशास्त्रप्रवृत्तिस्तत्रस्थानामविदुर्ज्ञेयतया इदानीं — — — — सुकरोपायेन ज्ञानार्थमेतत् । तस्मिन् ग्रन्थे प्रयत्नः ॥ इत्यादि ।

**End.**

यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम् ।
तस्य तस्यैव वीर्य्येण — — — मपि दृश्यते ॥
व्याधितं कृमिपुष्ट — — — — मलालजम् ।
वर्ज्जनीयं फलं सर्व्वं मपर्य्यापितमेव च ॥

इति फलवर्गः ।

(अतः परं खण्डितम् ।)

विषयः । इति श्रीमहाराजाधिराजटोडरमल्लविरचिते टोडरानन्दे आयुर्व्वेदसौख्ये आयुर्व्वेदप्रयोजने अष्टचिकित्सालक्षणवैद्यप्रतिरूपिकवैद्यलक्षणदीक्षा रोगलक्षणकथनं नाम प्रथमप्रहर्षः ।

इति० दोषपञ्चात्मक-दोषस्थानकर्म्म-अविकृतदोषलक्षण-विकृतदोषोपचयगतिहेतु — — पञ्चमदोषावस्थादोषवेदनादोषधातुक्षयलक्षणभेषजपरीक्षादेशलक्षणनानाप्रकृतिलक्षणं नाम द्वितीयप्रहर्षः ।

इति० पञ्चात्मकद्रव्यलक्षणादिपृथक्द्रव्योदाहरणसवीर्य्यविपाकप्रभालक्षणऋतुचर्य्या वलसाम्यपरीक्षाकथनम् । ३ ।

---

(११६७ ।) टोडरानन्दः वा होरासुखः By टोडरमल्ल. 11×4 inches. Folia, 102. Lines, 9 on a page. Extent, 1,836 çlokas. Character, Nāgara. Date, Samvat, 1639. Appearance, tolerable. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः । विघ्नच्छिदे नमः ।

प्रणम्य गणनायकं सकलसम्पदां दायकं
विरिञ्चिहरिशङ्करानखिलशङ्करान् भक्तितः ।

ग्रहाननघविग्रहान् गिरमयो शुभाशीर्गिरं
करोति नृपटोडरो विविधसौख्यदं जातकम् ॥
श्रीमद्गवशिष्ठभृगुगर्गपराशराद्यै-
र्धर्म्मप्रवर्त्तनपरैर्यदभाषि पूर्व्वं ।
पश्चाद् वराहमिहिरादिसुरावतारै-
स्तद्धर्म्मशर्म्मदमिदं क्रियते सुशास्त्रम् ॥
अहो सुरगणैरिदं विविधयुक्तियुक्तं कृतं
तदुक्तमनेकधा तदवतारिगीत्रामरैः ।
तदुक्तिरसमागरं समवगाह्य सम्यक् ब्रुवे
तदुक्तमपदार्थवल्गुलितहोरिकं शास्त्रकम् ॥
भूयो जातकसंहिता विरचिता श्रीमद्वराहादिभि-
स्तासां सारमशेषमेकत इत स्यात्तुं महीयोद्यमः ।
तद् याचे बहुधा बुधा वरतरं स्याच्चेदिदं तुष्यतां
नोचेत् तत्कृपया विचिन्त्य सुदृढं — — — लिख्यताम् ॥
अथास्य जातकस्य प्रयोजनमाह । इत्यादि ॥

End. प्रव्राजकानां कथितास्तु योगा नक्षत्रमूर्त्तेः फलयुक्तमस्मात् ।
सूर्य्यादितो राशिफलानि दृष्टिफलानि संक्षिप्य निरूपितानि ॥
भावाश्रयं फलमतोऽपि विचार एषा
मप्याश्रयोत्थफलमुक्तमनिष्टयोगाः ।
स्त्रीजातकं निधनमप्यथ नष्टजन्म-
द्रेक्काणरूपमिति होरिकसौख्यमुक्तं ॥

Colophon. इति श्रीमन्महाराजाधिराज-श्रीटोडरमल्लविरचिते श्रीटोडरानन्दे ज्योतिः-
शास्त्रे होरासौख्यं सम्पूर्णमिति । शुभं भवतु । कल्याणमस्तु लेखक-
पाठकयोः । संवत् १६३९ वर्षे वैशाख शुदि—प्रतिपदायां शुक्रे प्रोहित
रामात्मजेन देवदत्तेन अलीलिखत् ॥ सम्पूर्णं शुभं भवतु ॥
श्रीटोडरानन्द जय ।

विषयः। इति॰ राशिप्रभेदः प्रथमो हर्षः ।
खचरयोनिबलाबलसंज्ञकः । २ ।

मिश्रकाध्यायः । ३ ।

कारकाध्यायः । ४ ।

निषेकाध्यायः । ६ ।

सूतिकाध्यायः । ७ ।

अरिष्टाध्यायः । ८ ।

अरिष्टभङ्गाध्यायः । ९ ।

आयुर्दायाध्यायः ।

अष्टकवर्गसौख्यम् ।

कर्म्माजीवसौख्यम् ।

राजयोगसौख्यम् ।

नाभसयोगनिरूपणम् ।

चन्द्रसूर्य्ययोगौ ।

द्विग्रहरयोगः ।

प्रव्रज्याध्यायः ।

नक्षत्रगुणसौख्यम् ।

राशिफलसौख्यम् ।

भावफलनिरूपणम् ।

भावविचारः ।

अनिष्टयोगाध्यायः ।

स्त्रीजातकाध्यायः ।

निर्याणविचारः ।

नष्टजातकाध्यायः ।

द्रेक्काणरूपाध्यायः ।

---

(१२९४ ।) तिथ्यादिनिर्णयः By पद्मनाभ. 12 × 3½ inches. Folia, 52. Lines, 7 on a page. Extent, 1,001 çlokas. Character, Nāgara. Date, Newār Era, 827. Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

नमस्कृत्य महादेवं गुरुं संसारसागरम् ।

तिथ्यादीनां विवेकार्थं मुनिवाक्यं समुच्चितम् ॥

पक्षवृद्धौ तिथि + + ह्रासवृद्धिषु संशयम् ।
सुधियामप्यनुष्ठानमतो मया विविच्यते ॥
त्रिंशद्दिनैस्तु सावनो मासः । उक्तं ब्रह्मसिद्धान्ते ॥ इत्यादि ।

**End.** आद्यश्राद्धमकृत्वैव वृषोत्सर्गो विधीयते ।
वृषोत्सर्गे कृते पश्चात् कुर्य्यादेकादशं ततः ॥
सन्देहानेकगम्भीरं श्लोकतरङ्गसङ्कुलम् ।
पद्मनाभेन कथितं प्रेतकर्म्म महार्णवम् ॥
दशक्रियामुपक्रम्य आवसथ्यं समापितम् ।
प्रेताशौचं तथा ख्यातं मुनीनां दर्शनादिकम् ॥
श्रीवाराणस्यामुपाध्यायश्रीपद्मनाभेन विरचितम् ॥

**Colophon.** इति तिथ्यादिनिर्णये योगीश्वरसंग्रहे प्रेतकृत्यनिर्णये पद्मनाभसंग्रहयोः समुच्चयः समाप्तः । (?) नेपाल सम्वत् ८२७ श्रावणकृष्णत्रयोदश्यां तिथौ समाप्तिरा पुस्तीति । श्रेयोऽस्तु सर्व्वदा ।

---

(१२३८ ।) दानप्रदीपः By माधव. 14×3 inches. Folia, 99. Lines, 9 on a page. Extent, 2,669 çlokas. Character, Maithila. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

कार्य्याकार्य्यविभागमूढमनसां संख्यावतां सन्ततं
स्वस्वाभीष्टफलाप्तये स भवतादाम्नायकल्पद्रुमः ।
एकानन्तफले विचित्रसचयः शाखे यदीये चिरा +
+ + + प्रवरा वरामृतफलप्राप्त्यै समभ्यासते ॥
आसीद् गुर्ज्जरदेशमण्डलमणिः सौराज्यनित्योत्सवे
नैवर्णकरणाभिधे पुरवरे श्रीराघवः पार्थिवः ।
त्यागो वाग्बलमाजिसीम्नि कृतिता रूपं च सर्व्वज्ञता
यस्यैतान्यलिखन्नृप – – – – शन्द्रे कलङ्कं क्रमात् ॥
तेन प्राज्ञतमे भुवि प्रथयता प्रीतिं समानायितः
स्त्रीगर्नोदधि – – – पुरवरात् श्रीवासुदेवः सुधीः ।

24

विद्यावृत्तगुणैरुदीय गणितां यष्टोलकीर्थ्यभिधां
स्वां जातिं विशिशेष भूतनित्यैच्छ्संज्ञावतः ॥ (?)
तस्य तनूजो नाम्ना नरसिंहोऽभूनुमनीषिनरसिंहः ।
मत्सररहिताः प्राज्ञा यं तु सकूर्च्चां सरस्वतीं प्राहुः ॥
तस्यात्मजो धीधनहेतुतोऽभू-
न्नाम्नैव धीध — — — यितस्य ।
वृत्तानि यस्य श्रवणोत्सवाय-
वृत्तान्वितानाम — — — बुधानां ॥
तस्यात्मजः पण्डितरामनामा
वभूव भूवल्लभवल्लभोक्तिः ।
— — — — — —
— — — — — — ॥
तस्यात्मजः पण्डितविष्णुशर्म्मा
निःसीमपाण्डित्यनिधिर्वभूव ।
— — — — — —
— — — — — — ॥
तस्याप्यस्ति सुतः समस्तविषयालङ्कारभूतिर्गुणैः
सम्पूर्णो भुवि भद्रमाधव इति प्रख्यातनामा सुधीः ।
— — — — — — — — —
— — — — — — — — — ॥
स्मृत्युक्ताचारचतुरमनीषिण मनीषिणा ।
दानप्रदीपः क्रियते तेनोपक्रियते सता ॥
श्रुतिविषयगतोऽपि प्राणिनां स्वर्गसंस्था-
नपि निखिलपदार्थान् सुप्रकाशान् करोति ।
दुरिततिमिरभेत्ता यस्तु दानप्रदीप-
स्तमभिलषितलब्धै लब्धवर्णाः श्रयध्वम् ॥
तत्र प्रथमं दानप्रशंसा ॥ इत्यादि ।

End. ॐ अद्य भूतलाधिकरणकराजत्वप्राप्तिकाम इदं नगरं विष्णुदैवतं अमुकगोत्रायेत्यादि दत्तिणा नगरप्रवेशान्तम् ॥

**Colophon.** इति श्रीमहामहोपाध्याय-पण्डित-श्रीविष्णुसूनुभट्टश्रीमाधवविरचितायां दानप्रदीपे भूमिदानप्रकरणं समाप्तम् ॥ अथ तिलदानम् । तत्र यमः ।
( अतः परं खण्डितम् ॥ )

---

(२)११०।) दुर्गार्चनकल्पतरुः By लक्ष्मीपतिशर्म्मा. 12 × 4 inches. Folia, 60. Lines, 9 on a page. Extent, 1,755 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

**Beginning.** स्वस्ति श्रीगणेशाय नमः ।

सच्चिदानन्दरूपाय साक्षीभूताय कर्म्मणाम् ।
लिङ्गत्रयविशिष्टाय नमोऽनन्तैकमूर्त्तये ॥
अद्वितीयमजं शुद्धं द्विना इत्यपिवानिशम् ।
बहुधा यद्ग वेदगीतं तस्मै कस्मै नमोनमः ॥
श्रीमच्छ्रीकृष्णपादाम्बुजयुगभजनासादितानेकविद्या-
शौर्य्यौदार्य्याद्युपेतक्षितिपकुलमणिः सत्प्रतिज्ञः समालः ।
वीरः श्रीकृष्णवर्म्मा रिपुलनरारोत्रिशोत्रावतीर्णः
सल्लागोंशोऽस्तिकृष्टिर्विबुधजनपरित्राणसन्तर्पितार्थः ॥ (?)
तत्पुत्रोऽहितदर्पदावदहनज्वालाकरालप्रभः
सद्विद्यावृतनिशुविप्रजनहृत्तोषेन्दुतुल्यच्छविः ।
स्वेष्टेशाचरणाम्बुजस्मरणभङ्गावाप्तसर्व्वोन्नतिः
स्वस्ति श्रीरणभीमसाह-युवराट् वर्व्वर्त्ति लोकेऽधुना ॥
.. .. .. .. .. .. ..
.. .. .. .. .. .. .. ।
दोर्दण्डस्फविकुण्डलीकृतधनुर्ज्यानिर्गताक्षुगाशुगा-
क्षारिः श्रीरघुनाथसाह-नवराट् यस्यात्मजः शोभते ॥
तदाज्ञयैवार्जुनशक्तिपूजा
विधोर्विधानं व्रतकाम्य — — — ।
चिरन्तनोक्तिं प्रणिधाय चित्ते
करोति लक्ष्मीपतिदैवविद् द्विजः ॥

श्रुतिकोटिद्वयाभ्यासालोकनिर्णयभेदतः ।
कर्म्माकर्म्मविकर्म्मेति शास्त्रेऽनेकमतं मतम् ॥

.. .. .. .. .. .. ..

अथ किलेदानीं कलिपीड़ाविर्भावितया . . . . . . निगमागमश्रुति-पुराणस्योपयुक्ताखिलविषयं जिज्ञासूनामुपकारायानवरतेप्सितफलदनव-रात्रव्रताङ्गभूताखिलकर्म्मानुष्ठानोपयोगि-दुर्गार्चनकल्पतरुं शास्त्रगुरूक्ति-युक्तिभिः प्रकटीकरोमि ॥ इत्यादि ।

End. इति दशमीकृत्यम् ।

चीर्णां चीनं विचिन्वन् जनप(ति) विषयं कामरूपं विधुन्वन्
अङ्गान् (वङ्गान्) कलिङ्गान् कुरुमरुयवनान् त्रासयन् स्वप्रतापैः ।
स्वर्देवान् भूमिदेवान् सुकुलजनपदान् तोषयन् यज्ञदानैः
श्रीमद्गोर्खाचलेशो जयति रणबहादूरसाहक्षितीन्द्रः ॥
तद्राजत्सदसि ग्रहागमविदोऽनेके स्थितास्तेष्वपि
त्रिस्कन्धागमसारतत्त्वनिपुणं – – – तुष्टो नृपः ।
श्रीदैवज्ञशिरोमणीति पदवीं प्रादादसाधारणीं
यस्मै सोऽयमनन्तचिन्मयमना दैवज्ञलक्ष्मीपतिः ॥
त्रिस्कन्धागमशब्दसांख्यनिगमानेकार्थसारामृता-
स्वादावाप्तमहाप्रमोदनकज्ञानप्रबोधोदयः ।
कृष्णानन्द इति प्रणीतमहिमस्तत्पुत्रलक्ष्मीपतिः
श्रीदुर्गार्चनकल्पवृक्षममलं भक्त्याकरोच्छ्रारदम् ॥
पक्षे रूपघने पदेभ्य दिवसे द्विघ्ने तिथौ तत्समे
कर्णो मासि यमोत तद्गुघनमिते मासैकयुक्ते घने ।
कार्णभे त्रिघने युतावखिलयुग्दन्ताग्रविश्वोनके
शाके पंक्तिमितैः समैर्विलसिता ग्रन्थाध्यगात् पूर्णताम् ॥ (?)

इति श्रीदैवज्ञशिरोमणिश्रीमल्लक्ष्मीपतिशर्म्मणा विरचिते दुर्गार्चनकल्प-तरौ दशमीकृत्यकुसुमं दशमम् ॥

विषयः । इति० व्यवस्थाकुसुमं प्रथमम् ।
,, पाठार्चनादिनिर्णयकुसुमम् । २ ।

इति० प्रतिपत्कृत्यकुसुमम् । ३ ।
" द्वितीयादिपञ्चम्यन्तकृत्येन्दुदर्शन – – यर्चकुसुमम् । ४ ।
" विल्वाभिमन्त्रणपत्त्रीप्रवेशकृत्यकुसुमम् । ५ ।
" अष्टमीकृत्यकुसुमम् । ६ ।
" बलिदानकुसुमम् । ७ ।
" कन्यार्चनतल्लक्षणकुसुमम् । ८ ।
" नवमीकृत्यकुसुमम् । ९ ।
" दशमीकृत्यकुसुमम् । १० ।

---

(१०८९ ।) धनञ्जयनिघण्टुः. 8 × 3½ inches. Folia, 15. Lines, 8 on a page. Extent, 240 çlokas. Character, Nāgara. Date, Saṃvat 1654. Appearance, old. Verse. Generally correct.

Beginning. प्रथमपत्रं नास्ति। अतो द्वितीयपत्रस्य प्रारम्भवाक्यं लिखितम् । यथा,—

अथ राजनाम ।

राजाधिपः पतिः स्वामी नाथः परिवृढः प्रभुः ।
ईश्वरो विभुरीशानो भर्त्तेन्द्र इन ईशिताः ॥

वृत्तनाम ।

अनोकहस्तरुः शाखी विटपी फलिनो नगः ।
द्रुमोऽधिपः फलेग्राही पादपो गोवनस्पतिः ॥ इत्यादि ।

End. सिद्धः सिद्धनिषद्या ? मर्हत्सिद्धश्रियामपि ।
अर्हत्सिद्धमिति द्वावप्यर्हत्सिद्धाभिधानकौ ॥ २४६ ॥
अर्हदानपि तान् प्राहुः शरणोत्तममङ्गलम् ॥

Colophon. इति श्रीधनञ्जयस्य कृतौ निघण्टसमये शब्दसंकीर्णनिरूपणो नाम द्वितीयः परिच्छेदः ।

समाप्तो धनञ्जयको संवत् १६५४ । आषाढशुदि १३ भृगुवासरे लिखितमिदं विराटभट्टात्मजेन नरहरिभट्टेन । शुभमस्तु शुभं भूयात् ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धो वा मम दोषा न दीयते ॥

---

(५५७ ।) धनुर्वेदः. 6 × 3½ inches. Folia, 49. Lines, 5 on a page. Extent, 245 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगणेशशर्वाभ्यां नमः ।

लम्बोदरं महाकायं लम्बोष्ठं गजकर्णकम् ।
विघ्नघ्नं पार्वतीपुत्रं नमामि गणनायकम् ॥
विना शस्त्रधरं नान्यो धनुर्वेदस्य पारगः ।
अतः स्वप्ने निशि प्राप्ते शिवतत्त्वविचारणम् ॥

कर्त्तव्यमिति शेषः ।

अतः सन्देहदोलायां रोपणीयश्च मानसम् ।
ग्रन्थेऽस्मिंश्चापचतुरैर्वीरचिन्तामणौ क्वचित् ॥
यस्याभ्यासप्रसादेन निष्पद्यन्ते धनुर्द्धराः ।
जेतारः परसैन्यस्य तस्याभ्यासो विधीयताम् ॥
एकोऽपि यत्र नगरे प्रसिद्धः स्याद्धनुर्द्धरः ।
ततो यान्त्यरयो दूरं मृगाः सिंहगृहादिव ॥

इति धनुर्द्धरप्रशंसा ॥ इत्यादि ।

**End.**

जीवे लक्ष्मीर्मृते स्वर्गः कीर्त्तिश्च धरणीतले ।
तस्माद्धैर्य्यं विधातव्यं हन्तव्या परवाहिनी ॥

इति युद्धविधिः ।

**Colophon.** इति श्रीसदाशिवप्रोक्तो धनुर्वेदः समाप्तः ॥

विषयः । धनुर्द्धरप्रशंसा । धनुर्द्धारणविधिः । धनुःप्रमाणम् । गुणलक्षणम् । फलक्षणम् । पायनविधिः । ? नाराचनालिकालक्षणम् । स्थानानि । गुणमुष्टिलक्षणम् । धनुर्मुष्टिविधानम् । लक्ष्यलक्षणम् । शरलक्षणम् । धनुर्वेदाभ्यासे अनध्यायकालनिरूपणम् । लक्ष्यसञ्चलनविधिः । शीघ्रसाधनम् । दूरपातित्वम् । दृढप्रहारता । हीनगतिः । लक्ष्यचलनगतिः । धनुर्गतयः । बाणभङ्गः । वराटिका । विन्दुकम् । गोलयुग्मम् । शब्दभेदी । अस्त्रवारणम् । संग्रामविधिः । अक्षौहिणीलक्षणम् । व्यूहलक्षणम् । युद्धविधिः ।

(२) ८२।) धनुर्वेदप्रकरणम्. (वीरेश्वरीयं) By विक्रमादित्य. 11×4½ inches. Folia, 34. Lines, 7 on a page. Extent, 486 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Correct.

**Beginning.** श्रीगुरवे नमः ।

नमो देवाधिदेवाय शङ्कराय कपर्द्दिने ।
रामाय जामदग्न्याय नमोऽस्त्वमिततेजसे ॥
प्रणम्य परया भक्त्या देवदेवं पिनाकिनम् ।
धनुर्विधानं वक्ष्यामि वीरेश्वरमतोद्भृतम् ॥
मूर्द्धाभिषिक्तकुलजैः पृथिवीपालनोद्यतैः ।
धनुर्वेदो वेदितव्यस्त्रिवर्गफलमीप्सुभिः ।
यस्याभ्यासप्रसादेन निष्पद्यन्ते धनुर्धराः ।
जेतारः परसैन्यानां धनुर्वेदं तदभ्यसेत् ॥ इत्यादि ।

**End.** सपत्नसैन्यहव्यानि रणयज्ञेषु जुह्वता ।
जीवता प्राप्यते कीर्त्तिर्मृतेनापि सुराङ्गनाः ॥
तस्माल्लक्ष्मीं यशः स्वर्गं वाञ्छद्भिर्बहुजन्मभिः ।
धनुर्विद्या वेदितव्या जेतव्या वैरिवाहिनी ॥

**Colophon.** इति श्रीमन्महाराजाधिराजवीरविक्रमादित्यसङ्कलिते श्रीवीरेश्वरीय-धनुर्वेदप्रकरणे नाम चतुर्थः पादः समाप्तः । शुभमस्तु ॥

विषयः । धनुर्वेदमाहात्म्यम् । वीरेश्वरमतोत्पत्तिः । धनुःप्रमाणम् । गुणलक्षणम् । शरलक्षणम् । नाराचनालीकलक्षणम् । फललक्षणम् । अथ फल-पायनानि । अथ गुणमुष्टयः । अथ धनुर्मुष्टिसन्धानम् । अथ व्यायाः । अथ लक्ष्यम् ।

इति ० प्रथमः पादः ।

अथ दानविधिः । तत्र कालनिर्णयः । शिष्यपरीक्षा । अथाचार्य्य-लक्षणम् ।

इति ० द्वितीयः पादः ।

अथाभ्यासविधिः । अथ लक्ष्यास्खलनम् । अथ शीघ्रसन्धानम् । अथ दूरपातित्वम् । इति दृढप्रहारिता । इति हीनगतयः । इति शुद्ध-

गतयः । इति दृढचतुष्कम् । इति बाणभङ्गः । इति वराटिकावर्त्तः ।
इति काष्ठभेदनम् । इति विन्दुकम् । इति गोलकयुगप्रभृतिविचित्र-
विधिः । इति धावल्लक्ष्यम् । इति शब्दभेदित्वम् । अथानध्यायः ।
पतितमन्त्रः । इति ० तृतीयः पादः ।
इति शस्त्ररक्षा । इति शस्त्रवारणम् । अथ तिलकम् । इति दिव्यौ-
षध्यादिप्रभावहरणम् । अथ प्रभावप्रयाणविधिः । इति रक्षामन्त्रः ।
अथाक्षौहिणी संख्या । अथ शकुननिर्णयः । अथ स्वरबलम् । अथ
व्यूहविधिः । अथ युद्धविधिः । इति ० चतुर्थः पादः ।

---

(१५००१) धर्म्मतत्त्वप्रकाशः. 9 × 4 inches. Folia, 267. Lines, 9 on a page. Extent, 4,806 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।
श्रीविश्वेश्वराय नमः ॥
वन्देऽहं दक्षिणामूर्त्तिं श्रुतिशिरोगिराम् । ?
प्रवर्त्तुं मूलमज्ञानं ज्ञानमात्रमभीप्सितम् ॥
इह खलु संसारचक्रवंभ्रम्यमाणानां दुर्विषयत्रिविधतापतप्तानां सकल-
दुःखोपशमाय निरतिशय .. .. .. धर्म्म एव परमोपाय इति
तत्रावश्यमास्यातव्यं पुरुषेण ॥ इत्यादि ।

**End.** वानप्रस्थस्य कालो निषिद्ध .. .. .. ।
सन्न्यासधर्म्मा विशेष .. .. दृष्टव्यम् ॥ इति शिवम् ।
विख्याते कविकच(चक्र)मध्यवर्त्तिने दो-
दक्षीरे नागमहिम्नि कूर्पराख्यो गोविन्दः ।
श्रुति + + सिन्धुपारदृश्वा
श्रीचातुर्धरकुलमण्डलं पुराणो ॥ ?
श्रीकण्ठं मनसि विभाव्य नीलकण्ठः
तत् सूनुः श्रितवटकाननं सुरेशम् ।
वेदं तैः शमनदिगानन + तीनां
व्याख्याने किल चतुराननो बभूव ॥

गोविन्दस्तद्द्वपूभूः श्रुतिहृदयमुनिः सर्व्वतन्त्रस्वतन्त्र-
स्तज्जस्तच्छिष्यितार्थः + + + मकरोद्धर्म्मतत्त्वप्रकाशम् ।
भूपप्रोत्यै शिवाख्ये शवदमिनिमहानेष्ठिकब्रह्मचर्य्य
वाराणस्याप्तजन्मा सुरसरिवसले श्रीप्रतिष्ठानतीर्थे ॥ (?)
नागाङ्करसभूशाके शालिवाहनजे त्वये ।
नभस्युसिततर्य्येऽह्नि ग्रन्थोऽयं पूर्णतां गतः ॥

Colophon. इति श्रीमत्-पदवाक्यप्रमाणज्ञमर्य्यादाधुरन्धर-चतुर्धरवंशावतंसगोविन्द-
सूरिसूनोः शिवस्य कृतौ धर्म्मतत्त्वप्रकाशः समाप्तिमगमत् ॥
श्री . . सदाशिवार्पणमस्तु ॥

विषयः । धर्म्मशास्त्रम् ।

---

(१४१३ ।) धर्म्मसारः. By पुरुषोत्तम. 12×4 inches. Folia, 601. Lines, 9 on a page. Extent, 15,376 çlokas. Character, Nāgara. Date, Saka Era, 1607. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ श्रीगणेशाय नमः ।

राम गणपतिं वाणीं नत्वा श्रीमन्मनोहरम् ।
कुरुते पुरुषोत्तमो धर्म्मसारस्य सङ्ग्रहम् ॥
[illegible] ।
दूषयेरसतः किं मे प्रकृतिस्तस्य सैव हि ॥
अतः साधनहं वन्दे ते हि वन्द्यतमा भुवि ।
[illegible] ॥
[illegible] ।
असाधवो विषमुचो भवन्ति फणिनो यथा ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलगलितं वाङ्मयममृतं जगत् पिबति ॥

25

श्रद्धाप्रशंसा ब्रह्मवैवर्त्ते ।

गुरौ शास्त्रे च महती श्रद्धा पुण्येऽवाप्यते ।

अश्रद्धया हताशानां कथं साक्षाद्भवेद्धरिः ॥ इत्यादि ।

End. आदित्यपुराणे ।

शपथः शकुनः स्वप्नः सामुद्रिकमुपश्रुतिः ।

उपयाचितमादेशात् संभवन्ति कलौ क्वचित् ॥

तस्मात् तन्मात्रलाभेन कलौ कार्य्यं न कारयेत् ॥

शास्त्राणि तावदवलोक्य मया मुनीना-

मर्थः स एव गदितः परमात्मयुक्त्या ।

एवं विलोक्य निखिलं च विचारयन्तः

सन्तः स्वभावसरला मुदमाप्नुवन्तु ॥

पद्मानि बोधयत्यर्कः काव्यानि कुरुते कविः ।

तत्सौरभमनभस्वन्तः सन्तस्तन्वन्ति सद्गुणात् ॥

Colophon. इति श्रीज्योतिर्वित्पुरुषोत्तमविरचितो नानापुराण-नानाधर्म्मशास्त्रोक्तो धर्म्मसारः समाप्तः । श्रीशाके १६०७ मासे पतांशगग्रामे लिखितं पुत्रसहितं बलभद्र ओझा शुभम् ॥

---

(११८८ ।) नक्षत्रसारावली. 10 × 3 inches. Folia, 14. Lines, 7 on a page. Extent, 490 çlokas. Character, Newârî. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

Beginning. श्रीगणपतये नमः ।

प्रणम्य परमानन्दं सर्व्वकारणकारकम् ॥

सर्व्वाधारमनाधारं सर्व्वज्ञं सर्व्वसाक्षिणम् ॥

अथ नक्षत्रपरिमाणं वक्ष्ये । अश्विनी त्रितारा । अश्वमुखी तिर्य्यङ्मुखी । पीतवर्णा । इत्यादि ॥

End. सावित्र्याष्टोत्तरेण तं हुत्वा – – – – – बलिं दद्यात् ।

संक्रमे अर्द्धर्द्धिः ।

इति नक्षत्रसारावली ।

विषयः । नक्षत्राणां परिमाणकथनम् ।

---

(११६६ ।) नवरत्नम्. By दामोदरभट्ट. 12×5 inches. Folia, 43. Lines, 11 on a page. Extent, 1,300 çlokas. Character, Nāgara. Date, Saka Era, 1603. Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ श्रीगणेशाय नमः ।

गणेशानं भवानीं च शङ्करं कमलापतिम् ।
नत्वा श्रीभास्करं पूज्यान् बाणशून्यानृपै १६०५ र्मिते ॥
शालिवाहशके काश्यामाश्विने पुष्यभे गुरौ ।
दशम्यां बहुले पक्षे नातिसंक्षिप्तविस्तृतम् ॥
नवरत्नमयं ग्रन्थं नवदीधितिसंयुतम् ।
चित्तपावनजातीयो जानकीरघुनाथजः ॥
दामोदरो रचयति शिष्यपाठकयोर्मुदे ।
शास्त्रदृष्टं लोकदृष्टमनुभूतञ्च कथ्यते ॥ इत्यादि ।

**End.** ग्रन्थारम्भस्य समये यावद्दृग्गोचरं स्थितम् ।
गणितं नवरत्नेन निबद्धं ग्रहलाघवात् ॥
चित्तपावनजातीयो जानकीरघुनाथजः ।
दामोदरो व्यरचयन्माणिक्यादृग्दीधितिम् ॥

**Colophon.** इति श्रीचित्तपावनजातीय जानकीरघुनाथात्मज-भट्ट-दामोदरविरचिते नवरत्नाख्ये महानिबन्धे ज्योतिषमाणिक्ये गणितदीधितिः समाप्तः प्रथमः । कशे (शके) १६०१ मार्गशिर वदि अष्टमी मघानक्षत्रे सोमदिने । तस्मिन् दिने राजदैवज्ञपूर्णानन्देन स्वपठनार्थं परोपकारार्थञ्च लिखितम् । नेपाल संवत् ८०६ ॥

विषयः । गणितज्योतिःशास्त्रम् ।
दैवज्ञदामोदरनिर्म्मितेऽस्मिन् महानिबन्धे नवरत्नसंज्ञे ।
आद्ये मरीचौ श्रुतिलोचनस्य पञ्चाङ्गसिद्धिः प्रथमः प्रकाशः ॥
दैवज्ञदामोदरनिर्म्मितेऽस्मिन् महानिबन्धे नवरत्नसंज्ञे ।
आद्ये मरीचौ श्रुतिलोचनस्य दृक्खेटसिद्धिस्त्वपरः प्रकाशः ॥
दैवज्ञदामोदरनिर्म्मितेऽस्मिन् महानिबन्धे नवरत्नसंज्ञे ।
आद्ये मरीचौ श्रुतिलोचनस्य त्रिप्रश्ननामा त्रिमितः प्रकाशः ॥

दैवज्ञदामोदरनिर्म्मितेऽस्मिन् महानिबन्धे नवरत्नसंज्ञे ।
आद्ये मरीचौ श्रुतिलोचनस्य पर्व्वाभिधो वेदमितः प्रकाशः ॥

इति श्रीचित्तपावनजातीयजानकीरघुनाथात्मजभट्टदामोदरविरचिते नवरत्नाख्ये महानिबन्धे ज्योतिषमाणिक्ये गणितदीधितिप्रकाशः शरसम्मितोऽयम् ॥

इति श्रीचित्तपावनजातीय-जानकीरघुनाथात्मजभट्टदामोदरविरचिते नवरत्नाख्ये महानिबन्धे ज्योतिषमाणिक्ये गणितदीधितिः समाप्तः ॥

---

(१४६४ ।) नागरसर्व्वस्वटीका. By जगज्ज्योतिमल्ल. 11 x 5 inches. Folia, 53. Lines, 9 on a page. Extent, 970 çlokas. Character, Newārī. Date, (?). Appearance, fresh Prose and verse. Generally correct.

**Beginning.** ॐ नमः श्रीभवानीशङ्कराभ्याम् ।

श्रीजगज्ज्योतिमल्लेन भवानीचरणाम्बुजम् ।
नत्वा नागरसर्व्वस्वटीकेयं परितन्यते ॥
मुहूर्त्तमपि यं स्मरन्नभिमतां मनोहारिणीं
लभेत मदविह्वलां यदिह कामिनीं कामुकः ।
समुल्लसितडम्बरं सुरुचिराङ्कुरागारुणं
नमामि सुमनःशरं सततमार्य्यमञ्जुप्रियम् ॥

आदौ ग्रन्थकारः कामशास्त्रत्वात् कामदेवं नमस्करोति । इत्यादि ॥

**End.** जगज्ज्योतिर्म्मल्लभूपो ग्रन्थानेकान् विलोक्य च ।
इयं नागरसर्व्वस्वटीका यत्नेन साधिता ॥

**Colophon.** इति महाराजाधिराजश्रीश्रीजगज्ज्योतिर्मल्लभूपविरचितायां नागरसर्व्वस्वटीकायामष्टादशः परिच्छेदः समाप्तः ।

**विषयः ।** पद्मश्रीज्ञानविरचितस्य नागरसर्व्वस्वनामककामशास्त्रस्य व्याख्यानम् ॥

---

(१७३ ।) नाट्यशास्त्रम्. 16 x 4½ inches. Folia, 99. Lines, 7 on a page. Extent, 2,871 çlokas. Character, Newārī. Date, (?). Appearance, tolerable. Verse. Generally correct.

**Beginning.** ॐ नमो ब्रह्मणे ।

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ॥

समाप्तजप्यं व्रतिनं स्वसुतैः परिवारितम् ।
अनध्याये कदाचित्तु भरतं नाट्यकोविदम् ॥
मुनयः पर्य्युपास्यैनं मैत्रेयप्रमुखाः पुरा ।
पप्रच्छुस्ते महात्मानो नाट्यवेदसमुद्भवम् ॥
योऽयं भगवता सम्यग् ग्रथितो वेदसम्मतः ।
नाट्यवेदः कथं ब्रह्मन्नुत्पन्नः कस्य वा कृते ॥
कत्यङ्गः किंप्रमाणश्च प्रयोगश्चास्य कीदृशः ।
सर्व्वमेतद् यथातत्त्वं भगवन् वक्तुमर्हसि ॥ इत्यादि ।

End. आहार्य्याभिनयोह्येष मया प्रोक्तः समासतः ।
अत ऊर्द्ध्वं प्रवक्ष्यामि सामान्याभिनयं पुनः ॥

Colophon. इति भारतीये नाट्यशास्त्रे आहार्य्याभिनयो नामाध्यायः द्वाविंशतिः ।
(अतः परं खण्डितम् ।)

विषयः । इति० भारतीये नाट्यशास्त्रे नाट्योत्पत्तिः । १ ।
इति० प्रेक्षागृहलक्षणम् । २ ।
इति० रङ्गदेवतापूजनम् । ३ ।
इति० ताण्डवलक्षणम् । ४ ।
इति० पूर्व्वरङ्गविधिः । ५ ।
इति० रसविकल्पः । ६ ।
इति० भावव्यञ्जकः । ७ ।
इति० उपाङ्गलक्षणम् । ८ ।
इति० हस्ताध्यायः । ९ ।
इति० अङ्गप्रत्यङ्गलक्षणम् । १० ।
इति० चारीविधानम् । ११ ।
इति० मण्डलविधानम् । १२ ।
इति० गति — — — । १३ ।
इति० कक्षायुक्तिधर्म्मव्यञ्जकम् । १४ ।
इति० छन्दाभिनयः । १५ ।
इति० छन्दोविधिः । १६ ।

इति० वागभिनये काव्यलक्षणम् । १७ ।

इति० वागभिनये काकुस्वरव्यञ्जकः । १८ ।

इति० दशरूपलक्षणम् । १९ ।

इति० वृत्ताध्यायः । २० ।

इति० वृत्तिविकल्पः । २१ ।

इति० आहार्य्याभिनयः । २२ ।

---

(३)७६ ।) नाड़ीपरीक्षा. By रामचन्द्रसोमयाजिन्. Son of सम्राड़ग्निचित्सूर्य्यदास. 8×3 inches. Folia, 23 Lines, 5 on a page. Extent, 194 çlokas. Character, Nāgara. Date, Saṃvat 1773. Appearance, decaying. Verse. Incorrect.

**Beginning.** श्रीधन्वन्तरये नमः ।

लब्ध्वा प्राक्तनलब्धवर्णरचितोपायानुपास्य स्फुरत्-
ज्ञानैः सद्गुरुभिर्गिरो निगदिताः कृत्वा च भूतिं मुहुः ।
सम्राजोऽग्निचितः सुतः सुकृतिनः श्रीसूर्य्यदासस्य यो
रामो नैमिषमाश्रितः स कुरुते नाड्यादिलक्ष्मोच्चयम् ॥
पाञ्चभौतिकमिदं नृणां वपुः
सप्तधातुमलसङ्घसन्धितम् ।
वातपित्तकफसाम्यशर्म्मभृ-
न्नाड़िरज्जुपरिबद्धमेधते ॥
भूयस्योऽस्मिन् सन्ति नाड्यः शरीरे
स्थूलाः सूक्ष्मास्तास्वपो सप्तशत्यः ।
सञ्चार्य्यैवाप्यास्य वागेरसांश-
तासां हस्ताङ्घ्रीगतैकापरीक्षाः ॥ ? इत्यादि ।

**End.** साध्ये गत्वर इत्युदीर्य्य भिषजो मानादरामी भरन्
मारां साध्यमधिप्रतापविविधो .. .. चिकित्सन्
नाड्यादेरिति लक्ष्मसूक्ष्ममुदितं श्रीरामचन्द्रेण यत्
तः .. .. .. .. दुर्गमगिरौ — — — — — ॥

एकोनत्रिंशशरमिते + +

+ + विक्रमार्कनृपात् विहितम् ।

प्रकरणमेतत् कविना

रामेण नैमिषारण्ये ॥

**Colophon.** इति सम्राड्गिरिचित्सूर्य्यदासात्मजरामचन्द्रसोमयाजिकृतं नाड्यादि-परीक्षाप्रकरणं समाप्तम् । संवत् १७७३ वर्षे जेठ मासे . . . . . . ।

---

(२)७३।) निर्णयार्कः. By श्रीकृष्णराम. 10 × 4 inches. Folia, 94. Lines, 7 on a page. Extent, 1,316 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** ॐ नमः श्रीगणेशाय नमः ।

या माया सचराचरं जगदिदं सूते च यद्गौणिभिः

सौन्दर्य्यं प्रतिभाति यत्करुणया सम्भूतिमत् तिष्ठति ।

यस्यामेति लयं लये जलजभूशम्भुस्वभूतिस्तुता

सा शश्वत्त्रिगुणात्मिका दिशतु नः सन्मङ्गलं मङ्गला ॥

श्रीगोरक्षपराजेन्द्रविक्रमस्यानुशासनात् ।

कृत्यरत्नावलीं कालमाधवं निर्णयामृतम् ॥

निर्णयाब्ध्यादिकान् ग्रन्थान् समालोक्य प्रयत्नतः ।

श्रीकृष्णराममिश्रेण निर्णयार्कः प्रकाश्यते ॥

निर्णयं क्रमतो वच्मि वत्सरस्यायनस्य च ।

ऋतोर्मासस्य पक्षस्य तिथ्यादेर्ग्रहणस्य च ॥

चान्द्रसावनसौरेति नाम्ना संवत्सरस्त्रिधा ।

सुजन्मादिव्रते सौरो गोसत्रादिषु सावनः ॥

तिलकादिव्रते चान्द्रो ग्राह्यः संवत्सरो बुधैः ॥ इत्यादि ।

**End.** एतदपवादमाह स्मृतौ ।

नित्ये नैमित्तिके जाप्ये होमयज्ञक्रियासु च ।

उपाकर्म्मणि चोत्सर्गे ग्रहवेधो न विद्यते ॥ इति ।

कल्याणं तव राजेन्द्र करोतु कमलालया ।

निर्णये गुणमारोप्य यया विश्वमिदं ततम् ॥

विक्रमार्काद्द्विरानन्दगजेन्दुमितवत्सरे ।
ज्यैष्ठशुक्लतृतीयायां ग्रन्थोऽयं पूर्णतां गतः ॥

Colophon. इति श्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावली-
विराजमानमानोन्नतश्रीमन्महाराजाधिराजश्रीराजेन्द्रविक्रमसाहदेवविर-
चिते निर्णयार्के एकादशप्रकाशः ॥
शुभम् ॥

---

(११२५ ।) नीलकण्ठसङ्ग्रहः. By नीलकण्ठ. 14×3 inches. Folia, 88. Lines, 9 on a page. Extent, 2,970 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमो नागेन्द्रभूषणाय ।
श्रीनीलकण्ठपदपङ्कजमप्रमेयं
श्रीनीलकण्ठगमतं प्रणिपत्य गेयम् ।
श्रीनीलकण्ठभिषजा क्रियते मुदायं
श्रीनीलकण्ठधरसङ्ग्रककोगदोयम् ॥ ?
जननी यस्य सावित्री तातो नरहरिः कृती ।
धन्वन्तरिकुलोत्पन्नः श्रीधरो यस्य मातुलः ॥
योऽन्ववाये समाख्यातस्त्रिपुरारिधनस्य च ।
महोपाध्यायवर्य्यस्य तेनाद्य + + नोदितः ॥
सद्वैद्यवृन्दारकवन्दिता ये
द्विजातिवर्य्या गुरवो वयस्याः ।
समस्तु ते + + स्वभावयुक्तं
वचो विचित्रं प्रतिभानुरूपम् ॥
एतैः प्रीत्या भिया सम्यगल्पे ते मयका परम् ।
सज्जनासज्जनावल्पादुपकारापकारिणौ ॥
अत्र वाच्या गुणोत्पत्तिर्निदानञ्च रुजां स्थितिः ।
साध्यासाध्यौ चिकित्सा च प्रयोगस्तस्य पत्रिका ॥
भिषजां निर्णयो वाच्यो वेदव्यासप्रयोगतः ।
समासेन सदोसारभिषकूचरणसेविना ॥

कृच्छ्रोपायः सुखोपायो द्विविधः कृच्छ्र उच्यते ।
असाध्यो द्विविधो ज्ञेयो याप्यो यश्चाप्रतिक्रियः ॥ इत्यादि ।

End. अम्लपित्तं तथा कुष्ठं प्रमेहं गुदनिर्गमम् ।
कासं पञ्चविधश्वासं ज्वरञ्च विषमज्वरम् ॥
( अतः खण्डितम् )

---

(१३२२ ।) न्रत्येश्वरतन्त्रम्. 6×2 inches. Folia, 6. Lines, 7 on a page. Extent, 56 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Incorrect.

Beginning. ॐ नमो भैरवाय । अष्टभैरव अष्टकालीध्यानम् ।

शुभ्रेन्दुवर्णरूपा हिमकनकनिभा कुन्दकर्पूरकान्ति-
र्वक्त्रं चैकं चतुर्भिर्नयनत्रयधरं — — — दंष्ट्रकालम् ।
दक्ते वामे धरन्ति दशभुजकले खड्गभेदखिडहस्तं
सोऽयं विश्वेश्वरञ्च दुरितभयहरं पातु स्वच्छन्द नौमि ॥ १

सृष्टिकालि । वरे अभयपीतवर्णा ॥

घोरं घोरातिघोरं भयदुलितहरं सर्व्वशान्तिं करत्वं
संसारे तारयन्ति सकलस्थितिफलं विश्वरूपैकनाथम् ।
पुष्टिसर्व्वजनानां शुभ — — — — सिद्धिदं साधकानां
तं वन्दे नौमि भक्त्या सकल — — पतिं नौमि स्वच्छन्ददेवम् ॥

इत्यादि ।

End. अथ वेशपूजा ।

उत्तमप्रकृतिर्धीरो भवेदुत्साहसम्भवः ।
दानवीरो दयावीरो युद्धवीर इति त्रिधा ॥

.. .. .. .. ..

.. .. .. .. ..

भार्गवो रामभद्रश्च स सुग्रीवो वृकोदरः ।
मारुतिप्रमुखाः प्रोक्ता युद्धवीरा मनीषिभिः ॥

Colophon. इति नृत्येश्वरतन्त्रे समस्तवीर-आवाहन-पूजाविधि समाप्तम् । शुभ ।

26

विषयः । सृष्टिकाली, महास्थितिकाली, संहारकाली, सिद्धिकाली, भक्ताभक्षण-काली, रक्ताकाली, कृतान्तकाली, कालाग्निकाली, इत्यष्टभैरवीनां ध्यानम् । तासां पूजा । सर्व्वविधवीराणां नामोच्चारणपूर्व्वकमावाहनञ्च ।

---

(३)४८।) नृसिंहसुन्दरीकवचम् (सम्मीलनतन्त्रीयम्). 10×4 inches. Folia, 8. Lines, 6 on a page. Extent, 78 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Correct.

Beginning. श्रीगणेशाय नमः । श्रीसुन्दरीनृसिंहाय नमः ।

कैलासशिखरासीनं शङ्करं चन्द्रशेखरम् ।
उवाच पार्व्वती देवी प्रणम्य शिरसा शिवम् ॥
श्रीदेव्युवाच ।
देवदेव महादेव भक्तानुग्रहकारक ।
त्वत्प्रसादान्मया नाथ श्रुतानि विविधानि च ॥
कवचानि बहूनीह नानासिद्धिकराणि च ।
इदानीं श्रोतुमिच्छामि कवचं परमाद्भुतम् ॥
श्रीमन्नृसिंहसुन्दर्य्याः सर्व्वसिद्धिप्रदायकम् ॥ इत्यादि ।

End. तव स्नेहान्मयाख्यातं त्रिषु लोकेषु दुर्लभम् ।
कवचं देवदेवेशि गोपनीयं प्रयत्नतः ॥

Colophon. इति श्रीसम्मीलनतन्त्रे महासिद्धिप्रदे उमामहेश्वरसम्वादे श्रीनृसिंह-सुन्दरीकवचम् ।

---

(१५०२।) पद्यसमुच्चयः. By राजा जगत्प्रकाश. 8×2½ inches. Folia, 106. Lines, 6 on a page. Extent, 954 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो गणपतये ।

ओतप्रोतं जगद् यत्र यो विश्वस्य हृदि स्थितः ।
नम आनन्दरूपाय तस्मै पूर्णाय शम्भवे ॥
प्रागल्भ्ये बुधमण्डलीष्वभिरुचिः स्याद् वा नृपाणां मनो
हर्त्तुं चञ्चलपुण्डरीकनयनाचेतःसमाकर्षणे ।

नेपालेशजगत्प्रकाशनृपतेः साहित्यविद्याविदो
नित्यं पद्यसमुच्चयः सुमतयः सानन्दमभ्यस्यताम् ॥
शिवप्रशंसा । इत्यादि ।

End. आस्वादितदयिताधरसुधा-
रसस्यैव सूक्तयो मधुराः ।
अदलितरसालमुकुलो
न कोकिलः कलमुदञ्चयति ॥

Colophon. इति महाराजाधिराजश्रीश्रीजगत्प्रकाशसंगृहीतः पद्यसमुच्चयः समाप्तः ॥

विषयः । नानाविधश्लोकानां सङ्कलनम् ॥

---

(९८४।) पशुपतिपुराणम्. 12×4 inches. Folia, 36. Lines, 9 on a page. Extent, 769 çlokas. Character, Newārī. Date, Newār Era, 824. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमः श्रीपशुपतये ।
यस्य वक्त्राद् विनिष्क्रान्ता वाग्मती लोकपावनी ।
नमामि शिरसा देवं शङ्करं भुवनेश्वरम् ॥
येन धर्मार्थिना प्रोक्तं पुराणममृतोपमम् ।
नमामि मूर्द्ध्ना सर्व्वज्ञं पुलस्त्यं मुनिसत्तमम् ॥
यस्य काव्यं समालोक्य पुराणमिदमुद्धृतम् ।
नमोऽस्तु सततं तस्मै व्यासाय च महात्मने ॥ इत्यादि ।

End. या सर्व्वकामफलदा तपसाधकस्य
क्रीड़ानुरागजननी नरकामिनीनाम् ।
सम्पूजिता विकसितैरपि पुष्पवृन्दै
सा वाग्मती दिशतु कामफलं नराणाम् ॥

Colophon. इति वाग्मतीप्रशंसायां पशुपतिपुराणे पुलस्त्यभाषिता वाग्मत्याः स्तुतिः समाप्ता ।
इति वाग्मतीप्रशंसायां पशुपतिपुराणं समाप्तं शुभम् । . . . . । सम्वत् ८२४ । ... ... । श्रीश्रीहेमन्तमल्लवर्म्मणः यमवास्यं विधयकादिनजुराम् ॥ शुभमस्तु ।

विषयः । इति वाग्मतीमाहात्म्यप्रशंसायां तीर्थवर्णने प्रह्लाद .. सिद्धिर्नाम ।

" " विभीषणास्त्रसिद्धिर्नाम ।

" " अमोघशैलाभिवर्णा नाम ।

इति वाग्मतीप्रभववर्णनं नाम । इति तीर्थयात्राखण्डः समाप्तः ।

इति वाग्मतीप्रशंसायां प्रद्युम्नविजये गौरीवरदानं नाम ।

" " महर्षिसन्दर्शनो नाम ।

" " प्रद्युम्नविजये प्रभावतीविवाहो नाम ।

इति वाग्मतीप्रशंसायां प्रद्युम्नविजये रत्नाहारो नाम ।

" " " उद्योगसंवर्णनं नाम ।

" " " प्रभावतीविनोदनं नाम ।

" " " नारदालापो नाम ।

" " " विराधदर्शनं नाम ।

" " " महेन्द्रदमनो वधो नाम । ?

इति वाग्मतीप्रशंसायां प्रद्युम्नविजयखण्डः समाप्तः ।

इति वाग्मतीप्रशंसायां पशुपतिपुराणे श्लेष्मान्तकवनावतरणो नाम ।

" " " हरिणेश्वरशृङ्गग्रहणो नाम ।

" " " हरिणेश्वरवाक्यं नाम ।

" " " शृङ्गेश्वरप्रतिष्ठापनो नाम ।

" " " गोकर्णेश्वरप्रतिष्ठापनो नाम ।

इति वाग्मतीप्रशंसायां पशुपतिपुराणे गोकर्णेश्वरप्रतिष्ठापने पूर्व्वार्द्धखण्डः ।

इति वाग्मतीमाहात्म्यप्रशंसायां पशुपतिपुराणे दक्षिणगोकर्णप्रतिष्ठापनो नाम ।

इति पशुपतिपुराणे वाग्मतीमाहात्म्यप्रशंसायां तीर्थानन्दपुराणे पूर्व्वार्द्धखण्डः ।

इति वाग्मतीप्रशंसायां पशुपतिपुराणे पुलस्त्यभाषिता वाग्मत्याः स्तुतिः समाप्ता ।

इति वाग्मतीमाहात्म्यप्रशंसायां पशुपतिपुराणं समाप्तम् ॥

(११६७ ।) पातसारणीटीका . By विश्वनाथ . 9×3 inches. Folia, 11. Lines, 7 on a page. Extent, 193 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

नत्वा विघ्नेश्वरं पातसारिण्या विवृतिः स्फुटा ।

क्रियते विश्वनाथेन मन्दबोधाय सम्प्रति ॥

वेदाब्धीन्द्र १४४४ वियुक्शकाद्गुण ३ हतात्खा + २० फणात् पूरिता

रुद्राः ११ सार्द्धजिना २४ । ३० ग्र सावयवके तत्तुल्ययोगे गते ।

पातः स्याद् व्यतिपातवैधृत इतीहैतायुतैर्नाडिकाः

षष्ट्या ६० फाः स्वघटीगुणाः स्फुटतरास्तस्मादपीतैष्यकः ॥

वेदाब्धीन्द्रैश्चतुश्चत्वारिंशदधिकचतुर्दशशतैर्वियुक्रहितः इष्टशकः कार्य्यः

शेषः गुणहतस्त्रिगुणितः कार्य्यः ॥ इत्यादि ।

End. राहोः कलारूपः अनुपात उक्तः स यथा उक्तस्तथैव ॥

नन्दिग्रामनिवासिकेशवो

नानाशास्त्रकलाकलापवित् ।

तत् सूनुर्निरमाद् गणेश्वरः

पञ्चाङ्गादिति पातसाधनम् ॥

Colophon. इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिता पातसाधनविवृतिः समाप्ता । शुभम् ।

विषयः । गणेश्वरकृतपातसारिण्या व्याख्यानम् ।

---

(२)३७६ ।) पुरश्चर्य्यार्णवः . By प्रतापसिंहसाह . 14×6 inches. Folia, 372. Lines, 12 on a page. Extent, 10,695 çlokas. Character, Nāgara. Date, (?). Appearance, new. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

शुण्डादण्डप्रचण्डप्रहतिहठदलत्प्रौढदोर्दण्डदृप्यद्-

दैत्येन्द्रानीकमुण्डोत्कररचितसमित्ताण्डवत्तौणिशोभः ।

प्रत्यूहध्वान्तधामाधिपतिरधिपतिः सिद्धिमिद्धो गणानां

दद्याद्द्रीन्द्रकन्यास्मरहरनयनानन्दसंवर्द्धनो वः ॥

ब्रह्मोमाधवमाधवात्मकतनुश्छायाननप्रस्फुरन्-
मुग्धाम्भोजमधुव्रतौघशमनः साक्षी जगत्कर्म्मणः ।
ध्वान्तग्रस्तसमस्तपिष्टपपरित्राणे निरस्तः सम-
स्तिग्मांशुस्त्रिदशाग्रणीस्त्रिभुवन .. वः श्रेयसे ॥

.. .. .. ..

.. .. .. ..

नत्वा श्रीगणनायकं दिनमणिं विष्णुं पशूनां पतिं
दुर्गां दुर्गतितारिणीं भगवतीं गुह्येश्वरीमीश्वरीम् ।
श्रीमत्-साहप्रतापसिंहधरणीपालेन नानागमान्
दृष्ट्वा सर्व्वजनोपकारकपुरश्चर्य्यार्णवस्तन्यते ॥ इत्यादि ।

End. नानाविधाः पद्धतीश्च तयोपनिषदोऽपि च ।
ज्योतिःशास्त्रं शालिहोत्रं पुराणानि स्मृतीरपि ॥
सम्यगालोक्य लोकानामुपकारविधित्सया ।
महाराजाधिराजेन सुराज्ञानुकारिणा ॥
श्रीमत्-प्रतापसिंहेन विद्याब्धेः पारदृश्वना ।
संवत्सरे निशानाथवह्निनागधराङ्किते ॥
तपस्यर्जुनपक्षे हि तिथौ भास्करवासरे ।
पुरश्चर्य्यार्णवो नाम ग्रन्थ एष विनिर्म्मितः ॥

.. .. .. ..

.. .. .. ..

Colophon. इति श्रीगिरिराजचक्रचूड़ामणिनरनारायणेत्यादिविविधविरुदावली-विराजमानमानोन्नतश्रीमन्महाराजाधिराजश्रीप्रतापसिंहसाहदेवविरचिते पुरश्चरणार्णवे ब्रह्मादिमन्त्रपुरश्चरणपूर्व्वकं यन्त्रस्तवकवचादिपुरश्चरणभेद-निरूपणं नाम द्वादशस्तरङ्गः । समाप्तं शुभम् ।

विषयः। इति ० षडाम्नायदेवता तदाचारादिनिर्णयपूर्व्वकं चक्रविवेचनं नाम प्रथमः । १ ।

,, दीक्षाकालदेशवास्तुयागकुण्डमण्डपादिनिर्णयपूर्व्वकमङ्कुरार्पण-विधानं नाम । २ ।

इति ० दीक्षाविधौ गुरुचरणादिपूर्व्वकं देवतार्च्चनविधानं नाम । ३ ।

„ क्रियावतीदीक्षाविधिर्नाम । ४ ।

„ क्रियादीक्षाप्रयोगपूर्व्वकं दीक्षाभेदनिर्णयो नाम । ५ ।

„ सामान्यपुरश्चरणविधिर्नाम । ६ ।

„ मन्त्रसिद्धिलक्षणोपायपुरश्चरणभेदनिरूपणं नाम । ७ ।

„ गणेशादिमन्त्रपुरश्चरणविवेचनं नाम । ८ ।

„ दशमहाविद्यापुरश्चरणनिरूपणं नाम । ९ ।

„ सरस्वत्यादिमन्त्रपुरश्चरणपूर्व्वकगायत्र्यादिवैदिकमन्त्रपुरश्चरण-निरूपणं नाम । १० ।

„ दुर्गामन्त्रपुरश्चरणदुर्गोत्सवविधानं नाम । ११ ।

„ ब्रह्मादिमन्त्रपुरश्चरणपूर्व्वकं मन्त्रस्तवकवचादिपुरश्चरणभेदनिरू-पणं नाम । १२ ।

---

(६९६ ।) पुष्पचिन्तामणिः. 10×4 inches. Folia, 16. Lines, 11 on a page. Extent, 484 çlokas. Character, Nāgara. Date, Newār Era, 872. Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमः श्रीगणेशाय नमः ।

कामदं कामदं नत्वा नीत्वा मतिमतां मतम् ।

पुष्पचिन्तामणिं कुर्व्वे वाञ्छितार्थनिकेतनम् ॥

तत्रादौ सामान्यतः पुष्पमाहात्म्यं लिख्यते । तदुक्तं शिवरहस्ये ।

पुष्पैर्देवाः प्रसीदन्ति पुष्पे देवाश्च संस्थिताः ।

किञ्चातिबहुनोक्तेन पुष्पस्योक्तिमतन्द्रिकाम् ॥ इत्यादि ।

End. तुलसीनिषेधस्तु दिव्यवीरपरमिति ताराभक्तिसुधार्णवे तच्चिन्त्यम् ।

दिव्यवीरयोरेव निषिद्धप्रतिपादकवचनाभावात् ॥

Colophon. इति श्रीपुष्पचिन्तामणौ चतुर्थः प्रकाशः समाप्तः । यथा दृष्टं तथा लिखितं — — — — शुभं सम्वत् ८७२ चैत्रः ।

विषयः । अथ सामान्यतः पुष्पविवरणम् । अथ शिवार्च्चने पुष्पनिर्णयः । अथ पुष्पविशेषाणां फलानि । अथ शिवे विहितपत्राणि । अथ निषिद्धानि । इति पुष्पचिन्तामणौ प्रथमः प्रकाशः ।

अथ विष्णोर्विहितनिषिद्धपुष्पपत्राणि । अथ ग्रहाणाञ्च तथा ।

इति पुष्पचिन्तामणौ द्वितीयः प्रकाशः ।

अथ दुर्गाया विहितनिषिद्धपुष्पपत्राणि । पुष्पविशेषाणां फलानि ।

पुष्पविशेषमालाफलानि । अथ प्रतिमापुष्पार्चनविधानानि ।

इति पुष्पचिन्तामणौ तृतीयः प्रकाशः ।

देवीं प्रति विहितनिषिद्धपत्रपुष्पाणि । अथ दक्षिणकाल्यास्तथा । अथ

नीलसरस्वत्याः ।

इति पुष्पचिन्तामणौ चतुर्थः प्रकाशः ।

---

(१०६ ।) पूर्व्वाम्नायतन्त्रम्. By रत्नदेव. 12×5½ inches. Folia, 10. Lines, 9 on a page. Extent, 270 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमः श्रीगुरुपादुकेभ्यो नमः ।

अनन्ताय फट् । करसाधनम् । ऐँ कनिष्ठायै नमः । ह्रीँ अनामिकायै

स्वाहा । श्रीँ मध्यमायै वौषट् । इत्यादि ।

**End.** तर्पण । एकानेक । वलिविसर्ज्जनम् ।

इति पूर्व्वाम्नाये श्रीरत्नदेवप्रणीतके अष्टाविंशतिकर्म्मार्चनं समाप्तम् ।

शुभम् ।

विषयः । इति पञ्चप्रणवन्यासः ।

" हस्तकरन्यासः ।

" अङ्गाष्ठकन्यासः ।

" अङ्गन्यासः ।

" शब्दराशिन्यासः ।

" त्रिविद्यान्यासः ।

" षडङ्गन्यासः ।

" द्वादशाङ्गन्यासः ।

" जलस्मरणम् ।

" भूतशुद्धिः ।

इति गुरुमण्डलपूजा ।
,, ध्यानम् ।
,, पीठपञ्चकम् ।
,, अवधूतादिपञ्चकम् ।
,, भोगविद्यात्रयम् ।
,, गायत्री ।
,, रत्नदेवार्चनम् ।
,, ध्यानम् ।
,, गुह्यात्रयम् ।

---

(२)१८१।) प्रशस्तिरत्नम्. 12×4½ inches. Folia, 33. Lines, 7 on a page. Extent, 1,567 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

गुरुलोकनिवासाय श्रीगुरून् गुर्वनुग्रहात् ।
चिन्तये गुरुभक्त्याहं जिह्वौर्गुर्विपश्चो गुरुः ॥
कात्यायनीश्रुतिदरीजननो गजेन्द्र-
लीलानुकाररुचिरो रुचिरार्ककीर्त्तिः ।
कर्म्मादिमध्यलयविघ्नहरस्वभावो
लम्बोदरो हरहरीदरणं विधत्ताम् ॥

.. .. ..

स्वस्ति श्रीमत् .... महाराजाधिराजः श्रीपृथ्वीपतिवर्म्मा .... गोरक्षपर्व्वते प्रादुर्बभूव । तस्य किल .. .. श्रीचन्द्ररूपसाहवर्म्मा .. .. पुत्रश्रेष्ठो गुणज्येष्ठो बभूव । तस्य खलु .... तनयवरः श्रीविष्णु-साहवर्म्मा .... प्रादुरभवत्तराम् । तस्य .... जीवसाहवर्म्मा ... साम्प्रतं वरीवर्त्ति । तस्य श्रीजीवसाहवर्म्मणः सौशील्यामृतधारालङ्कृ-तया आज्ञया प्रथमं श्रीगुरुपित्रादीनां परोक्षगतानां प्रत्यक्षमिवाभिप्रेतं कथयित्वाः पद्या लेखपरिपाटीकर्म्मप्रशस्तिरत्नरूपं काव्यं कविजनमनोहरं

27

निजशक्तिसारेण कश्चन कविः कविरत्नं प्रकाशयति । तत्र प्रथमं पत्रलेखने विशेषणान्तरं प्रशस्त्यभिधानतः पूर्वं श्रीशब्दं लिखन्ति शिष्टाः । स च श्रीशब्दः कुत्र कतिसंख्यो दातव्य इति निर्णयः साम्प्रदायिकश्लोकेन उच्यते ।

षड्गुरोः स्वामिनः पञ्च द्वे भृत्ये दिगुणा रिपौ ।
श्रीशब्दानां त्रयं मित्रे ह्येकैकं पुत्रभार्य्ययोः ॥ इत्यादि ।

End. तुरुष्कं प्रति सर्व्वेषाम् । स्वस्ति श्रीमज्जयावषितप्रतापाभिभूतद्विषत्कुलशिरोमणिदीप्तज्योतिरधिकोज्ज्वलितनखदीप्तिसंबुद्धाखिलपरिचिताभिप्रायप्रजोद्धारधर्म्मप्रसर्पद्यशःस्तोमसोमप्रकाशप्रकाशितप्रकाशितव्येषु । १ ।

स्वस्ति श्रीमन्निजवंशाचरितहिन्दूद्धप्रतिवर्णानुष्ठितोत्कटान्याशङ्काभयधर्म्मश्रेणीलतालवालोद्यत्प्रकारप्रयतप्राकारदुर्गमदुर्गावस्थितिविहारेषु ।

Colophon. इति प्रशस्तयः समाप्ताः ॥

विषयः । पत्रलिखनप्रणाली ।

---

(१३८२ ।) प्रश्नोत्तरावली . By गणपतिशर्म्मन् . 9 × 2 inches. Folia, 12. Lines, 6 on a page. Extent, 135 çlokas. Character, Newārī. Date, Newār Era, 524. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ श्रीगणेशाय नमः ।

नत्वा सरस्वतीं देवीं स्वल्पा प्रश्नोत्तरावली ।
क्रियतेऽल्पधियानेन श्रीगणपतिशर्म्मणा ॥
श्रीहरिपतिपौत्रेण कमलापतिसूनुना ।
पद्मिनीतनयेनैषा विनोदकारणाय सा ॥
मङ्गलं कं भजेद्गौरी किमाह्वाने गजाननम् ।
कं शची भजते भक्त्या + नुकूलाय किं पदम् ॥
आद्युत्तरा जातिः ॥ इत्यादि ।

End. पुरी हेममयी लङ्का दशकन्धररक्षसः ।
अतिकान्दर्पिणं नूनं कलङ्की याति भूरिशः ॥

प्रश्नोत्तरा जातिः ॥

अक्षरव्यक्तवक्त्राणां मनोज्ञमनसां मुखे ।

– – सुधेव सुराणां सेयं प्रश्नोत्तरावली ॥

Colophon. इति श्रीगणपतिशर्म्मणा विरचिता स्वल्पप्रश्नोत्तरावली समाप्ता । शुभम् । अव्यात् मां स घननिभः । अवतु मां हरिरजः । सम्वत् ५२४ फाल्गुने मासे शुक्लपक्षे चतुर्द्दश्यां तिथौ बृहस्पतिवारे तस्मिन् दिने स्वनिसेवन्तागृहनिवासितो विप्रकुलोद्भवः श्रीगणपतिशर्म्मणः पुत्रः श्रीदेवशङ्करशर्म्मा प्रश्नोत्तरावलीममूमलीलिखत् ॥ शुभमस्तु सर्व्वेषां जगतां सतां सज्जनानाम् ।

विषयः । चित्रकाव्यम् ।

---

(१५७४ ।) प्रसन्नसाहित्यरत्नाकरः By नन्दन. 10 × 3 inches. Folia, 204. Lines, 7 on a page. Extent, 2,856 çlokas. Character, Newāri. Date, (?). Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो वागीश्वर्य्यै ।

विश्वेषां हृदये योऽसौ यत्र विश्वं चराचरम् ।

एकानेकस्वरूपाय तस्मै ज्ञानात्मने नमः ॥

सारेतरप्रविचयं प्रति सप्रयत्ना

धीराः क्षणं भवत सूक्तिषु सावधानाः ।

एते वयं खलु परस्य कृतानि लब्धा-

ण्युद्भाव्य काव्यमुचिते पथि वर्त्तयामः ॥

साम्राज्यं यदि सत्सभास्वभिमतं स्याद्वा कलासु स्पृहा

वाक्कृद्यं यदि चेप्सितं मृगदृशां राज्ञां मनः प्रीणनम् ।

तद्वैयाकरणस्य पाणिनिमतेः साहित्यविद्याविदः

श्रीनन्दस्य समुच्चयः सुमतयः सानन्दमालोक्यताम् ॥

सदर्थालङ्कारं श्रवणपुटपेयं स्फुटरसं

सुधाधारासारप्रतिमगुणसारस्वतमयम् ।

कवीनां कौतूर्थ्यं श्रवणपठनार्थञ्च विदुषां

सहस्रं श्लोकानां व्यरचयदिदं नन्दनकविः ॥

यं मेरुं तुलयन्ति मानमनिकापिण्डैः पयो वारिधेः
कुम्भैर्ये कलयन्ति ये च सिकताः सख्यान्ति गङ्गाभुवः ।
आकाशे कलयन्ति ये [illegible]
ते श्रीनन्दनपण्डितस्य भनितुर्वक्तुं समर्था गुणान् ॥

[illegible] ।

शिल्पं त्रीणि जगान्ति यस्य कविता यत्र त्रिवेदी गिरो
यश्चक्रे त्रिपुरत्रयं त्रिपथगा यन्मूर्ध्नि माल्यायते ।
त्रीन् लोकानिव वीक्षितुं वहति यो विस्फुर्य्यदक्ष्णां त्रयं
स [illegible] ॥

वसुकल्पदत्तस्य ॥ इत्यादि ।

अन्तं खण्डितम् ।

विषयः । नानाकवीनां पद्यसमुच्चयनं कवीनां नामोल्लेखश्च ।

---

(२) ६४ ।) **प्रस्तावरत्नाकरः**. By हरिदास. 12×4 inches. Folia, 135. Lines, 6 on a page. Extent, 1,530 çlokas. Character, Nāgara. Date, Samvat 1890. Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

वन्दे तं गणनाथमर्थमनघं दारिद्र्यदावानलं
शुण्डादण्डविधूतमानसमलं संसारसिन्धोस्तरिम् ।
यं नत्वा गणकोटयः प्रभुवरं सिद्धिं लभन्ते परां
सिन्दूरारुणविग्रहं परिपतद्दानाम्बुधारावृतम् ॥

.. .. .. ..

.. .. .. ..

खारागढे महाराज्ये करुणापुरुषोत्तमः ।
आसीत् प्राज्ञः सतां श्रेष्ठो विख्यातविन्दः कृती ॥
अभवंस्तनयास्तस्य चत्वारो भूरितेजसः ।
तेषां ज्येष्ठः कृष्णदासो गुणैः [illegible] ॥
तस्यानुजौ महात्मानौ दामोदरनरायणौ ।
[illegible] ॥

ज्योतिःशास्त्रवृहत्कथास्मृतिकथा चाचिका ? सामुद्रिका
ग्रन्थान् शाकुनपञ्चतन्त्रचरकान् काव्यादिकांश्चापरान् ।
आलोच्य प्रयतं मुदे मतिमतां भीत्यै च दुष्टात्मनां
विप्रः श्रीहरिदास एष तनुते प्रस्तावरत्नाकरम् ॥
वर्षे वेदरसारसेन्दुकलिते माघासिते पञ्चमी
हस्तार्के वरवीरसाहिनृपतौ श्रीमद्जटापत्तने ।
पुण्ये नार्म्मदकोटितीर्थविषये सम्पूर्णतामागमद्-
विप्रः श्रीपुरुषोत्तमात्मजकृतौ प्रस्तावरत्नाकरः ॥

अथानुक्रमणिका ।

क्रियतेऽनुक्रमः स्पष्टं सुबोधार्थं सुभाषिते ।
नीतिः प्रथमतो ज्ञेया राजनीतिस्ततः परम् ॥
अथ प्रकीर्णकाख्यानमन्योक्तिश्च तथैव च ।
धनप्रशंसाभिमता सज्जनानां प्रशंसनम् ॥
उद्यानाख्यानकञ्चैव देवाख्यानविमिश्रितः ।
दुर्ज्जनानां तथा निन्दा कूटाख्यानकमेव च ॥
सदाचारस्ततो ज्ञेयो धर्म्माख्यानविमिश्रितः ।
स्त्रीणां निन्दाप्रशंसे च तरुणां महिमा तथा ॥
रागाख्यानं शाकुनकमथ सामुद्रिकं मतम् ।
स्वप्नाध्यायः कौतुकानि प्रोक्तानि विविधानि च ॥
ज्योतिःशास्त्रं ततो ज्ञेयं रत्नकोषात् समुद्धृतम् ।
एवं प्रकरणान्यत्र कथितान्येकविंशतिः ॥

इति श्रीकरणकुलालङ्कारपुरुषोत्तमसूनुहरिदासविरचिते प्रस्तावरत्नाकरे अनुक्रमपरिच्छेदः ॥ इत्यादि ।

**End.** कर्णिकारं ससौवीरं गुञ्जात्रिकटुमाधवी ।
षष्टिधान्यं गुडं क्षीरं दष्टो मत्तः शुना पिबेत् ॥
काकूपत्रधूपेन यदा केशसमन्वितः ।
अक्तुभिः कटुतैलाक्तैर्याति मत्स्यविषं पिबेत् ॥

**Colophon.** इति श्रीकरणकुलालङ्कारपुरुषोत्तमसूनुहरिदासविरचिते प्रस्तावरत्नाकरे कौतुकप्रकरणं समाप्तम् । शुभं संवत् १८९० सालमिते चैत्रकृष्णत्रयोदशीराधदिने समाप्तमिदं पुस्तकं श्रीमहाबौद्धोपासकविद्यानन्देनेति । शुभमस्तु सर्व्वजगताम् ॥

---

(११०३ ।) प्रायश्चित्तशौचाचारविधिः. 16 × 3 inches. Folia, 9. Lines, 8 on a page. Extent, 360 çlokas. Character, Newārī. Date, (?). Appearance, new. Prose aud verse. Generally correct.

**Beginning.** नमः श्रीवज्रसत्वाय ।

वज्रसत्वं नमस्कृत्य जगत्त्राणमहाकृपम् ।
प्रायश्चित्तविधिं वक्ष्ये शौचाचारञ्च सुव्रतम् ॥
आचार्य्यः परमो देवः पूजनीयः प्रयत्नतः ।
स्वयं वज्रधरो राजा साक्षाद्रूपेण संस्थितः ॥

प्राणिवधप्रायश्चित्तविषयविभागः कथ्यते ।
तत्र वज्राचार्य्यादिव्रतिनां ब्राह्मणादिवर्णानाञ्च वधस्य महापातकत्वात् तेषां विषया उच्यन्ते । इत्यादि ।

**End.** पञ्चगव्यं सकृत् पीत्वा सन्मन्त्राधिष्ठितं शुभम् ।
सर्व्वपापैर्विनिर्मुक्तः शुद्धो भवति मानवः ॥ इति ।

**Colophon.** इति प्रायश्चित्तविधौ शौचाचारविधौ श्राद्धप्रकरणमिति समाप्तम् । नानाशास्त्रोद्धृतः सुसारः स्वल्पः प्रायश्चित्तशौचाचारविधिरिति ।

विषयः । प्राणिवधप्रायश्चित्तविषयविभागः ।
वज्राचार्य्यादिव्रतिवधप्रायश्चित्तानि ।
ब्रह्मक्षत्रादिवधप्रायश्चित्तानि ।
प्रायश्चित्ताभ्युदयप्रकरणम् ।
गोघ्नप्रायश्चित्तविषयव्यवस्थापनम् ।
अगम्यागमनाभक्ष्यभक्षणस्पर्शनप्रायश्चित्तम् ।
अथ शौचाचारप्रकरणम् । तत्र,—
शौचाशौचे चतुर्थप्रकरणम् ।
अथ श्राद्धविधिः ।

---

(१२६७।) प्रायश्चित्तसमुच्चयः. 10×4 inches. Folia, 74. Lines, 9 on a page. Extent, 1,831 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

Beginning. ॐ नमः शिवाय ।

महेश्वरं नमस्कृत्य भवपाशविनाशकम् ।
ज्ञानक्रियात्मिकां देवीं शक्तिञ्च शिवशीलनीम् ॥
प्रणम्य परया भक्त्या नन्दिस्कन्दविनायकान् ।
शिवज्ञानप्रणेतारं भक्त्या च परमेष्ठिनः ॥
अथ पापविशुद्ध्यर्थं प्रायश्चित्तं समासतः ।
वक्ष्येऽहमागमोद्दिष्टं साधकानान्तु सर्व्वदा ॥
जायते विविधा सिद्धिरुत्तमाधममध्यमाः ।
अन्यथा सिध्यते नैव प्रायश्चित्तविलम्बनात् ॥ इत्यादि ।

End. न्यूनाधिकप्रदानेन देशिको नरकं व्रजेत् ।
तस्मात् सर्व्वप्रयत्नेन यथोक्तन्तु समाचरेत् ॥

Colophon. इति वातुले महातन्त्रे प्रायश्चित्तपटलं समाप्तम् ॥
प्रायश्चित्युक्तिक्रमेणास्ति समुच्चयमन्यैः सद्भिरुदीरितम् ।
शास्त्रेभ्यः संगृह्य मयापि तथैवोक्तं किन्तु सारं समासतः ॥
साराः समुच्चयाः सद्भिः संस्कृत्य सन्त्यनेकशः ।
कृतेषु चेत् कृतिस्तेषामस्माकञ्च तथा कृतिः ॥
मत्तमयूरवंशजे श्रीरणिपत्रलम्बकर्ण इति नाम प्रथितः पृथिव्यां मुनिः ।
निखिलशैवसिद्धान्तश्रोत्रसंस्कारपावनः ।
चन्द्राङ्कितजटाजूतः (टः) कैला (स) स्थेव शङ्करः ॥
श्रीरणिपत्रकाश्रमाद् गोराटिकमठे गमात् । ?
धारायां सौ (स्वौ) यकमिति अनुजग्राह पार्थिवः ॥
आसीत् तत् सन्ततौ मुनिः श्रीईश्वरशिव इति ।
जगतीपतिभिर्नृपैः पूजितपादपङ्कजः ॥
तच्छिष्यो निखिलागमार्थविमलादर्शो मुनिः ।
श्रीहृदयशिव इति त्रिदशेश्वरतुल्यकीर्त्तिः ॥

यस्माच्छ्रितो दिच्तु तपःप्रभावो
उदीर्य्यते साधुजनैर्जगत्याम् ।
हेलादुदूतागमशास्त्रसारः
स झटित्याखण्डितवादकाण्डः ॥
तेनेदं विरचितमनेकसङ्गाम-
संघट्टकोटिनिहिताखिलद्विपि ॥

प्रायश्चित्तसमुच्चयं समाप्तमिति । श्रीलक्ष्मीनारायणप्रीतिरस्तु ॥

---

(१४५६ ।) प्रासाददीपिकामन्त्रटिप्पनम् . 14×3 inches. Folia, 112. Lines, 7 on a page. Extent, 3,136 çlokas. Character, Newārī. Date (?). Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमः शिवाय । श्रीगुरुभ्यो नमः ।

निष्कलं सकलं मिश्रं शिवं नत्वा गुरुं ततः ।
प्रासाददीपिकामन्त्रटिप्पनं लिख्यते मुदा ॥

ततः प्रातरुत्थाय निजहृदयसरसीरुहे शिवं वक्ष्यमाणवद्विचिन्तयन् स्नानद्रव्यैरुपेतः स्नानोचितदेशमवगम्य तत्र तानि शुचिस्थले निधाय मलोत्सर्गशौचं दन्तधावनादि यथोक्तवद्विधाय पार्थिवस्नानाय अरस्नातां हृदोद्धृतां शिरसा निक्षिप्तां शरशोधितां शिखोद्धृत .... कवचेन त्रिधाकृत्वैकेन नाभिपादान्तं पुनरन्येन मूर्द्धादिचरणान्तं अस्त्रेणालभ्य ततः कलाभ्यां सर्व्वेन्द्रियाणि निरुद्ध्य जलान्तरं सुस्मरंस्तिष्ठेत् ॥ इत्यादि ।

End. ग्रामनगरखेटपुरपट्टनपुरीणामपि स्थापनमेवमेव किन्तु तस्मात् पूर्व्वोत्तरे यागः कर्त्तव्यः तन्मध्ये वास्तुबलिर्देयः ॥
इति गृहप्रतिष्ठा नाम अष्टाविंशतिममाह्निकम् ॥
अथ पुष्करिण्यादीनां स्थापनेऽपि यागादिकम् । (अतः खण्डितम्)

विषयः । प्रथमाह्निकम् । १ ।
सुर्य्यपूजा नाम । २ ।
भूतशुद्धिर्नाम । ३ ।

अन्तर्यागो नाम । ४ ।
लिङ्गशुद्धिर्नाम । ५ ।
परिवारार्चनं नाम । ६ ।
पूजाविधानं नाम । ७ ।
भोजनविधिर्नाम । ८ ।
नित्यविधिर्नाम । ९ ।
पवित्रकाधिवासनं नाम । १० ।
पवित्रकविधिर्नाम । ११ ।
दमनकाधिवासनं नाम । १२ ।
दमनकविधिर्नाम । १२ ।
समयदीक्षा नाम । १३ ।
विशेषदीक्षा नाम । १४ ।
निर्व्वाणदीक्षाधिवासनं नाम । १५ ।
निर्व्वाणदीक्षा नाम । १६ ।
निर्व्वाणदीक्षाभेदो नाम ।।१७ ।
आचार्य्याभिषेको नाम । १८ ।
साधकाभिषेको नाम । १९ ।
दीक्षोद्धारो नाम । २० ।
अन्त्येष्टिर्नाम । २१ ।
श्राद्धविधिर्नाम । २२ ।
शिवाष्टकं नाम । २३ ।
प्रतिष्ठाधिवासनं नाम । २४ ।
प्रतिष्ठाविधिर्नाम । २५ ।
प्रासादप्रतिष्ठा नाम । २६ ।
विष्णुप्रतिष्ठा नाम । २७ ।
गृहप्रतिष्ठा नाम । २८ ।

(११६८।) प्रेतमञ्जरी. 11 × 2½ inches. Folia, 27. Lines, 6 on a page. Extent, 753 çlokas. Character, Nāgara. Date, Newār Era, 827. Appearance, fresh. Prose and verse. Generally correct.

Beginning. स्वस्ति। श्रीगणपतये नमः।

अथ पालाशप्रकृतिदाहविधिः। तत्र देशान्तरमरणे पराकद्वयमष्टौ कृच्छ्रान् वा कृत्वा अस्थीनि दहेत्॥ इत्यादि।

End. एवं विष्णुमते स्थित्वा यो दद्यादात्मघातिने।
समुद्धरति तं चिप्रं नात्र कार्य्या विचारणा॥

ततोऽस्थीनि चीरेण चालयित्वा पुर्व्वोक्तप्रकारेण शववद्दग्ध्वा उदकदानादि सपिण्डान्तं कर्म्म कुर्य्यात्॥

Colophon. इति प्रेतमञ्जरी समाप्ता।
श्रेयोऽस्तु सर्व्वदा। नेपालसम्वत् ८२७ वैशाख शुदि १२ लिखिता॥

---

(२)११२।) ब्राह्मणार्थप्रकाशः (खण्डितान्तः). By हरदत्त. 10 × 5 inches. Folia, 10. Lines, 8 on a page. Extent, 125 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः।

यन्महःप्रतिविम्बोऽपि निर्म्मति निखिलं जगत्।
ध्यायेम तं वयं शुभ्रं ज्ञानं यो नः प्रचोदयात्॥
यत्-कृपालेशमात्रेण मन्दोऽपि मन्दतां त्यजेत्।
तं गुरुं शारदारूपं नमामि पुरुषोत्तमम्॥
जरत्खण्डितवाणीभिर्युक्तिभिर्धर्म्मवादिनाम्।
हरदत्तेन कृतिना ब्राह्मणार्थः प्रकाश्यते॥

अथ ब्राह्मणेन वेदोऽध्येतव्य इति श्रूयते तत्र न तावदन्तःकरणावच्छिन्न-चैतन्यं शरीरावच्छिन्न आत्मा अन्तःकरणं शरीरं वा ब्राह्मणशब्दार्थः॥ इत्यादि। (अन्तं खण्डितम्।)

विषयः। ब्राह्मण इति शब्दस्य वेदवेदान्तसम्मतस्यार्थस्य प्रकाशनम्॥

---

(२)१७१।) मतङ्गपारमेश्वरतन्त्रम्. 16 × 6 inches. Folia, 153. Lines, 9 on a page. Extent, 3,935 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Incorrect.

Beginning. ॐ नमः शिवाय ।

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्व्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
हिमवत्यचले रम्ये सिद्धचारणसेविते ।
नानाश्चर्य्यगुणैर्युक्ते – – – – कनिर्म्मितम् ॥
सिद्धीनामुद्भवो यत्र यत्र नास्त्युपसर्गता ।
यत्रान्योऽन्यविरुद्धानां प्रीतिर्भवति तत्क्षणात् ॥
मूर्खोऽप्यमूर्खतां याति भयादप्यधिमुच्यते ।
यत्र नास्त्युपसर्गाणां प्रवेशः शिखरोत्तमे ॥
यत्र सन्निहितो नित्यं भगवान् परमेश्वरः ।
तत्रासौ मुनिशार्दूलस्तपसोत्कृष्टमूर्त्तिमान् ॥
ज्ञानाग्निदग्धकलुषो व्रताम्भःक्षालितात्मवान् ।
शिवध्यानैकचित्तात्मा समाधानस्थितः सुधीः ॥
.. .. .. ..
ततः स भगवान् शम्भुः पार्व्वत्या सहितो हरः ।
स्वां तनुं दर्शयामास मतङ्गाय तपस्विने ॥
ददर्श सहसा विप्रः श्रीकण्ठं विश्वनायकम् ।
स तस्य पादावभ्यर्च्य दण्डवत् पतितो भुवि ॥
तद्भक्ति – – – – – नयनामलवारिणा ।
पादौ प्रक्षालयित्वा तु स्तोतुमारब्धमीश्वरम् ॥
.. .. .. ..
.. .. .. ..
एतस्मिन्नन्तरे देवः प्रहस्योवाच विश्वराट् ।
प्रमार्ज्यज्ञानपटलं – – रतसुशोभया ॥
वाण्या प्राश्वास्य तं विप्रं समुत्थाप्य – – – –
वरं त्वमिच्छ विप्रेन्द्र यत् त्वया मनसेप्सितम् ॥

ततः प्रोवाच हृष्टात्मा रोमाञ्चित वपुर्मुनिः ।
कृतकृत्योऽस्मि देवेश त्वत्प्रसादात् किमद्भुतम् ॥
प्राप्तव्यं यत् प्रयत्नेन तत्प्राप्तमखिलं मया ।
दृष्टे त्वयि जगन्नाथे लोकानुग्रहकारणात् ॥
द्विविधार्थप्रदं श्रीमद्वस्तुरत्नं सुवर्चितम् ।
ज्ञानमज्ञानहन्तारं – – – — मनाकुलम् ॥
विपुलार्थमसन्दिग्धं समासेन ब्रवीहि मे ॥
तस्य तद्वचनं श्रुत्वा मतङ्गस्य महात्मनः ।
ज्ञानानलवपुष्मत्या वाण्या शुभ – – – – ॥
उवाच तस्मै सुप्रीत्या मतङ्गाय महात्मने ।
विचारयुक्तं सद्वस्तु स्फुटमाम्नायदर्शनात् ॥ इत्यादि ।

( अन्तं खण्डितम् । )

विषयः । इति मतङ्गपारमेश्वरे महातन्त्रे उपोद्घातपटलः प्रथमः ।
इति ० विद्यापादसूचनपटलः ।
इति ० विद्यापादे तत्त्वद्वयपटलम् ।
" " पतिपटलम् ।
" " शक्तिपटलम् ।
" " पुंप्रधानेश्वरप्रतिपादनं पटलम् ।
" " विद्यातत्त्वपटलम् ।
इति ० महापादे मायातत्त्वम् ।
इति ० विद्यापादे कलातत्त्वपटलम् ।
" " विद्यातत्त्वपटलम् ।
" " रागपटलम् ।
" " कालपटलम् ।
" " नियतिपटलम् ।
" " पुंस्त्वपटलम् ।
" " प्रधानपटलम् ।
" " गुणपटलम् ।

इति ० विद्यापादे बुद्धितत्त्वपटलम् ।
,, ,, अहङ्कारादिसप्तत्रयतत्त्वपटलम् ।
,, ,, आकाशपटलम् ।
,, ,, वायुपटलम् ।
,, ,, अग्निपटलम् ।
,, ,, तोयपटलम् ।
,, ,, प्रमाणपटलम् ।
,, ,, प्रलयपटलम् ।
,, ,, धर्म्माधर्म्मनिर्णयपटलम् ।
इति ० क्रियापादे दीक्षाङ्गपटलः ।
,, ,, स्नानपटलम् ।
,, ,, अर्चनपटलम् ।
,, ,, अग्निकार्य्यपटलम् ।
,, ,, अधिवासनपटलम् ।
,, ,, स्वप्नपटलम् ।
,, ,, भुवनदीक्षापटलम् ।
,, ,, तत्त्वदीक्षापटलम् ।
,, ,, दीक्षापटलम् ।
,, ,, अभिषेकपटलम् ।
,, ,, उत्तमसिद्धिफलं पटलम् ।
,, ,, कर्म्मपटलम् ।
,, ,, लिङ्गस्थापनपटलम् ।
,, ,, प्रतिमालक्षणपटलम् ।
,, ,, समुदायसाधनपटलम् । क्रियापादं समाप्तम् ।
इति ० योगपादे भोगोपन्यासपटलम् ।
,, ,, योगाङ्गपटलम् ।
,, ,, योगसारसमुच्चयपटलम् ।
,, ,, तत्त्वसाधनपटलम् ।

इति ० योगपादे शिवतत्त्वोपलब्धिपटलम् ।
" " कर्म्मयोगपटलम् ।
" " उपोद्घातसिद्धिपटलम् ।
इति ० चर्य्यापादे समयानुक्रमपटलम् ।
" " आचारपटलम् ।
" " गुरोर्वर्णनपटलम् ।
" " समय्यादि ? वृत्तपटलम् ।
" " तृतीयविधानपटलम् ।
" " शौचपटलम् ।
" " भिक्षाटनपटलम् ।
" " प्रवासपटलम् ।
" " रुद्रव्रतपटलम् ।
( अतः खण्डितम् ।)

---

(१५१२।) मतसार. 12 × 3 inches. Folia, 53. Lines, 7 on a page. Extent, 1,159 çlokas. Character, Newārī, Date, (?). Appearance, fresh. Verse. Incorrect.

**Beginning.** ॐ नमः श्रीकुब्जिकायै ।

श्रीश्रोड्डियानमहं वन्दे कौलिकाज्ञाप्रवर्त्तकम् ।
मायाजालमिदं दिव्यं हिमात्रं सर्व्वसिद्धिदम् ॥
तद्वृत्तिगतञ्चैव जालपीठं नमाम्यहम् ।
तस्योत्तरगतं दिव्यं मन्त्रतन्त्रप्रसिद्धिदम् ॥
एकमात्रगतञ्चैव श्रीपूर्णपीठं नमाम्यहम् ।
अर्द्धमात्रापरं सूक्ष्मं स्वरूपं सर्व्वसिद्धिदम् ॥

.. .. .. ..

ब्रह्मरन्ध्रस्य मध्यस्था अमृताधारशीतला ।
अवन्ती च महौघेन श्रीकुब्जिकां नमाम्यहम् ॥
इति बालकुब्जिनीस्तोत्रं समाप्तम् ॥ इत्यादि ।

**End.** तस्यैवाचनपुण्यस्य नोपमा दृश्यते क्वचित् ।
यस्यैवं पूजयेद्देवि सिध्यते नात्र संशयः ॥

**Colophon.** इति मतसारे दशमः पटलः । वारुणीभेदः समाप्तम् ।

**विषयः ।** कुब्जिनीस्तोत्रम् । भैरवस्तोत्रम् । अभिषेकः । शब्दराशिफलम् ।
दण्डकाष्ठादिपञ्चाभिषेकः । प्रस्तारदीक्षाविधिः । पञ्चप्रणवोद्धारध्यानम् ।
पञ्चपरीक्षा । १ पटलः । पञ्चिकाकल्पे ईदाकालयवम् । २ ।
वारुणीभेदः ।

---

(१२३६ ।) मदनरत्नप्रदीपे प्रायश्चित्तोद्योतः. By मदनसिंह. 14×3 inches. Folia, 259. Lines, 7 on a page. Extent, 5,565 clokas. Character, Newārī. Date, Newār Era, 848. Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** ॐ नमः श्रीगणपतये । श्रीसरस्वत्यै नमः ।
प्रणम्य गिरिजासूनं मदनेन महीभुजा ।
सर्व्वलोकहितार्थाय प्रायश्चित्तं प्रकाश्यते ॥
प्रायश्चित्तविवेकेऽस्मिन्नुद्योते ये निरूपिताः ।
अर्थाः सुखाववोधाय क्रमस्तेषां प्रपूर्य्यते ॥ इत्यादि ।

**End.** प्रायश्चित्तानि यः सम्यक् कुरुते + जितेन्द्रियः ।
परीक्ष्य निपुणं – – – – – मनुभाषितम् ॥ इति ।
इति प्रायश्चित्तप्ररोचनादि ॥
महाराजाधिराजस्य मदनमहेन्द्रस्य शासना ?
श्रीमालिकागूर्जरेण भट्टप्रजात्मजेनट्ट ?
श्रीविश्वनाथेन काशीतीर्थनिवासिना ।
सर्व्वपापक्षयकरं प्रायश्चित्तप्रकारितम् ॥

**Colophon.** इति श्रीकोदण्डपरशुरामत्यादिविविधविरुदावलीविराजमानमानोन्नत-महाराजाधिराजश्रीशक्तिसिंहात्मजमहाराजाधिराजश्रीमदनसिंहदेवविरचिते मदनरत्नप्रदीपे प्रायश्चित्तविवेकश्चतुर्थोद्योतः समाप्तः ॥ सम्वत् ८४८ । भाद्र पद शुदि १२ बुधवारे – – ॥

---

(१११० ।) मनोरमाकुचमर्द्दनम् . By जगन्नाथ. 8 × 3 inches. Folia, 14. Lines, 7 on a page. Extent, 112 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose. Correct.

**Beginning.** श्रीगणेशाय नमः ।

लक्ष्मीकान्तपदाम्भोजमानम्य श्रेयसां परम् ।
पण्डितेन्द्रो जगन्नाथः स्मृति गर्व्वं गुरु + हः ॥

इह खलु केचिन्निखिलविद्वन्मुकुटमणिमयूखमालालालितचरणकमलानां गीर्वाणगुरुगौरवग्रासमांसलमहिममण्डिताखण्डमहीमण्डलानां शेष-वंशावतंसानां श्रीकृष्णपण्डितानां चिरायार्चितयोः पादुकयोः प्रसादा-सादितशब्दानुशासनशास्त्रेषु च पारमेश्वरं पदं प्रयातेषु कलिकाल-वशंवदीभवन्तस्तत्रभवद्भिरुल्लासितं प्रक्रियाप्रकाशं — — — नवोध-निबन्धनैर्दूषणैः स्वयं निर्म्मितायां मनोरमायामाकुलाकार्षुः । सा च प्रक्रियाप्रकाशकृतां पौत्रैरखिलशास्त्रमहार्णवमन्थाचलायमानमानसानाम-स्मद्गुरुपण्डितवीरेश्वराणां तनयैर्दूषितापि स्वमतिपरीक्षार्थं पुनरस्माभि-रपि निरीक्ष्यते । इत्यादि ।

**End.** ( अन्तं खण्डितम् । )

---

(२)२७८ ।) मत्स्यानभैरवतन्त्रम् ( खण्डितान्तम् ). 16 × 7 inches. Folia, 168. Lines, 11 on a page. Extent, 4,775 çlokas. Character, Nāgara. Date, (?). Appearance, new. Verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः ।

अष्टमं पञ्चरत्नेषु फलस्नानं तथा परम् ।
दशमं सर्व्वौषधिस्नानं तीर्थवारि पुनस्तथा ॥
द्वादशं रत्नस्नानन्तु पुनर्न्यासं समाहरेत् ।
सप्तविंशतिरेकत्र षड्विभेदे न्यसेत् क्रमात् ॥
— — — — — —
— — — — — —
— — — — — —

श्रीनाथ उवाच ।

कथयस्व कुलेशानि मूर्त्तिमावाहनं यथा ।

येन विज्ञानमात्रेण सन्देहश्च विनश्यति ॥

श्रीवक्रोवाच ।

उक्तश्च न मया गुह्यं मूर्त्तिभेदं कुलाकुलम् ।

कथयामि रहस्येदं तव भक्त्या विशेषतः ॥ इत्यादि ।

End. खण्डितम् ।

विषयः । इति क्षेत्रपालमन्त्रः ।

इति भैरवध्यानसूत्रम् ।

इति महामूर्त्तिभैरवस्य वक्राष्टके चतुःषष्टिकलाचक्रम् ।

योनिसंस्कारविधिः ।

इति स्रुक्स्रुवसंस्कारविधिः ।

इति घृतसंस्काराणि ।

इत्याद्यावतारे महामन्थानभैरवयज्ञे अन्वये सप्तकोटिप्रमाणे मेरुमार्ग-विनिर्गते लक्षपादाधिके आद्यापीठावतारिते विद्यापीठमार्गे विमल-षट्कनिर्णये श्रीकादिभेदे श्रीचतुर्विंशतिसाहस्रे प्रतिसूत्राधिकारवर्णने क्रमोदयो नामानन्दः ।

इति० मन्त्रांशकजाप्यव्यानस्यानामानन्दः ।

„ चतुर्विंशतिसूत्रे तर्पणविधिसूत्रम् ।

„ चक्राधिकारवर्णनो नामानन्दः ।

„ चक्राम्नायो नामानन्दः ।

„ चक्रपूजाम्नायो नामानन्दः ।

„ क्रमोदयो नामानन्दः ।

„ प्रायश्चित्ताधिकारो नामानन्दः ।

„ शिखाराजविधानो नामानन्दः ।

„ क्रमोदयो नामानन्दः ।

„ ...वात्मपारम्पर्य्याम्नायो नामानन्दः ।

„ गुरुक्रमाधिकारसूत्रम् ।

29

इति० मुद्राधिकारो नामानन्दः ।

,, योगिन्याचार्य्यकुमारीयोगिचर्य्यासिद्धिसाधनचिह्नाधिकारो नामानन्दः ।

,, आद्यावतारदण्डकं नामानन्दः ।

,, आगमावतारो नामानन्दः ।

,, पीठावतारसूत्रम् ।

,, पीठाधिकारं चतुःषष्टिभेदभिन्नं कुलाम्नायपूजाक्रमवर्णनो नामानन्दः ।

इति आगमावतारसूत्रम् ।

पारम्पर्य्याम्नायसूत्रम् ।

आत्मनाम्नायसूत्रम् ।

क्रमसूत्राधिकारम् ।

निर्व्वाणपूजासूत्रं दैशिका नाम ।

सृष्टिसंहारकूटसूत्राधिकारः ।

सर्व्वाम्नायसूत्राधिकारः ।

क्लिन्नाचक्रपूजाक्रमः ।

संवत्सराधिकारिणीदेवीनां पूजाधिकारसूत्रम् ।

द्रव्यसंस्कारपुष्पाघ्यायिसूत्रम् ।

द्वात्रिंशद्देव्या तथा अघोरस्य-द्वारसूत्रम् ।

इति० दिव्यौघादिपारम्पर्य्याम्नायत्रिंश – – धिकारवर्णने क्रमोदयो नामानन्दः ।

,, श्रीनाथावतारो नामानन्दः ।

,, आज्ञापारमेश्वरे स्वामिनीमते चतुर्विंशतिसहस्रसंहितां अम्बाक्रमभाषिते शाम्भवाज्ञावतारिते दशमाधिकारवर्णने क्रमोदयो नामानन्दः ।

इति कादिभेदे श्लोकद्वादशकसूत्रम् ।

,, महासूत्रम् ।

इति देव्यावतार – – – वबोधसूत्रम् ।

पञ्चाशत्पीठमेरुप्रस्तारम् ।

प्रष्टासन्तानसूत्रम् ।

आराध्यमण्डलम् ।

पञ्चाशिकासूत्रम् ।

आज्ञासूत्रम् ।

शिखासूत्रम् ।

महायोगसूत्रम् ।

दिव्यौघपदसिद्धानां योगः ।

खेचराद्याद्वादशवृत्तसूत्रम् ।

देव्या द्वादशवृत्तसूत्रम् ।

पराषट्कनिर्णयसूत्रम् ॥

(अतः खण्डिता ।)

---

(१९३० ।) **महिम्नः स्तोत्रम्.** By **दुर्वासस्.** 9×3 inches. Folia, 21. Lines, 7 on a page. Extent, 317 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमः श्रीगणेशाय । श्रीगुरवे परशम्भवे नमः ।
अनेकशक्तिसङ्घप्रकाशलहरीघनः ।
शुद्धः सच्चिन्मयः पायात् श्रीशम्भुः परमेश्वरः ॥
श्रीशम्भो ते महिम्नः स्तुतिपथभरिताः साङ्गवेदाः — — —
सिद्धान्ताः साङ्गविद्याः सचकितगतयो नैव पश्यन्ति पारम् ।
आद्यन्तं त्वामनन्तं परमशिवगुरो से कथं वर्णयेयु-
स्तस्मात् प्रज्ञानुसारादहमपि भवतः स्तौमि किञ्चिच्चरित्रम् ॥
क्वानन्तात्मप्रकाशस्तव परमहिमापारपीयूषसिन्धु-
स्त्वद्भक्त्यामोदमग्नाः क्व च कविमधुपा ब्रह्मविष्णुप्रमुखाः ।
श्रीशम्भो मोहजम्भो न जनयति परः स्वात्मचर्चा किमेतत्
चित्रं तद्वन्मयापि स्वमतिविभवतः स्तूयसे त्वं न दोषः ॥ इत्यादि । (?)

**End.** सदसदुभयनिग्रहगृहीतमुनिविग्रहो भगवान् ।
सर्व्वासामुपनिषदां दुर्व्वासा जयति देशिकः प्रथमः ॥

Colophon. इति श्रीदुर्व्वासोदेवविरचितं श्रीपरशम्भुमहिम्नःस्तोत्रं षड्न्वयशाम्भवरश्मिविवेकप्रकरणं त्रयोदश सम्पूर्णम् । शुभं भवतु । श्रीगुरुमूर्त्तिर्जयति ॥

विषयः । शिवमहिम्नः स्तवनम् । तत्र—
इति० दुर्व्वासोविरचितं शम्भुमहिम्न उपोद्घातप्रकरणम् ।
इति० क्रियारश्मि प्रकरणम् ।
वर्णरश्मि । मन्त्ररश्मि ।
इति० मातृकाशं स्कान्दरश्मिप्रकरणम् ।
इति० साधारणषड्न्वयरश्मिविवेकप्रकरणम् ।
इति० महाविभूति करणम् ।
इति० श्रीदुर्व्वासोमुनिविरचिते श्रीशम्भुमहिम्नसिद्धान्ते विशेषमहाविभूतिप्रकरणं सम्पूर्णम् । श्रीरस्तु । ( १०० श्लोकाः । )
इति० श्रीदुर्व्वासोविरचितं अन्तर्य्यागविशेषोपचारपरामर्शप्रकरणम् ।
इति० श्रीपरशम्भुमहिम्नस्तोत्रं षड्न्वयशाम्भवरश्मिविवेकप्रकरणं त्रयोदश । ( ३८ श्लोकाः । )

---

(१४६८ ।) मोक्षसोपानटीका. 9 × 3 inches. Folia, 34. Lines, 8 on a page. Extent, 697 çlokas. Character, Newāri. Date, (?). Appearance, fresh. Prose. Incorrect.

**Beginning.** ॐ नमः शिवशक्तिभ्याम् ।
व्योमातीतं परं शान्तं शिवेन शक्ति शाम्भवम् । (?)
भावाभावविनिर्म्मुक्तं शिवशक्तिं नमाम्यहम् ॥
ॐ नमोऽस्तु ते महामाये इति । अस्यार्थो व्याख्येयः ॐकारस्य प्रथममाह । अकार-उकार-मकारध्वनिभेदेन ॐकार उच्यते ॥ इत्यादि ।

**End.** चतुर्वर्गप्रदा मन्त्रा चतुरक्षरसञ्ज्ञका ।
गदितं भैरवोमन्त्रं महामाया नमोस्तुते ॥ (?)

**Colophon.** इति मोक्षसोपानटीका समाप्ता ।
परदेवताप्रीतिरस्तु ।

---

( १४३० । ) भक्तविजयकाव्यम्. By ललितावल्लभः. 10 × 4 inches. Folia, 10. Lines, 7 on a page. Extent, 140 çlokas. Character, Nāgara. Date, Saka Era, 1681. Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

श्रीदेवराट्दिग्गिरिसंभवं तं
निरन्तरं व्योमवने चरन्तम् ।
अहं सहस्रांशुहरिं हरन्तं
ध्वान्तेभयूथं प्रणमामि सन्तम् ॥

श्रीसोमवंशो जयतीहलोके निःशेषतस्तत्स्तवने क्षमाः के ।
पृथ्वीपतिस्तत्र बभूव भूपस्तस्य प्रपौत्रो सुरवैरिरूपः ॥
श्रीपृथ्वीनारायणनामधेयो राजा महान् वज्रधरोपमेयः ।
तस्यानुजाः सन्ततशुद्धभावाः सन्तीह चत्वार उरुप्रभावाः ॥
श्रीमन्महोद्दामकपूर्व्वकीर्त्तिः संग्रामधरः सङ्गरभीममूर्त्तिः ।
जिष्णुप्रभावो दलमर्द्दनाख्यो मध्यस्तृतीयो दलजिच्छुभाख्यः ॥ इत्यादि ।

**End.** + + मघोनो गुणसूत्रनद्धा माला + + सफलदा विशुद्धा ।
अष्टोत्तरश्रीशतपद्यमुक्ता प्रौढ़ा + + श्लोकसुमेरुयुक्ता ॥

इति श्रीमत्पृथ्वीपतिकुलसरोजाम्बरमणेः
प्रभोः पृथ्वीनारायणपरमनाम्नो नृपमणेः ।
यशः कर्पूरांशोत्तमपरिमलं भक्तविजयं
स्वगाख्यं सत्काव्यं जयतु ललितावल्लभकृतम् ॥

**Colophon.** इति श्रीकविललितावल्लभविरचितं भक्तविजयम् ।
इलानिधिकलाशाके तपस्यैकादशीतिथौ ।
श्रीशश्रिपि दले सौम्येऽलिखत् — — — — — कविः ॥ शुभम् ।

विषयः । पृथ्वीनारायणनामकस्य राज्ञः स्तवनम् ॥

---

( ११८८ । ) भट्टोत्पलरत्नमाला टीका. By श्रीपति. 10 × 3 inches. Folia, 251 (leaves 100 to 144 and 229 to 248 are missing). Lines, 7 on a page. Extent, 4,392 çlokas. Character, Newāri. Date, (?). Appearance, tolerable. Prose. Incorrect.

**Beginning.** ॐ नमः श्रीगणेशाय ।

प्रभवविरतिमध्ये ज्ञानबन्ध्या नितान्तं
विदितपरमतत्त्वा यत्र ते योगिनोऽपि ।
तमहमिह निमित्तं विश्वजन्मात्ययाना-
मनुमितमभिवन्दे भग्रहैः कालमीशम् ॥

अहं श्रीश्रीपतिनामा तं कालमभिवन्दे नमस्करोमि । इत्यादि ।

**End.** एतच्छास्त्रमाधुनिकविनिर्म्मितं इति हेतुभूतया – – स्मिन् शास्त्रे
अभ्यासं मावधीरेया (?) किं तर्हि आगमा – मुनिभाषितमिव अर्थस्य
अर्थवशाद्व यैः संक्षिप्य निबद्धमिति ।
शश्वद्वाक्यं प्रमाणं प्रकटपटुमतेर्वेदवेदान्तवेत्तुः
सूनुः श्री + + + + च्युतचरणनतिः श्रीमहादेवनामा ।
तत्प्रोक्तरत्नमाला – – – – – – – – – – –
अयमृषीणां भाषणार्थं आगमायामृषीणां भाषणार्थं
संक्षिप्ती कृतं ॥ ? अपरं मया न कीर्त्तितं न कथितं – – – – – –
मधुरमं ॥

**Colophon.** इति श्रीपतिभट्टविरचितायां भट्टोत्पलरत्नमालानामटीकायां विवरणं देवप्रतिष्ठाप्रकरणं विंशतितमोऽध्यायः ॥ शुभमस्तु सर्व्वदाकारं ॥

विषयः । इति भट्टोत्पलविरचितायां रत्नमालानामटीकायां संवत्सरप्रकरणो नाम । १ ।

इति० तिथिप्रकरणम् । २ ।

,, वारप्रकरणम् । ३ ।

,, योगप्रकरणम् । ४ ।

,, करणप्रकरणम् । ५ ।

,, संस्कारप्रकरणम् । १३ ।

इति भट्टोत्पलविरचितायां ज्योतिषरत्नमालायां राजाभिषेकप्रकरणम् । १४ ।

इति० ज्योतिषरत्नमालानामटीकायां यात्राप्रकरणम् । १५ ।

इति० विवा[illegible]पटलम् । १६ ।

इति० देवप्रतिष्ठाप्रकरणम् । २० ।

---

(७९३ ।) भरतनामदीपक[illegible]शास्त्रम्. (?) 10 × 3 inches. Folia, 5. Lines, 7 on a page. Extent, 111 çlokas. Character, Bengali. Date, (?). Appearance, fresh. Verse. Incorrect.

**Beginning.** ॐ नमः श्रीगणेशाय नमः ।

[illegible]पथशास्त्राष्टवर्णं[illegible]-

विरचितमुखवाहपद्यहकत्तरत्ता ।

[illegible]

वितरति परिसुधी चेतसा शारदा वः ॥ (?)

सर्व्वशास्त्रोद्धृतं रम्यं सर्व्वशास्त्रोद्धृतं रसम् ।

सर्व्वशास्त्रोद्धृतं ज्ञानं सर्व्वशास्त्रविशारदम् ॥

[illegible] ।

[illegible] ॥

[illegible] ।

[illegible] ॥ (?)

आ[illegible] मन्यो[illegible] शून्याकारं निरञ्जनम् ।

[illegible] ॥

श्रीदे[illegible]वा[illegible] ।

अक्षरं लक्षणं देवाः [illegible] वर्णन किं फलम् ।

तत्सर्व्वं कथयेशान को वा अक्षरशासनः ॥ इत्यादि ।

**End.** अक्षरावर्द्धमात्राणि ग[illegible] विचारयेत् ॥

हरति हरनिचितं [illegible] क[illegible] चेतनानाम्

[illegible] ।

वितरति [illegible] मुक्तिं कः प्रयासेष सिद्धि

रहह यदभि ——————— [illegible]स्त्रम् ॥ (?)

सुखिनि सुखनिवासो दुःखितानां विनोदः
श्रवणहृदयहारी मन्मथस्याग्रदूतः ।
अतिचतुरसुगम्यो वल्लभः कामिनीनां
जयति जयति नादः पञ्चमश्चोपवेदः ॥

**Colophon.** इति श्रीभरतनामदीपकनादशास्त्रे कविलक्षणं नाम सम्पूर्णम् ॥

**विषयः ।** अक्षरदेवताकथनम् । अक्षरानुसारेण मात्रानिरूपणम् । छन्दोनिरूपणम् । गीतस्य फलाफलकथनम् । नादनिरूपणम् । गीतलक्षणम् । तस्य भेदाश्च । अन्ते च कविलक्षणकथनम् ॥

---

(१४२७ ।) यदुवंशकाव्यम् (खण्डितम्). By काशीनाथ. $8 \times 3\frac{1}{2}$ inches. Folia, 64 ( leaves 1-19, 24-29, and 39-99 are missing). Lines, 8 on a page. Extent, 1,216 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** चतुर्थसर्गस्य प्रारम्भवाक्यम् ।

रारक्षितारे सारज्ञा जागरूकेण मन्त्रिषु ।
नवेन नवसम्पत्तिः पित्रेव प्रियसन्ततिः ॥
आत्मसूनुसमः शास्ता वो भविष्यति को भुवः ।
रोरुद्यन्ते हरिप्रेम्णा यत्परेण शुचा प्रजाः ॥
यायजूकास्तस्य यज्ञे वावदूकाः सदागमे ।
दन्दशूका दुराचारे तापसा इव मानवाः ॥ इत्यादि ।

**End.** इति भुवि यदुवंशो राजवंशावतंसो
निखिलसुखसरांशो वर्णितो विष्णुवंशः ।
गुणविगुणविचारे संभवन्त्येव सन्तः
परगुणविरसा ये वन्दनीयाः सदा ते ॥
श्रीशङ्करो जनयिता जननी च यस्य
श्रीरोहिणी बुधशिवात्मजतुल्यकीर्त्तिः ।
श्रीकाशिनाथधरणीत्रिदशस्य तस्य
श्रीवंशदो विजयते यदुवंश एषः ॥

कविकाव्यप्रबन्धव्यग्रा सदा मुद्गारवाकुला ।
वन्दनीया दयोर्जिह्वा खलस्य च भयस्य च ॥ (?)

**Colophon.** इति श्रीयदुवंशे महाकाव्ये श्रीकाशीनाथकृतौ दशमः सर्गः ॥

विषयः । इति॰ चङ्प्रयोगो नाम तृतीयः ।
,, लङ्प्रयोगो नाम पञ्चमः ।
,, यजा(ति) चरितो नाम षष्ठः ।
,, रुक्मिणीसंदेशो नाम नवमः ।
,, दशमः सर्गः ।

---

( ८१६ । ) योगमञ्जरी. By वर्द्धमान. 8×3 inches. Folia, 99. Lines, 6 on a page. Extent, 891 çlokas. Character, Newāri. Date, Newār Era, 846. Appearance, fresh. Verse. Generally correct.

**Beginning.** ॐ नमो भगवते वासुदेवाय ।
नमस्तस्मै त्रिनेत्राय त्रिगुणाय त्रिमूर्त्तये ।
ज्ञानगम्यस्वरूपाय ब्रह्मविष्णुशिवात्मने ॥
मन्त्रिणा वीशलेनेयं वाजिनां हितहेतवे ।
द्विजवर्द्धनमादिश्य कारिता योगमञ्जरी ॥
अथ तुरगप्रशंसा । इत्यादि ।

**End.** मात्राव्यवस्था ।
मात्रायां नास्त्यवस्थानं दोषमग्निं बलञ्च यः ।
व्याधिं द्रव्यं च कालञ्च वीक्ष्य मात्रां प्रयोजयेत् ॥
श्रीमन्नरेन्द्रनृपपात्रविनोदहारः
कैलासकैरवशशीव यशःप्रकाशः ।
निर्व्याजदानपरिकल्पितकल्पवृक्षः
श्रीवीशलो जयति वाह्यधुरं धुरीशः ॥
निर्व्याधयः सत्वबलोपपन्ना-
स्तुरङ्गमाः सन्तु महीपतीनाम् ।
योगाय एवात्र मया निबद्धा
स्तैरेव नानागमरत्नभूतैः ॥

30

Colophon. इत्याचार्य्यंज्ञानपतिसुतपण्डितश्रीवर्द्धमाननिर्म्मिता योगमञ्जरी समाप्ता ।
सम्वत् ८४६ ।

विषयः । तुरगप्रशंसा । महाश्वेषलक्षणम् । शालाविधिः । नीराजनाविधिः । वाहनप्रकारः । ऋतुचर्य्या । ( ऋतुभेदे तेषां पोषणविधिः ) अथ औषधाधिकारः । उपसर्गाधिकारः । अथ रोगाधिकारः । औषधाधिकारश्च ।

---

( ५०५ । ) योगयात्रा. By वराहमिहिर. 8 × 3 inches. Folia, 34 (leaves 1 to 4 are missing). Lines, 8 on a page. Extent, 544 çlokas. Character. Newārī. Date, (?). Appearance, fresh. Verse. Generally correct.

Beginning. ( १ – ४ पत्राणि न सन्ति । अतः पञ्चमपत्रस्य प्रारम्भवाक्यं लिखितम् । )

दैवज्ञमन्त्रिसुहृदाप्तवचांसि राजा
यान्नाद्रियेत् स्वमतिचेष्टितहृष्टबुद्धिः ।
सन्नायकेन रहितोऽन्ध इवाचिरेण
हास्यत्वमेति पतितो विषये रिपूणाम् ॥ ८ ।
मेधावी मतिमानदीनवचनो दक्षः क्षमावान् ऋजु-
र्धर्म्मात्माह्यनसूयको लघुकरः षाड्गुण्यविच्छक्तिमान् ।
उत्साही पररन्ध्रवित् कृतधृतिर्वृद्धिक्षयस्थानवि-
च्छूरो न व्यसनी स्मरत्युपकृतं वृद्धोपसेवी च यः ॥ ९ ।
.. .. .. .. .. .. ..
.. .. .. .. .. .. ..
आचारस्थः सागरान्तां धरित्रीं
भुंक्ते दीर्घं कालमुत्खातशत्रुः ।
यत्राचारस्तत्र धर्म्मस्य वृद्धि-
र्धर्म्माद्द्भाग्यं देहभेदेऽपि भुंक्ते ॥ ३५ ।

इति श्रीयोगयात्रायामाचाराध्यायो द्वितीयः ॥ इत्यादि ।

End. द्वारे कदल्यामपि तेन युक्ते
दिनोषिते पायितमायसं तत् ।

सम्यक् स्थितं चाश्मनि नैति भङ्गं
न चानलोऽप्यस्य तस्य कौच्यं ॥ ? २६ ।

**Colophon.** इति योगयात्रायां खड्गलक्षणाध्यायः पञ्चदशः ।
( अतः परं खण्डितम् ) ।

विषयः । इति योगयात्रायामाचाराध्यायः । २ ।
इत्याचार्य्यश्रीवराहमिहिरकृतौ योगयात्रायां अभियोचाध्यायः । ३ । (?)
इति योगयात्रायां योगाध्यायः । ४ ।
इति० निमित्तकाध्यायः । ५ ।
" वस्तुपञ्चाराध्यायः । ६ ।
" नक्षत्रस्नानाध्यायः । ७ ।
" अग्निनिमित्ताध्यायः । ८ ।
" नक्षत्रकोटभम् । ९ ।
" वारिलक्षणाध्यायः । १० ।
" हस्तिशालाविधिः । ११ ।
" हस्तिगीताध्यायः । १२ ।
" मदकारणाध्यायः । १३ ।
" अश्वगीतम् । १४ ।
" खड्गलक्षणाध्यायः । १५ ॥

---

(११३७।) योगसारः. By नागार्जुन. 10×3½ inches. Folia, 8-129. Lines, 9 on a page. Extent, 3,193 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

**Beginning.** ( १ – ७ पत्राणि न सन्ति । अतोऽष्टमपत्रस्य प्रारम्भवाक्यं लिखितम् । )
धात्रीफलानां स्वरसे षड्ङ्गे विपचत्घृत-
शर्करासैन्धवोपेतं तत्सिद्धं सर्व्वगुल्मिना ॥ (?)
धात्री – – लकं घृतम् ॥ इत्यादि ।

**End.** पुष्टिर्व्वर्णबलोत्साहमग्निदीप्तिरतन्द्रिताम् ।
करोति धातुसाम्यञ्च निद्राकाले निषेविता ॥
( अतः खण्डितः । )

पुष्पिका । १०६ पत्रे, इति नागार्जुनकृते योगसारे श्री + + + चिकित्सा ।

---

(१५४२ ।) योगिनीविजयस्तवराजः (ब्रह्मयामलोक्तः.) 8×3 inches. Folia, 92. Lines, 7 on a page. Extent, 625 çlokas. Character, Newārī. Date, Newār Era, 811. Appearance, fresh. Verse. Incorrect.

Beginning. ॐ नमः श्रीमहाभैरवाय ।

बद्धा मालां करालां विकृतनरशिरालम्बमालां गलान्ते
मुक्तैः फुत्कारनादैर्घुरघुरितरवैर्घोरघोरैः सुघोरैः ।
भूतीनां योगिनीनां नवत्रिकविषये षट्प्रकारे चतुष्के
सर्व्वव्यापी शिवोऽयं सकलशिवमयो भैरवो वः पुनातु ॥
देवीभिर्मातृभीरुद्रैर्योगिनीभिः स पालकम् । (?)
एतैः परिवृतो रामः पातु सर्व्वं जगत् सदा ॥
गुह्यस्तवं प्रवक्ष्यामि महाभैरवनिर्म्मितम् ।
भाषितं देवदेवेन भैरवेन महात्मना ॥ इत्यादि ।

End. नष्टो + + ख्यातं योगिनीविजयस्तवम् ।
पिप्पलादेन मुनिना पृथिव्यामवतारितम् ॥
भैरवेण पुराख्यातं देव्या नियममुत्तमम् ।
यः पठेत् परया भक्त्या सोपचारेण नित्यशः ।
स सर्व्वशुभमाप्नोति इत्येवं भैरवोऽब्रवीत् ॥

Colophon. इति ब्रह्मयामले द्वासप्तत्रिंश — — — — — — — — — —
— — — योगिनीविजयस्तवं सम्पूर्णं । समाप्त ।
श्रीभैरवप्रीतिरस्तु । सम्वत् ८११ माघशुक्ल सप्तमी — — — — ॥

---

(१५७८ ।) रत्नकलापः. By विष्णुदेव. 10×3 inches. Folia, 56. Lines, 8 on a page. Extent, 1,120 çlokas. Character, Nāgara. Date, Saka Era, 1612. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ श्रीनमो हरिहरगौरीगणेशदिनेशेभ्यः ॥

यस्मिन्नुदयोपगते जगदिदमखिलं प्रकाशमुपयाति ।
अन्धीभवति विलुप्ते स जयति संसारलोचनस्तरणिः ॥
गर्गवराहश्रीपतियवनाचार्य्यादिकृतनिबन्धेभ्यः ।
रत्नकलापः क्रियते कण्ठाभरणाय विष्णुदेवेन ॥

तत्राशुद्धिः सुधिया शोध्या चान्यादृशं लिखनम् ।
न्यूनञ्च पूरणीयं सतां हि सर्व्वः स्वभावतो मित्रम् ॥

तत्रादौ राश्यभिधानम् ।

मेषो वृषो न्टयुक्कर्कसिंहकन्यातुलालयः ।
धनुर्मृगो घटो मीनो राशिनामान्यनुक्रमात् ॥ इत्यादि ।

End. रिक्तायाञ्च व्यतीपाते विष्टयां परिघवैधृतौ ।
रोहिण्यां कृत्तिकायाञ्च सर्पभे पितृभे तथा ॥
मिश्रितैर्दारुणं रौद्रमुग्रं युद्धञ्च कारयेत् ॥
एतानि जयकराणि ॥

Colophon. इति श्रीविष्णुदेवरत्नकलापे दूतयानादिविधिः परिपूर्णश्चायं ग्रन्थः ।
श्रीरामदत्तो विदितो विदेहे करम्बहावंशजवत्सगोत्रः ।
श्रीवासुदेवोऽस्य सुतो बभूव तदात्मजः श्रीरघुनन्दनाख्यः ॥
श्रीरघुनन्दननन्दनसत्यवतीसूनुविष्णुदेवेन ।
रचितो रत्नकलापः कृपया कुर्व्वन्त्वमत्सराः प्रीतिं ॥
वसुरसशरशशिशाके सुम्बग्रामे सौर आषाढे ।
स्वीयमिति कृत्वा पुस्तकमलेखि कविरत्नविष्णुदेवेन ॥
प्रनर्त्तनपरिभ्रमिस्फुरितभालनेत्रानल-
ज्वलत्त्रिभुवनत्रयत्तुभितलोकशोकोद्यमे ।
स्खलत्सुरसरित्पयःप्रशमितोपतापोदयः
करोतु करुणामयः सपदि भव्यमव्याहतम् ॥
स च ग्रन्थसंख्या । शके १६१२ श्रावण शुक्लनवम्यां अनुराधेऽर्के राज-
दैवज्ञमहादेवेन स्वार्थेन लिखितम् ।
यथादृष्टं तथा लिखितम् ॥ शुभम् ॥

विषयः । इति० राशिप्रकरणम् । १ । ग्रहाणां संज्ञाप्रकरणम् । २ । गोचर-
विचारः । ३ । अष्टवर्गविचारः । ४ । ग्रहशान्तिविधिः । ५ । नक्षत्र-
प्रकरणम् । ६ । नक्षत्रयोगादिशुभाशुभयोगविवेकः । शुभाशुभप्रकर-
णम् । ७ । वृष्टिविचारः । विवाहविचारः । द्विरागमनादिविचारः ।
जातकविचारः । आयुर्दायादिविचारः । जातकादिसंक्षेपः । गृहादि-
विचारः । कृष्यादिप्रकरणम् । दूतयात्रादिविधिः ।

(१५५२ ।) रत्नपञ्चकावतारम्. 6 × $2\frac{1}{2}$ inches. Folia, 71. Lines, 6 on a page. Extent, 852 çlokas. Character, Newārī. Date, Newār Era, 740. Appearance, fresh. Verse. Incorrect.

**Beginning.** ॐ नमः शिवादिभ्यो गुरुभ्यः ।
पश्चाद्‌वर्णरूपस्थं यामलं यच्च व्यापकम् ।
कुलाकुलतया कृत्वा प्रत्यक्तं तं नमाम्यहम् ॥
शृङ्गाटं गौलकान्ते स्फुरदमलमलं पीठविद्यौघयुक्तं
विद्युद्रत्नप्रभाभं प्रलयशिखिशिखाकाररूपं विचित्रम् ।
तन्मध्ये कुब्जिकाख्या सकलगुणयुता ज्ञानसंघं गिरन्ति
श्रीमित्रोत्सङ्गसंस्था ददतु विनयितां भुक्तिमुक्त्युर्म्मिघर्म्मम् ॥
श्रीदेव्युवाच ।
विशेषागमवेत्तारो योग्याहि — — — गृहे ।
कथन्तु भवते देव कौलिकः कुलनन्दन ॥
श्रीभैरव उवाच ।
अकुलञ्च कुलं कौलं कुलाष्टकमतः परम् ।
कुलषट्कं तथाचान्यत् यो जानाति स कौलिकः ॥
श्रीदेव्युवाच ।
ब्रूहि मे जगतां नाथ कुलजं रत्नपञ्चकम् ।
यत् ज्ञात्वा तु महायोगी भुक्तिभाङ्‌मुक्तिभाग् भवेत् ॥
श्रीभैरव उवाच ।
कथयामि यथातथ्यं कुलजं रत्नपञ्चकम् ।
यरं देवि नचाख्येयं रहस्यं यस्य कस्यचित् ॥ इत्यादि ।

**End.** गोपनीयं प्रयत्नेन यदीच्छेच्चिरजीवितम् ॥

**Colophon.** इति श्रीकुलमूलरत्नपञ्चकावतारे रत्नानिर्णये एकादशम पटलः ॥
इति द्वादशसाहस्रे श्रीमत्संहितायां सारात्सारतरं रत्नपञ्चकावतारं समाप्तम् ॥ संवत् ७४० ज्यदं श्री३ भवानीशङ्करप्रीतिन श्रीकालिदासेन सञ्चय याफा ।

विषयः । इति कुलमूलरत्नपञ्चभावतारे तृतीयनिर्णये प्रथमः पटलः ।
इति० कुलाष्टकनिर्णये । २ ।

इति० श्रीषट्कनिर्णये । ३ ।
,, तृतीयनिर्णये । ४ ।
,, महामण्डलपूजाधिकारे । ५ ।
,, श्रीक्रमोद्धारविधौ । ६ ।
,, गूढस्थाननिर्णये । ७ ।
,, श्रीक्रमपूजाभिधाने । ८ ।
,, योगज्ञानहंसादिनिर्णये । ९ ।
,, पवित्रकविधौ । १० ।
,, रत्ननिर्णये । ११ ।

---

(२)११८।) रसहृदयः. By गोविन्दभगवत्. 10×4 inches. Folia, 41. Lines, 7 on a page. Extent, 574 çlokas. Character, Nāgara. Date, (?). Appearance, new. Verse. Incorrect.

**Beginning.** श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

जयति यदन्यगदकुलमखिलमदं यस्य तु यदन्यम् ।
हृदये स च गलित्वा ज्ञात्वा रसरूपिणी करणा ॥ (?)
पीताम्बरोथवलिजीर्णं रत्नय वहलरागगाभहृचरः ।
स जयति हरिहरयोर्यस्माद्र विदलितभवदैन्यदुःखभरः ॥ (?)
मूर्च्छित्वा तु हरति रुजं बन्धनमनुभूय मुक्तिदो भवति ।
अमरीकरोति च मृतकोन्यकरुणाकरसुता तु ॥ (?)
सुरगुरुगोद्विजहिंसापापकलाभिभवं किलासाध्यम् ।
स्वौ – न्ततदपि च समये यस्तस्माकपवित्ररतः ॥ (?)
.. .. .. .. .. .. ..
सिद्धे रसे करिष्ये महिमहं निर्ज्जरामरणम् ।
.. .. .. .. .. .. .. ॥
तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमम् ।
दिव्यां तनुश्च विधयो हरगौरीसृष्टसंयोगात् ॥
तस्यादिसाधनविधौ सुधियां प्रतिकर्म्मनिर्म्मलाः प्रथमम् ।
अष्टादशसंस्कारा विज्ञातव्याः प्रयत्नेन ॥ इत्यादि ।

End. एवं रससंसिद्धो दुःखजरावर्ज्जितो गुणवान् ।
खे गगनेन च नित्यं सञ्चरति सकलभुवनेषु ॥
दाता भुवनत्रितये स्रष्टा रोचे ब्रह्मयोनिरिव ।
विष्णुरिव पालनार्थे संहर्त्ता रुद्र इव सकलम् ॥

Colophon. इति श्रीगोविन्दभगवत्पादविरचिते रसहृदये जीर्णरसक्रियाधिकार एकविंशतितमः पटलः ।
श्रीधनशिष्ठुनदसमो रमणो रमणीयगुणो रसिकवृतः ।
नारायणसेवकतो रसहृदयमिदं रसेन समग्रहीत् ॥ (?)

विषयः । इति० प्रथमः पटलः ।
रसशोधनविधिः ।
इति० द्वितीयः पटलः ।
,, तृतीयः पटलः ।
,, चारणाधिकारः । ४ ।
,, गर्भद्रुतिर्नाम । ५ ।
,, बीजादिवाह्यद्रुतिजारणायुक्तः । ६ ।
,, जारणाधिकारः । ७ ।
,, रसच्चानं ? नाम । ८ ।
,, रसोपरसलोहशोधनं नाम । ९ ।
,, रसोपरससत्त्वपातनं नाम । १० ।
,, बीजनिर्वहनाधिकारो नाम । ११ ।
,, द्वन्द्वाधिकारो नाम । १२ ।
,, सङ्करबीजाधिकारः । १३ ।
,, सङ्करबीजजीर्णाधिकारः । १४ ।
,, वाह्यद्रुत्यधिकारः । १५ ।
,, सारणाधिकारः । १६ । १७ । १८ ।
,, पिष्टिस्तम्भादिविधिः । १९ ।
,, हेमदलाधिकारः । २० ।
,, शरीरोधकरसक्रिया ।

पत्रान्नकरसक्रिया । (?)

धनसत्वक्रिया ।

जीर्णरसक्रिया ।

इति० जीर्णाधिकारः । २१ ।

---

(१४७८ ।) रागमाला or रागलक्षणम्. By भरत. 10×4 inches. **Folia, 14.** Lines, 7 on a page. Extent, 233 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Verse. Correct.

**Beginning.** श्रीगणेशाय नमः ।

प्रणम्य भरतो भक्त्या सर्व्वेशं शिवदं शिवम् ।
गीतस्य लक्षणं प्राह वादिमत्तगजाङ्कुशः ॥
धर्म्मार्थकाममोक्षाणां साधनं गीतमुच्यते ।
अतस्तु तत् प्रयत्नेन गेयं श्रोतव्यमेव च ॥
गुरुदेवद्विजातीनां यत् पुरो गीयते नरैः ।
तद्धर्म्माय भवेत् तेषां स्वर्गाय विजयाय च ॥
भूमिपार्थन्तु यद्गीतं तत् सर्व्वं जनयेत् फलम् ।
सम्मानं सम्पदः प्राप्तिं प्रसिद्धिञ्च धरातले ॥
यद् गीतं रमणीकर्णौ मधुरं याति कृतस्वशः ।
तेन काममवाप्नोति यद्यपि स्याद् विरूपकः ॥
स्वेच्छया गीयमानोऽपि गीयते यत् स्वशक्तितः ।
तन्मोक्षाय भवेत् पुंसां निष्कामानां न संशयः ॥

स्कन्दपुराणे ।

नाट्यं नर्त्तं तथा नृत्यं त्रेधा तदिति कीर्त्तनम् ।
नाट्यभेदान् ददौ पूर्व्वं भरताय चतुर्मुखः ॥ इत्यादि ।

**End.** आसावरीरागे । . . . . . .

वर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
विभ्रद्वासः कनककपिशं वैजयन्तीञ्च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दै-
र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्त्तिः ॥

31

**Colophon.** इति श्रीरागमालायां रागरागिण्युदाहरणलक्षणपूर्व्वकध्यानकथनं समाप्तम् ॥ हरिर्हरतु दुरितम् । शङ्करोतु शङ्करः ॥

विषयः । रागवेलानिरूपणम् । रागरागिण्युदाहरणम् । रागरागिणीनां ध्याननिरूपणम् ।

---

( २ ) ३२ । ) राजकल्पद्रुमः . By राजेन्द्रविक्रमदेवसाह . 12 × 4 inches. Folia, 73. Lines, 7 on a page. Extent, 1,213 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

गणेशं प्रणिपत्यादौ श्रीमद्राजेन्द्रविक्रमः ।
कवीश्वरः प्रतनुते राजकल्पद्रुमं शुभम् ॥ १ ।
खण्डिताखिलविपक्षमण्डलो
विक्रमो हिमगिरौ समागतः ।
चित्रकूटशिखरादिति काव्ये
वर्णितः कुलपुराणपण्डितैः ॥ २ ।
तत्-पुत्रो जिल्लराजोऽभूदजितस्तत्सुतो नृपः ।
अटल्लराजस्तस्माच्च तुषाराजस्तदात्मभूः ॥ ३ ।
ततो विर्मिकिराजोऽभूद्धरिराजस्तदात्मजः ।
श्रीवल्लराजस्तत्पुत्रस्तस्मान्मन्मथभूपतिः ॥ ४ ।
श्रीजैनखानो ह्यभवत् सूर्य्यखानन्टपस्ततः ।
मौचाखानः सुतस्तस्य श्रीविचित्रस्ततः स्मृतः ॥ ५ ।
राजा वैचित्रिरासीद् गुणगणगणितः श्रीयशो ब्रह्मसाही
तत्पुत्रो द्रव्यसाही विधुवसुनिगमग्नौयुते शाककाले ।
गोर्खादेशप्रवेशी सितबुधसहिते भाद्रमासे यशस्वी
ब्रह्मज्ञानी स दानी धनद इव धनी जिष्णुतुल्यो नरेन्द्रः ॥ ६ ।
छेत्तारीणां ततोऽभूत् पशुपतिरिव यो दर्शनीयः सुनीति-
धीरो वीरः स राजा विदितपरमतो वेदवेदाङ्गवेत्ता ।
आशापालांशकत्वात् तदधिपतनयः पूर्णकृत् पूर्णसाही
पूर्णांशोऽतो यतोऽसौ नृपवरतनयो रामसाहिर्बभूव ॥ ७ ।

श्रीमान् गोरक्षदेशे समभवदपि यो रामसाहिर्क्षितीश-
स्तस्याभूत् पुत्रधुर्य्यो नृपकुलतिलको डम्बराख्यो महीशः ।
तस्मात् श्रीकृष्णसाहिर्हरिरिव विदितो जात एतस्य पुत्रः
शूरः श्रीरुद्रसाही सकलगुणगणालङ्कृतो रुद्ररूपः ॥ ८ ।
अर्ज्जुनसाम्यगतो यो नाशितशत्रुस्तदात्मजो धीरः ।
श्रीपृथ्वीपतिसाहिर्गोरक्षाधीश्वरो वीरः ॥ ९ ।
श्रीमद्गोरक्षशैले ह्युदयगिरिगतः सूर्य्यवद्भासमानो
राजा श्रीवीरभद्रस्तदधिपतिसुतो रामचन्द्रेण तुल्यः ।
पुत्रस्तस्यातिशूरोऽर्जुन इव समरे शत्रुहन्ता महात्मा
श्रीदुर्गाभक्तियुक्तस्तदनु च नरभूपालसाही नरेन्द्रः ॥ १० ।
स्कन्दः शिवस्येव हरेर्जयन्तः शौरेर्हरिः पंक्तिरथस्य रामः ।
तस्यात्मजो भव्ययथार्थपृथ्वीनारायणाख्यो नृपतिर्बभूव ॥ ११ ।
पृथ्वीनारायणो यो गुणगणगणितो जिष्णुतुल्यः स राजा
जित्वा नेपालभूपान् स्ववशपरिणतां राज्यलक्ष्मीं विधाय ।
व्योमाङ्कस्कन्दवक्त्रक्षितिमितसुशके भाद्रशुक्लोत्तरायां
भूते सौरे महात्मा न्यवसदतिसुखं कान्तिनाम्न्यां नगर्य्याम् ॥ १२ ।
बभूवतु द्वौ गिरिशात्मजाभौ सुतौ सुविक्रान्ततरौ हि तस्य ।
प्रतापसिंहः प्रथमो हि राजा भ्राता बहादूर इति प्रसङ्गः ॥ १३ ।
प्रतापसिंहाधिपराजपुत्रो लोके प्रसिद्धो रणबाहदूरः ।
गीर्व्वाणयुद्धादिमविक्रमस्तु तस्यात्मजन्माजनि कृष्णतुल्यः ॥ १४ ॥
श्रीमहाराजगीर्व्वाणयुद्धविक्रमवर्म्मणः ।
राजेन्द्रविक्रमो राजा सुतः सर्व्वगुणान्वितः ॥ १५ ।

इह खलु वैदिकस्तान्त्रिको मिश्र इति त्रिविधो मखः त्रयाणामीप्सिते-नैव विधिना मां समर्चयेदित्यनेन तान्त्रिकक्रियायोगस्य परमपुरुषार्थ-त्वाद्राजकल्पद्रुमाभिधानतान्त्रिकविषयकप्रकरणाभिधानं सफलम् । तत्र हि दीक्षितस्यैव सर्व्वकर्म्मस्वधिकारात् पूर्व्वं दीक्षाप्रकार उच्यते ॥ इत्यादि ।

End. एवं यः पूजयेद्देवं त्रिकालं धर्म्ममाचरन् ।

न जातु वैरिभिर्दुःखैः पीड्यते हरिरक्षितः ॥

Colophon. इति श्रीमहाराजराजेन्द्रविक्रमसाहविरचिते मन्त्रकल्पद्रुमे पद्मायतनपूजाकथनं समाप्तम् ।

यावद् दुर्गाहरिहरविरिञ्चगाद्यो देववर्गो
यावन्मेरुप्रभृतिगिरयो नारदाद्याश्च सिद्धाः ।
यावद् गङ्गा वहति गगने सागरेऽप्यस्ति चाम्बु
तावद्भूत्यः प्रचरतुतरां राजकल्पद्रुमोऽयम् ॥

इति श्रीगिरिराज चक्रचूडामणि .. .. .. .. कान्तिपुरविरोचमान .. ... विक्रमसाहदेवस्य सुतेन महाराजराजेन्द्रविक्रमसाहदेवेन विरचिते राजकल्प अभिधाने मन्त्रशास्त्रनिबन्धे चतुर्दशः पूजापटलः ॥

विषयः । इति श्रीमन्महाराजराजेन्द्रविक्रमसाहकृते राजकल्पद्रुमे दीक्षाप्रयोगः प्रथमः पटलः ।

इति ० पुरश्चरणनिर्णयः । २ ।
,, दीक्षाप्रयोगः । ३ ।
,, द्वारपूजादिमातृकान्यासान्तः । ४ ।
,, पीठपूजादिलोकपालान्तपूजाकथनम् । ५ ।
,, अग्निप्रकाशः । ६ ।
,, ७ । ८ ।
,, विष्णुमन्त्रप्रकरणम् । ९ ।
,, शिवमन्त्रादिकथनम् । १० ।
,, ११ ।
,, यजुर्वेदविधानोक्तं धनुर्वेदमन्त्रदीक्षाप्रकरणम् । १२ ।
,, १३ ।
,, पूजापटलः । १४ ।

---

(२) ३२ ।) राजविधानसारः. By रङ्गनाथसूरि. 12 × 4 inches. Folia, 30. Lines, 6 on a page. Extent, 360 çlokas. Character, Nâgara. Date, (?). Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः। श्रीगुरुचरणाभ्यां नमः।

प्रणम्य गोविन्दपदारविन्दं
देवीं गिरं गौरवमङ्घ्रियुग्मम्।
लोकद्वयानन्दकरं करोति
गूढाशयं राजविधानसारम्॥
नानानिबन्धनविलोकनखेदशान्त्यै
संगृह्य धर्म्मनयमूलवचो विभाव्य।
सारं (?) निगृह्य नृपशिक्षणकौतुकाय
श्रीरङ्गनाथकृतिना रचितो निबन्धः॥
नेपालदेशालिककान्तिपुर्य्यां
गौर्व्वाणयुद्धोत्तरविक्रमस्य।
राजाधिराजस्य मनःसरोजं
प्रकाशयेद्राजविधानसारः॥

पूर्णाङ्गो धर्म्मनिष्ठो गुणगणनिपुणः शक्तिसम्पन्नसारो
नानोपायप्रकारावसररचनविन्नीतिविज्ञः कलावान्।
भूपालेन्द्रो विपक्षं तृणमिव लघयन्नीतिचर्य्याकलापै-
र्यावज्जीवं प्रमोदं बहुविततयशो विन्दते स्वर्गमायुः॥
तस्माद्राजानिशं सर्व्वसङ्गादि परिसाधयेत्।
अभ्यसेद्धर्म्मनीत्यादि शासनं गुरुसेवनात्॥ इत्यादि।

**End.** फलानुमेयाः सर्व्वत्र परोक्षगुणवृत्तयः।
तस्मात् परोक्षवृत्तीनां फलैः कर्म्मोपलक्षयेत्॥
सुवृत्तो राज्यरक्षादिसमर्थश्च यदात्मजः।
तदा मन्त्रादिसम्मत्या यौवराज्येऽभिषेचयेत्॥

ख्यातः पण्डितराजरम्यपदवीं यो ह्यद्रिराजेश्वरा-
दाप्तः श्रीव्रजनाथनामविदितो वेदाङ्गशास्त्रोज्ज्वलः।
भूपानन्दिनि तत्-सुतेन रचिते नीतिप्रबन्धेऽतुले
संपूर्णो नृपधर्म्मबोधनिपुणो देतो विलासः शुभः॥

**Colophon.** इति श्रीमद्विद्वन्मुकुटमणिगणकिरणनिराजितचरण-श्रीपण्डितराज-

व्रजनाथात्मज-श्रीपण्डितराज-रङ्गनाथसूरिविरचिते राजविधानसारे रा-
जधर्म्मकथनो नाम द्वितीयो विलासः । शुभमस्तु समीहताकर्त्तुः ॥

विषयः । इति ० साङ्गोपाङ्गनिरूपणो नाम प्रथमो विलासः ।
,, राजधर्म्मकथनो नाम द्वितीयो विलासः ।

---

(१४१८ I) रामायणनाटकम् . By धर्म्मगुप्त. 12×4 inches. Folia, 43. Lines, 9 on a page. Extent, 968 çlokas. Character, Newārī. Date, (?). Appearance, decaying. Prose and verse. Generally correct.

**Beginning.** ॐ नमो नाटेश्वराय ।
नमोऽस्तु सर्व्वदेवेभ्यो द्विजातिभ्यः शुभं तथा ।
जितं सोमेन वै राज्ञा चारोग्यं + + + + + ।
ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा ।
प्रशास्ति मां महाराजः पृथिवीं + ससागराम् ॥
राष्ट्रं पुत्र + + + + + सम्वर्द्धिताम् ।
प्रेत्याकर्त्तुर्महान् धर्म्मो भवतु ब्रह्मभाषितः ॥
काव्यकर्त्तुर्यशस्त्वास्तु धर्म्मश्चापि प्रवर्द्धताम् ।
इज्यया चानया नित्यं प्रीयन्तां देवता इति ॥
ॐ नमो नृत्यनाथाय ।
ध्यानालङ्कृतलोचनो गिरिसुतावक्त्रं ततः सोत्सुकः
किं तन्मे तपसीति चञ्चलमना आकृष्टचापे स्मरे ।
भ्रूभङ्गाकुलभीषणो दृगनलप्रव्यक्तभीमो हतो
मोहाशो रतिशोकसाश्रुवदनः शम्भुश्चिरं पातु वः ॥ (?)
.. .. .. .. .. .. ..
.. .. .. .. .. .. ..

सूत्र । आदिष्टोऽस्मि श्रीमतो भगवतो गोपालेश्वरस्याराधनपरायणेन श्रीशिखर-
नारायणचरणसेवकेन श्रीमङ्क्ष्वरीतत्परेण सुरकौकुलकमलकानन-
विकाशनैकभास्करेण — — — — श्रीमता जययूथसिंहदेवेन अस्मा-
माकं हरिशङ्करयथयात्रामहोत्सवप्रसङ्गेन नानादिग्देशसमागताः सभा-

सदो वर्त्तन्ते । तत्रभवतः श्रीरामदासहृदयनन्दनस्य परमराजकवेरार्य्य- श्री + ल-सरस्वतीप्रथितकीर्त्तिमण्डलस्य श्रीमतो धर्म्मगुप्तस्याभिनवकृतं चतुरङ्कुरामायणनाटकमभिनयितव्यमिति । इत्यादि ।

**End.** ( खण्डितम् । )

---

(१५६२ ।) रूपावली. By राघवराममिश्र. 10×3 inches. Folia, 16. Lines, 5 on a page. Extent, 240 çlokas. Character. Nāgara. Date, Saka Era, 1714. Appearance, fresh. Prose and verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

प्रणम्यादौ गणपतिं सर्व्वविघ्नविनाशनम् ।
शम्भुञ्च परमात्मानं गुरुञ्च सकलार्थदम् ॥
देवीं संनम्य शिरसा सर्व्वज्ञानैकदीपिनीम् ।
क्रियते राघवेणादिशब्दानां रूपनिर्णयः ॥

श्रीमत्साहवहादुरस्य सुमतेर्भूदेवदातुः सदा
नित्योत्साहयुतस्य भूपतिपतेर्वीरस्य नित्यं मुदे ।
बालानां मतिवैभवाय हि सुखोपायेन बुद्धेरियं
शुद्धाशुद्धविचारनिर्म्मलधिया धीरेण संशोध्यताम् ॥

अथाशब्दस्यार्थः । अकारो वासुदेवः । नन्वशब्दो वासुदेववाचक एतन्मध्ये प्रमाणम् ।

अकारो वासुदेवः स्यादाकारस्तु पितामह इति । इत्यादि ॥

**End.** वस्तुतस्त्वेतेषां पुंस्त्वमेव लिङ्गान्तरं तु विशेष्यवाचक इत्यवधेयम् ॥

शरण्यो भूपानामवनिसुरसूत्रामविटपी
पटीयान् भूभारोद्वहन इति यस्य प्रतिदिशम् ।
प्रसिद्धिः सिद्धा श्रीयुवनृपतिराजस्य भवतात्
मुदे तस्यैकार्णप्रकृतिरिह रूपावलिरियम् ॥ (?)

**Colophon.** इति श्रीमद्राघवराममिश्रविरचिता रूपावली समाप्तिमगात् श्रीशाके १७१४ श्रीसम्वत् १८४९ श्रावण शुदि १३ रोज रामचन्द्रोपाध्याय- लिखितम् । शुभम् ।

विषयः । स्वरवर्णानामर्थभेदनिरूपणम् । अर्थभेदेन तेषां लिङ्गभेदनिरूपणञ्च ॥

(६७।) ललितार्चनचन्द्रिका. By सच्चिदानन्दनाथ. 8×4 inches. Folia, 140. Lines, 10 on a page. Extent, 4,725 çlokas. Character, Nāgara. Date, (?). Appearance, old. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

अथ ललितार्चनचन्द्रिका लिख्यते ।

शिवं गुरुं गणाधीशं नत्वा श्रीपरदेवताम् ।

ललितायाः समेदायाः प्रवक्ष्येऽर्चनचन्द्रिकाम् ॥ इत्यादि ।

**End.** भविष्यपुराणे ।

विभवे सति यो मोहात् न कुर्य्याद्विधिविस्तरम् ।

न तत्फलमवाप्नोति – – – – – – मानवः ॥

इत्यासां विस्तरः ।

सच्चिदानन्दनाथेन सहजानन्दचेतसा ।

चन्द्रिकायां प्रणीतायां प्रकाशः + + + शकः ॥

Colophon. इति श्रीसच्चिदानन्दनाथविरचितायां ललितार्चनचन्द्रिकायां नैमित्तिकपूजाधिकारिनिरूपणप्रबोधकं नाम पञ्चविंशः प्रकाशः समाप्तः ।

श्रीसच्चिदानन्दमुनीन्द्रवर्य्यः शिवाप्रसादाधिगता – – – ।

निरस्तसांसारिकमोहजालो नियोगतः श्रीपरदेवतायाः ॥

पीठे जालन्धराख्ये प्रथितकरुपालक्तजः प्रार्थितः सन्

शिष्यैः संसारतप्तैः सकलसुखकरीं चन्द्रिकामाततान ।

ख्यातां नाम्नाथ लोकेऽर्चनयुतललितानामयुक्तां बुधा या-

माश्रित्याभ्यर्च्य देवीपदयुगममलं प्राप्नुयुर्धाम नित्यम् ॥

इति श्रीसर्व्वाचार्य्योत्तमोत्तमश्रीमत्सच्चिदानन्दनाथविरचिता ललितार्चनचन्द्रिका समाप्ता । शुभमस्तु ॥

विषयः । इति० प्रातर्निष्क्रमणविधिर्नाम प्रथमः प्रकाशः ।

„ तान्त्रिकस्नानविधिः । २ ।

„ सन्ध्यावन्दनप्रबोधकः । ३ ।

„ सूर्य्यार्घ्यदानप्रबोधकः । ४ ।

इति० द्वारपूजाविधिप्रबोधकः । ५ ।

,, पूजाप्रारम्भप्रबोधकः । ६ ।

,, भूतशुद्धिप्राणप्रतिष्ठाप्रबोधकः । ७ ।

,, मातृकान्यासप्रबोधकः । ८ ।

,, षट्त्रिंशत्तत्वन्यासप्रबोधकः । ९ ।

,, १०

,, ११ ।

,, श्रीचक्रन्यासप्रबोधकः । १२ ।

,, करशुद्धिप्रबोधकः । १३ ।

,, मूलविद्याप्रबोधकः । १४ ।

,, महाषोढान्यासप्रबोधकः । १५ ।

,, मुद्राविचारणादिप्रबोधकः । १६ ।

,, पात्रास्वादनप्रबोधकः । १७ ।

,, आत्मपूजातृतीयजनपञ्चपतनपूजाप्रबोधकः । १८ ।

,, १९ ।

,, २० ।

,, २१ ।

,, २२ ।

,, २३ ।

,, समयाचारबोधकः । २४ ।

,, नैमित्तिकपूजाधिकारिनिरूपणबोधकः । २५ ।

---

(२)२३४ ।) वाक्यसुधाटीका. By ब्रह्मानन्दभारती. 12 × 4 inches. Folia, 13. Lines 20 on a page. Extent, 780 çlokas. Character, Nāgara. Date, (?). Appearance, decaying. Prose and verse. Generally correct.

**Beginning.** ॐ श्रीगणेशाय नमः । श्रीदक्षिणामूर्त्तये नमः ।

यस्मात् सर्व्वं समुत्पन्नं चराचरमिदं जगत् ।

इदं नमो नटेशाय तस्मै कारुण्यरूपिणे ॥

32

कारणं खादि (?) जगतां मारणार्थमनागसम् ।

वारणाननमात्मानमद्वयं समुपास्महे ॥

.. .. .. .. .. ..

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।

मया वाक्यसुधाटीका यथामति विरच्यते ॥

न ख्यातिलाभपूजेच्छा टीकाकरणकारणम् ।

न विद्वत्ताबलं वात्र मुक्तिरेवात्र कारणम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्ति......परमकृपानिधिश्रीभारतीतीर्थगुरुः प्रकरणप्रतिपाद्यमानमर्थं प्रथमश्लोकेन तावद् दर्शयति । रूपं दृश्यं इत्यादि । इत्यादि ।

**End.** अतएव मोक्षशास्त्रस्यापि साफल्यं स्यादित्ययमेवास्य प्रकरणस्य समस्तवेदान्तशास्त्रस्य च महातात्पर्य्यत्वेन...तस्मात् सर्व्वमनवद्यमिति ।

**Colophon.** इति श्रीमत्-परमहंसपरिव्राजकाचार्य्य-श्रीमदानन्दभारतीमुनिवर्य्यशिष्य-ब्रह्मानन्दभारतीमतिप्रक्लृप्ता वाक्यसुधाटीका समाप्ता । ... ॥

---

(१३१३ ।) विद्यानदीपिकाविवृतिः. 11 × 4 inches. Folia, 45. Lines, 9 on a page. Extent, 959 çlokas. Character, Nāgara. Date, (?). Appearance, fresh. Prose. Generally correct.

**Beginning.** श्रीगणेशाय नमः ।

वन्दे साम्बं सदानन्दमानन्दावरणापहम् ।

तत्त्वावलम्बनार्थाय महादेवं धृताकृतिम् ॥

श्रीमत्भगवत्कृपोत्थितवेदान्तसिद्धान्तविदाचार्य्यशिरोमणि-श्रीभगवदवतारभगवच्छङ्कराचार्य्यचरणानुग्रहविज्ञातपरापरात्मतत्त्वः श्रीपद्मपादाचार्य्यस्तत्त्वानुसन्धानलक्षणं मङ्गलं शिष्यशिक्षायै कर्त्तव्यमत्प्रकरणोपक्रमे निबध्नाति । ब्रह्मभिरिति ।

ब्रह्मभिः प्रतिपाद्यं यद् ब्रह्मभिर्ब्रह्मसंयुतैः ।

चिन्तितं कर्म्मनिर्मुक्त्यै तद् ब्रह्म हृदि भावये ॥ इत्यादि ।

**End.** आचार्य्यानुग्रहादेव सूक्ता विद्यानदीपिका ।
सिद्धपद्मपदाचार्य्यैर्व्याख्यामुच्यते कृतिः ॥ (?)
आचार्य्याणां शङ्करादीनां . . . . . . । इति सन्मार्गप्रवर्त्तका आचार्य्याः शब्दार्थानुसन्धानफलं स्वमुखेन स्वशिष्यद्वारा वा निबन्धनान्ते समारोपयन्तीति भावः ।

**Colophon.** इति श्रीशङ्कराचार्य्यप्रियशिष्यपतीश्वरपद्मपादाचार्य्यविरचितविद्यानदीपिकाविवृतिः समाप्ता ॥

---

(२)६५।) वीरमित्रोदयः (व्यवहारकाण्डः). By मित्रमिश्र. 21×5 inches. Folia, 363. Lines, 10 on a page. Extent, 10,890 çlokas. Character, Nāgara. Date, Saṃvat 1876. Appearance, fresh. Verse. Generally correct.

**Beginning.** श्रीगणेशाय नमः । श्रीमद्विश्वनाथगुरुचरणेभ्यो नमः ।

पुरतः प्रविलोक्य भर्गचापं
परतः कामयि कामकार्म्मुकज्याम् ।
पुलकाञ्चितपीतबाहुदण्डः
कुशलं नः कुरुतात् रघुप्रकाण्डः ॥
स्वस्ति श्रीयुतवीरसिंहनृपतेराज्ञावशाद्युत्सुकः
श्रीमित्राभिधपण्डितः प्रतिदिशं कीर्त्यानिशं मण्डित ।
नानानिर्णयवर्णनव्यसनिनां संख्यावतां प्रीतिदं
संप्राप्तव्यवहारसाधकमिमं कुर्व्वे प्रकाशं परम् ॥

.. ..

.. ..

परिभाषा परिष्कारः प्रमाणानां निरूपणम् ।
विवादपदनिर्द्देशः प्रकीर्णकविवेचनम् ॥
एवं प्रकरणान्यत्र चत्वारि प्रथमे पुनः ।
लक्षणं व्यवहारस्य निरुक्तिर्मुनिभाषिता ॥ ५ ।
व्यवहारस्य भेदाश्च स्वलक्षणविलक्षणाः ।
सामान्यतो विशेषाच्च परिभाषाप्रकाशनम् ।

सामान्यपरिभाषायां धर्म्माधिकरणे क्षणम् ॥ ६ ।
दर्शने व्यवहारस्य राज्ञो विधिविवेचनम् ।
प्राड्विवाकस्वरूपञ्च सभापतिसभासदाम् ॥ ७ ।
निरूपणञ्च सभ्यानां सयौक्तिकबलाबलम् ।
केषाञ्चित् सभ्यभिन्नानामपि स्थानं सभास्थले ॥ ८ ।
तत् प्रयोजनमादेयानादेयव्यवहारयोः ।
विवेचनमथो कार्य्यं सद्द्रष्टृकसभापतेः ।
प्रतिज्ञोत्तरहेतूनां पदानां सिद्धशालिनाम् ॥ ९ ।
निरूपणमसद्दृष्टावदृष्टौ च सभापतेः ।
सद्द्रष्टृकस्य दोषोक्तिः सम्यक् दृष्टौ फलाभिधा ॥ १० ।
विशेषपरिभाषायां प्रत्यभीयोगनिर्णयः ।
निह्नवादौ विधिस्तत्र निह्नवादिविवेचनम् ॥ ११ ।
विलम्बोत्तरदानञ्च क्वचिन्नैव विलम्बनम् ।
आद्ये प्रकरणे त्वर्था विविच्यन्ते क्रमादमी ॥ १२ ।
उपोद्घातप्रसङ्गाद्यैरन्येऽपि तदनुव्रताः ।
द्वैतीयीके तु साक्ष्यादिलक्षणं तत्र साक्षिणः ॥ १३ ।
असाक्षिणस्तत्र हेतुः साक्षिप्रश्नविधिस्ततः ।
तत् द्वैधे निर्णयः कौटे(?) साक्ष्ये क्वचिददोषता ॥ १४ ।
निर्णयो लिखितस्याथ तद्भेदास्तत्परीक्षणम् ।
साक्षिणां लिखितस्यापि शब्दत्वेन प्रमाणता ॥ १५ ।
युक्तिर्विशेषणान्यस्या अर्थापत्त्यनुमानता ।
लौकिकानां प्रमाणानामभावे दिव्यभावना ॥ १६ ।
दिव्यभेदास्तदावस्था देशकालाधिकारिणः ।
तन्मातृका तद्विशेषविधयो विविधाः क्रमाः ॥ १७ ।
तेषामपि च शब्दोत्थानुमानत्वेन मानता ।
एतेऽर्था विव्रियन्तेऽथो तार्त्तीयीके ततः क्रमात् ॥ १८ ।
व्यवहारपदान्यष्टादशो दिष्टानि लक्षणम् ।
तेषां सामान्यमथ तद्भिदानां विविधा विधाः ॥ १९ ।

एतेऽर्थाः सम्यगुच्यन्ते तुरीये तु प्रकीर्णके ।

यन्नोक्तमुपयुक्तं तद्विविच्य प्रतिपाद्यते ॥ २० ।

अथ कोऽयं व्यवहारः ॥ इत्यादि ॥

**End.** एवं धर्म्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।

यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथाक्षयः ॥

**Colophon.** इति श्रीप्रकीर्णकाख्यं चतुर्थं प्रकरणं समाप्तम् । इति श्रीमत्सकल-सामन्तचक्रचूडामणि . . . . महाराजाधिराजप्रतापरुद्रतनूज-श्रीमन्म-हाराजमधुकरसाहसूनु-श्रीमन्महाराजाधिराज ... श्रीवीरसिंहदेवोद्-योजितश्रीहंसपण्डितात्मज-श्रीपरशुराममिश्रसूनु . . . . श्रीमन्मित्र-मिश्रकृते वीरमित्रोदयाभिधनिबन्धे व्यवहारप्रकाशः पूर्त्तिम – – ॥ इति श्रीव्यवहारकाण्डं समाप्तम् ॥ शुभमस्तु । सम्वत् १८७६ ।

---

(१४१२ ।) व्यवहारप्रदीपः. By कृष्ण. 13×3 inches. Folia, 14. Lines, 5 on a page. Extent, 210 çlokas. Character, Newāri. Date, (?). Appearance, tolerable. Prose and verse. Generally correct.

**Beginning.** ॐ नमो देव्यै ।

नत्वा शम्भुं सगौरीकं सगणाधिपमीश्वरम् ।

यत्प्रसादेन + क्षिप्रं वाञ्छितं लभते नरः ॥

व्यवहारप्रदीपोऽयं कृतः कृष्णेन यत्नतः ।

कौतुकाय सतां ते तु साम्यन्तु मम धृष्टताम् ॥

ज्योतिषे मन्त्रसारे तु सिद्धान्ते वैद्यके तथा ।

अर्थमात्रन्तु गृह्णीयान्नापशब्दं विचारयेत् ॥

अथ प्रथमं गृहावस्थानम् ।

मासं राशौ वसेत् भानुश्चन्द्रः सार्द्धं दिनद्वयम् ।

मङ्गलः सार्द्धमासन्तु मासैकन्तु बुधस्तथा ॥ इत्यादि ।

**End.** अर्कः शौरिः कुजः शौरिः प्रथमस्ताः प्रसूयते ।

पितृमातृ तथा भ्रात आत्महा जायते शिशुः ॥ (?)

**Colophon.** इति व्यवहारप्रदीपपुस्तकं समाप्तम् ॥

विषयः । ग्रहावस्थानम् । ताराचन्द्रगुरुविशुद्धयः । योगानां शुभाशुभम् । ग्रहाणां शुभाशुभकथनम् । कर्णवेध – विद्यारम्भ – चूड़ाकरण – उपनयन – विवाहानां – तिथिनक्षत्रयोगकथनम् । गोधूलिकाव्यवस्था । यात्रा-निरूपणम् । ग्रहाणामन्तर्दशानिरूपणम् । पितृमातृस्वजनहननयोग-कथनम् ॥

---

(१४२० ।) शिशुपालवधटीका (निर्णयबृहस्पतिनाम्नी) By बृहस्पति. 14 x 4 inches. Folia, 133. Lines, 10 on a page. Extent, 4,156 çlokas. Character, Newārī. Date, Newār Era, 829. Appearance, fresh. Prose. Generally correct.

**Beginning.** ॐ गणेशाय नमः ।

निःशेषवाञ्छितफलार्पणकल्पवल्ली
मोहान्धकारहरणार्कमरीचिमाला ।
उद्दामचित्तमृगबन्धनवागुरोच्चै-
रुज्जृम्भतां भगवती मम विष्णुभक्तिः ॥
– – – ममलकुठारः कृन्तति संसारशाखिनो मूलम् ।
सा मम सकलमनिष्टं शमयतु सहसैव वैष्णवी माया ॥
यः कैटभारिचरणद्वयपद्मभृङ्गो – – – – – – – ।
– – – – – गोविन्द इत्यवनिनिर्जरकुञ्जरोऽभूत् ॥
सन्दर्भशुद्धिमधिगम्य गिरां गुरोर्यः
श्रीश्रीधरादिह्वतमिश्रपदः – – ।
गौड़ाधिपादुपचितप्रवरप्रतिष्ठो
धीमान् बृहस्पतिरितिप्रथिताभिधानः ॥
सोऽहं समस्तगुणदोषविचारचारु-
मेतं प्रबोधविषये सुधियां सुबोधम् ।
दुर्बोधपद्यशिशुपालवधप्रकाशं
निर्म्माणि निर्णयबृहस्पतिनामधेयम् ॥ इत्यादि ।

**End.** इति महिन्तापनीयश्रीकविचक्रवर्त्तिबृहस्पतिकृतनिर्णयबृहस्पतिनाम माघटीकायां षष्ठः सर्गः ॥

नेपालाब्दे ग्रहकरगजैरङ्किते पौषमासे
शुक्ले पक्षे प्रतिपदि तिथौ वृद्धियोगान्वितायाम् ।
पूर्व्वाषाढ़ायुतगुरुदिने प्रालिखद् ब्रह्मदेवो
भूमीदेवो गुरुसुखमिता माघकाव्यस्य टीका ॥

---

(१५०० ।) शुद्धदीपिका. By दुर्गदत्त. 10×4 inches. Folia, 10. Lines, 9 on a page. Extent, 180 çlokas. Character, Newārī. Date, (?). Appearance, fresh. Prose and verse. Incorrect.

**Beginning.** ॐ नमो ब्रह्मणे नमः ।

नवनीतमिव दध्नः समुद्धृत्य सारमागमात् ।
प्रपञ्चसारे सारोक्त्या गुरूपदेशलेशतः ॥
सन्ध्यावन्दनपूर्व्विका गायत्र्या शुद्धदीपिका । ?
श्रीमता दुर्गदत्तेन क्रियते श्रेयसे सताम् ॥

ततो ब्राह्मे मुहूर्त्ते चोत्थाय शुचिः समाहितः सुधीः प्रातःस्नानादि स्वयाह्निक ? प्रोक्तमार्गेणाह्निकं निर्व्वर्त्य चन्दनमृत्तिकादिनोर्द्ध्वपुण्ड्रं विदध्यात् ॥ इत्यादि ।

**End.** अर्घ्यदानेऽञ्जलित्रयप्रक्षेपोऽस्तु आचमनात् प्राक् कर्त्तव्यः । .. .. .. .. उत्तरे शिखरे + + + पूर्व्ववद् विसर्जयेत् ॥

**Colophon.** इति गायत्र्या शुद्धदीपिकायां सन्ध्यावन्दनादिविधिः समाप्तः ॥ शुभमस्तु सर्व्वजगताम् ॥

---

(२)२९९ ।) श्रीमतोत्तरतन्त्रम्. 16×6½ inches. Folia, 263, (leaves 5 to 13 are missing). Lines, 9 on a page. Extent, 6,426 çlokas. Character, Nāgara. Date, Saṃvat 1893. Appearance, fresh. Verse. Incorrect.

**Beginning.** श्रीगुरुगणपतये नमः ।

सर्व्वेषां तत्त्वतो व्यापी तत्वारूढ़स्तु मायया ।
माययोत्तरसंलीनो प्रकाशयति भास्करः ॥

श्रीमच्चन्द्रपुरे रम्ये नानारत्नविभूषिते ।
नानाद्रुमलताकीर्णे नानापक्षिगणान्विते ॥

.. .. .. .. .. ..

.. .. .. .. .. ..

दिव्यं मनोहरं रम्यं श्रीमच्चन्द्रपुरं शुभम् ।
समुद्रस्योपकण्ठे तु हेमप्राकारमण्डितम् ॥
योजनायुतविस्तीर्णं नानारत्नोपशोभितम् ।
नानाहर्म्याणि दिव्यानि नानारत्नमयानि च ॥

.. .. .. .. .. ..

तत्र मध्ये रम्या शतयोजनविस्तरा ।
शुद्धस्फटिकसङ्काशा सर्व्वरत्नोपशोभिता ॥
योगिणीगणसेवन्ते नानाकोलाहलै रवैः । ?
चक्रैश्च विविधाकारैर्नानाषिद्धि – – प्सुभिः ॥

.. .. .. .. .. ..

केचित् स्तुवन्ति देवेशं केचित् पठन्ति भाविताः ।
केचित् किलिकिलायन्ते गर्ज्जन्ति चोत्पतन्ति च ॥
क्रीड़न्ति कलकलारावैः परमानन्दनन्दिताः ।
तत्रस्थं भैरवं देवं परमानन्दनिर्भरम् ॥
क्रीड़ाविनोदैरतिलालसस्थं
संहृष्टचित्तात्मनि तत्वयुक्तम् ।
कामैर्विलासैरतिरागवन्तं
तं प्रेक्ष्य देवी प्रणिपत्य सादरात् ॥
प्रोत्फुल्लनयना देवी परानन्दाकुलेक्षणा ।
प्रणिपत्य पुरा देवी स्तोत्रमेतदुवाच ह ॥

श्रीदेव्युवाच ।

नित्यानन्दं परं शान्तं निष्कलङ्कं निरामयम् ।
व्योमातीतं परं शून्यं भैरवं तं नमाम्यहम् ॥

.. .. .. .. .. ..

.. .. .. .. .. ..

एवं देव्या स्तुतं शम्भुं परानन्दाकुलेक्षणम् ।
भैरवो हृष्टमनसा प्रोत्फुल्लकमलाननः ॥
प्रसन्नवदनो देवो वाक्यं चेदमुवाच ह ।
साधु साधु महाभागे तुष्टोऽहं भक्तिवत्सले ॥
पृच्छ पृच्छ यथाकामं यत्ते मनसि वर्त्तते ।
तत् सर्व्वं कथयिष्यामि स्तवेनानेन तोषितः ॥
इति श्रुत्वा शुभं वाक्यं भैरवस्य महात्मनः ।
प्रणिपत्य महादेवी सेदं वचनमब्रवीत् ॥

श्रीकुब्जिकोवाच ।

भ्रामिताहं त्वया नाथ अनेकैः शास्त्रकोटिभिः ।
तन्त्रैश्च विविधाकारैः पञ्चस्रोतात्मकैस्तथा ॥
नित्यातन्त्रादिभिश्चैव – – – – – – – ।
श्रीमतं च न मे ज्ञातं भ्रान्ति – –पदे पदे ॥

.. ..

अल्पप्रज्ञात्वहं नाथ ज्ञातुं वक्तुं न शक्यते ।
गोपितं तु त्वया देव श्रीमतेदं मतोत्तरम् ॥

.. ..

एतत् सर्व्वं समाख्याहि जानीमो निश्चयं यथा ।
कथयस्व प्रसादेन भक्ताहं तव वल्लभा ॥ इत्यादि ।

End. तन्त्रसारमिदं गुह्यं सरहस्यं सुसिद्धिदम् ।
भुक्तिदं मुक्तिदं देवि सर्व्वसंशयछेदकम् ॥

.. .. .. .. .. ..

सर्व्वकामानवाप्नोति सर्व्वसिद्धिफलं लभेत् ।
पूजनात् तन्त्रसारस्य लभते शाश्वतं पदम् ॥
त्रिकोणं मण्डलं कृत्वा तन्त्रसारं प्रपूजयेत् ।
पूजनात् सिद्धिमाप्नोति तुष्यन्ति च मरीचयः ॥

33

Colophon. इति श्रीमतोत्तरे श्रीकण्ठनाथावतारिते श्रीचन्द्रद्वीपविनिर्गते योगिनी-
गुह्ये विद्यापीठे श्रीमतसारगर्भनिर्णये श्रीचतुर्विंशतिसाहस्रसंहितायां
सारसमुच्चये श्रीमतोत्तरे पञ्चविंशतितमः पटलः समाप्तः ।
संवत् १८९३ ।

विषयः । ... श्रीमतोत्तरमहामन्थाने प्रथमः पटलः सम्पूर्णम् ।
इति मतोत्तरे श्रीकण्ठनाथावतारिते चन्द्रद्वीपनिर्गते विद्यापीठे योगि-
नीगुह्ये कुमारिकाखण्डे हिमवत्प्रभुवर्णनं नाम । २ ।
इति० तीत्रोपत्तित्रमन्त्रोद्धोत्पत्तिः । ३ ।
,, मातराणां ? प्रतिष्ठालक्षणनिर्णयो नाम । ४ ।
,, ५ ।
,, मालिन्याग(?)चक्रप्रस्तारनिर्णयो नाम । ६ ।
,, ७ ।
,, मुद्राधिकारनिर्णयो नाम । ८ ।
These are five leaves of some work which it was at first difficult to identify, but subsequently identified with those of समाधिराजः । There is a colophon on 123 B. We get one colophon as मनः सम्बरपरिवर्त्त । Another leaf found with these five can not be identified.

Leaf 123. मनःसम्बरपरिवर्त्त । तत्र कतमा परिशुद्धिः । यदिदं स्वप्नोपमं विभवं दृष्ट्वा तत्र विरागमुत्पादयति । इयं उच्यते कुमारः कर्म्मपरिशुद्धिः । तत्र कतम आरम्भणसमतिक्रमः यदिदं मायोपेततां स्कन्धधात्वायतनानां बुद्ध्वा तेषां व्यवसर्गः । अयमुच्यते कुमारः आरम्भणसमतिक्रमः । तत्र कतमा स्कन्धपरिज्ञा ; यदिदं मरीच्युपमतां स्कन्धानामवतरति । तत्र कतरा धातुसमता यदिदं निर्म्मितोपमानां धातूनां प्रतिनिसर्गः । तत्र कतर आयतनानामपकर्षः, यदिदं प्रतिभासोपमानामायतनानां प्रतिनिसर्गः । तत्र कतरत् तृष्णाप्रहाणं । यदिदं सर्व्वधर्म्माणां अनालम्बनता । तत्र कतरा

2

व्युत्पादसाक्षात्क्रिया यदिदं सर्व्वधर्म्माणामनुपलब्धिः। तत्र कतरः क्रियावतारः यदिदं वीर्य्यसमुत्थितस्य दुःखस्याविप्रणाशः। तत्र कतरो हेतुपरिदापना यदिदं प्रतिश्रुतकोपमानानां कल्पानामनभिनिवृत्तिः। तत्र कतरः फलविप्रणाशो यदिदं समुपोपनस्य कर्म्मफलस्य विप्रणाशः। तत्र कतरः धर्म्मदर्शनम् यदिदं सर्व्वधर्म्माणाम् अपश्यना। तत्र कतरा मार्गभावना, यदिदं सर्व्वधर्म्माणामनुपलब्धिभावना। तत्र कतरत् तथागतसमवधानम् यदिदं सर्व्वबुद्धानाम् अभिज्ञाप्रतिपत्तिः। तत्र कतरा तीक्ष्णप्रज्ञा यदिदं सर्व्वधर्म्मानामनुत्पादकशान्तिः। तत्र कतरत् सर्व्वधर्म्माणां प्रवेशज्ञानम् यदिदं इन्द्रियपरापरज्ञानाज्ञानम्॥

Leaf 121. तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतम् आमन्त्रयतेस्म। तस्मात् तर्हि कुमारः परिशुद्धमनःसमुदाचारः भविष्यामीत्येव त्वया कुमारः सदा शिक्षितव्यम्।

III. 359 F. अष्टसाहस्रिका प्रज्ञापारमिता। 21 × 2 inches. Folia 67, divided into three parts by two holes. Lines, 5 on a page. Extent in slokas, 1900. Character, old Newári. Date? Appearance, old. Prose correct. Incomplete.

The MS. has neither beginning nor end. Leaves are missing everywhere. The name has been gathered from several colophons.

III. 359 G. अष्टसाहस्रिका प्रज्ञापारमिता। $22\frac{1}{2} \times 2$ inches. Folia 47, divided into three parts by two holes. Lines, 6 on a page. Extent in slokas, 1800. Character, old Newári. Date? Appearance, old. Prose, Correct. Incomplete. There is another copy of the work, without number, of which the last leaf is dated N.S. 286 = 1166 A.D. in the reign of Ánanda-deva. The scribe's name is Jasaścandra who wrote at the request of Dharmaratna. A portion of the right end of the leaf has been corroded, and a clumsy effort has been made to repair it.

III, 359. H. दिव्यावदानमाला। 22 × 2 inches. Folia 69, divided into three parts by two holes. Lines, 6 on a page. Extent in slokas, 2900. Character, old Newári. Appearance, old. Prose and verse. Incorrect.

The leaves are marked in letter numerals. The last leaf is marked 332. The first leaf is 12. Then follow the following leaves—13, 14, 15, 16, 17, 18, 19, 20, 24, 25, 26, 161, 163, 164, 165, 166 167, 168, 169, 170, 171, 172, 173, 174, 175, 176, 177, 178, 179, 180, 181, 182, 183, 184, 185, 186, 187, 188, 220, 232, 233, 234, 235, 236, 237, 238, 239, 240, 241, 242, 243, 244, 245, 246, 247, 248, 249, 250, 251, 320, 322, 325, 326, 327, 328, 329, 331, 332.

In 170 A. occurs the colophon सुप्रयानावदानं षड्विंशतिमः॥

In 185 A. occurs the colophon कुणालावदानं सप्तविंशतिमः ॥

In 237 A. occurs रूपवत्यवदानं द्वात्रिंशत्तमम् स्रोग ॥ 220.

In 221 or 225 A. occurs the name of an Avadána, the ink of which however is too feint to read. The B of this leaf is blauk.

The arrangement of the Avadānus in this MS. does not agree with that given by Dr. Rājendralāla. But it agrees with that in a paper MS. in the collection.

III. 359 I. जातकमाला । 21 × 2 inches. Folia 65, divided into three parts by two holes. Lines, 7 on a page. Extent in ślokas, 2700. Character, old Newári. Appearance, old. Date ? Prose and verse. Correct.

Leaves 60 and 89 are missing.

The MS. commences with the leaf 32. The Jātakas agree with Bendall's list.

34 B. Jātaka X. is Yakṣa Jātaka and not Makṣa as in Bendall. After the colophon occurs the verse.

व्याघ्रौ शिविः कौशलेयः श्रेष्ठिनो शश एव च ।
अगस्त्यमांसदौ विश्वन्तरयत्तविदौ तथा ॥ ( प्र+वर्गः ) ।

35 B. शत्रुजातकं प्रथमम् ।
37 B. ब्राह्मणजातकं द्वितीयम् ।
40 B. उन्मादयन्तीजातकं तृतीयम् ।
46 A. सुपारगजातकं चतुर्थम् ।
45 A. मत्स्यजातकं पञ्चमम् ।
46 A. वर्त्तकापोतिजातकं षोडशम् ।
47 B. कुम्भजातकं सप्तदशम् ।
49 B. अभ्यपुत्रजातकमष्टादश ।
52 A. × जातकं एकोनविंशतितमम् ।
54 A. श्रेष्ठिजातकं विंशतितमम् ।
62 A. हंसजातकं द्वाविंशतितमम् ।
67 A. बोधिपरिव्राजजातकं त्रयोविंशतिमम् ।
69 B. महाकपिजातकं चतुर्विंशतिमम् ।
71 B. शरभजातकं पञ्चविंशतिमम् ।
74 B. रुरुजातकं षड्विंशतिमम् ।
77 A. वानरजातकं सप्तविंशतिमम् ।
81 A. क्षान्तिवादिजातकं अष्टविंशतिमम् ।

84 A. ब्रह्मजातकं एकोनत्रिंशत्तमम् ।

87 A. हस्तिजातकं त्रिंशत्तमम् ।

After the colophon of 54 A. occurs the following verse :—

अत्रद्विजोन्मादयन्तीसुपारगजलोद्भवाः ।
पत्तिकुम्भेभ्यतनयास्तापसश्रेष्ठिणौ तथा— ( द्वितीयवर्गः ) ।

After that of 87 A. उद्दानम्—occurs.

बोधिर्हंसोमहाबोधि र्वानरः शरभो रुरुः ।
कपिराट् क्षान्तिवादी च ब्रह्मा हस्ती च ते दश ॥

93 A. सुतसोमजातकं एकत्रिंशत्तमम् ।

96 A. अयोगृहजातकं द्वात्रिंशत्तमम् ।

97 A. महिषजातकम् त्रयत्रिंशत्तमम् ।

III. 359 J. दशभूमीश्वरः । 22×2 inches. Folia 41, divided into three parts by two holes. Lines, 6 on a page. Extent in slokas, 1400. Character, old Newári. Date? Appearance, old. Prose. Correct.

Leaf 21 B. प्रभाकरी नाम तृतीया बोधिसत्त्वभूमिः ।

25 A. आर्चिष्मती चतुर्थी बोधिसत्त्वभूमिः ।

29 A. सुदुर्ज्जया नाम पञ्चमी बोधिसत्त्वभूमिः ।

34 A. अभिमुखी नाम षष्ठी बोधिसत्त्वभूमिः ।

39 B. दुरङ्गमा नाम सप्तमी बोधिसत्त्वभूमिः ।

53 B. साधुमती नाम नवमी बोधिसत्त्वभूमिः ।

III. 360 A. चतुष्पीठालोक । 11×2 inches. Folia 45, with two holes. Lines, 7 on a page. Extent in slokas, 900. Character, old Newári. Date N.S. 132=1012 A.D. Appearance, old. Prose. Incorrect. Complete.

The leaves are marked with letter numerals. It begins on the 45th leaf and ends on Leaf 1. It seems to be a commentary on Catuṣpīṭha Tantra which perhaps exists in Cambridge. See Bendall Catalogue, page 197. The following extracts will explain the character of the book :—

नमः सर्व्वभाविनीभ्यः ॥

विश्वाख्यं बुद्धविम्बं दिवसकरधरोल्लासिबालेन्दुलेखं
मैत्रेयं चारुरूपम् शिरसि वरतनुं मञ्जुघोषञ्चे गात्रौ । (?)
पद्मोत्थं दण्डरूपं कुटिलितवपुषं वज्रिणं भीमनादं
विज्ञानज्ञानरूपं निहतभवभयं पञ्चमूर्त्तिं प्रणम्य ॥
पञ्जिका लिख्यते सेयं प्रार्थणात् सेनवर्म्मणः ।

एवं भाषितेत्यारभ्य यावदभ्यवन्दन्निति वचनात् विभक्तिलिङ्गवचनं समासादयः

गुरुलघुपतिच्छन्दादयश्चार्य्यविशेषवशात् यथायोगं योजनीया। एवं भाषितसर्व्वज्ञम् इत्यादिना निर्द्दिष्टाः चत्वारोऽर्थाः देशकदेशनाप्रकारः देश्यर्थः स्थानमिति। तत्र सर्व्वज्ञ इति देशकः। एवमिति देशनाप्रकारः। ज्ञानम् इति देश्यार्थः। शुद्धावासकमित्येतत् स्थानम् तत्र पदार्थः दूषि × × मिति बुद्धानामित्यर्थः। दक्षिणामिति क्वचित् तत्रापि स एव अर्थः। योगिनीजालसम्वरमिति। योगिन्यः प्रज्ञापारमिताद्याः जालं समूहः सत् प्रागेव उक्तं। समपद इत्यादि पदं पराङ्गुष्ठांगुल्यां संश्लेषात्समपदं तस्य चैकपाद-सङ्कोचेनातिर्य्यक्स्थापनं वा चित्तपदं। हस्तद्वयमे(व)वाद्यचरणाङ्गुलीयकं। तज्वज्जानुद्वयं कुर्य्यात्। वाहुस्ताभ्यां हंसपक्षाकृतिः। मण्डलपददक्षिणपाद(')भूमौ संस्थाप्य वामपद त्रैलोक्यलङ्घनाकारेण सलिलमुत्क्षेपः इति त्रिविक्रमपदं। दक्षिणचरणेन वामचरण-माक्रमेत्। वामजङ्घं संकोच्य पञ्चवितस्ति आयाम प्रासारयेत् आलीढ स्यात्। प्रत्यालीढो अत्र दक्षिणमाकुञ्च्य वामं तथैव प्रासारयेदिति।

एकचरणमुत्क्षिप्यते। नैव परिभ्रमेत्। इत्येकः स्थानः। ललिताक्षपादितया सुख-निषद्य विविधप्रकारेण पादस्य विक्षेप पादविक्षेपेण आत्मभेदं विसृष्यादौ चेत् सर्व्व सङ्कुच्य विपरीतोऽस्विन्यासप्रयोगाद्वापि तत्क्षयात् असमूर्व्वं उत्पन्नानाशयेत्युभयोरपि। योगिनीपादद्वयं। यावदर्द्धस्थापनं वा यूपस्कारः। आह च। एकत कुञ्चितन्यस्तस्तनि-कुञ्चितजानुकं। आसीनपुरुषोपेतम् युग्मपादं प्रतिष्ठितम् अन्योन्यजानुभ्यां वा मा(?)-पार्श्वपीडनं मुण्डताडनं। वज्रसत्त्वबाहुपाशे प्रज्ञापारमिताकण्ठदृढमालिङ्ग्य देव्याजङ्घं तु परिविन्यस्य तत् सम्पुटः संयमीकृतं उक्तञ्च योषित्कण्ठविकल्पप्राणात् मोक्षः इत्युक्त-मार्य्यदेवेन इति। द्वन्द्वालिङ्गनमिति प्रज्ञोपायसम्मिलनम् कुतः इत्याह सकलसत्त्वधातोः संसारोत्तरकार्य्येण इत्यर्थः। योगिनीजालसम्वरम् मुक्त्वा नास्त्यन्यः संसारे सार इति। मोक्षे यस्तु प्रयोक्तव्यः इति परिक्रमः कर्त्तव्यः। यच्च विशेषतः इति विशेषशब्दोप-यादानात् द्वादशसाहस्रिकोक्तकक्षपुटे पादस्य संहारः तत्रेदं कक्षपुटम्।

नृपसङ्ख्यशिखीधारी हस्तशोभासुकन्या।
जटनरकविभीतामोहनीन्द्राब्जवज्रा।
कुरु चतुर चतुष्क पञ्चदेहायमिश्रं।
तृगुवतीवसयोग्या त्वञ्च तुष्टिं सदंसै॥

इति कक्षपुटपर्य्यन्त लिखनीयाम्।

It belongs to the Vajrayāna School and to a Guhya class.

III. 360 B. Collection of works by अद्वयवज्र। 12 × 2 inches. Folia 38, pierced on one side, 4 inches from the left-hand side. Lines, 6 on a page. Extent in ślokas, 900. Character, old Newári. Appearance, old. Date? Prose. Incorrect.

Beginning. नमः बुद्धाय।
वन्दे कुदृष्टिनिर्घातनादिकर्म्मविधानतः।
अनेनैव विहारेण यत्नेन लभते पदम्॥

इह हि द्विधा सत्त्वा शैक्षा अशैक्षाश्च तत्राशय अधिमुक्तिप्रयोगः। भूमिप्रपन्नप्रयोजकञ्च अवसितास्तिपर्य्यन्तः हेत्ववस्थास्थिनां शैक्षानाम् सुविशुद्धादिकर्म्मविधानेन संभारद्वयसंभृतसम्यक्सम्बोधिसम्पल्लाभः। अशैक्षानामपि निरस्तप्रतिपक्षकृतार्थफलविकल्पानां शाक्यमुनेरिव प्रणिधानावेशसामर्थ्यात् युगनद्धानां भोगयोगतः। सत्त्वार्थक्रिया-लक्षणमविच्छिन्नमादिकर्म्म प्रवर्त्तत इति स्थितं। तथा च।

न तेऽस्ति नान्यनानार्थमविकल्पनवेक्षणा।
अनाभोगे न ते लोके बुद्धकृत्ये प्रवर्त्तते॥
परार्थसम्पद्बुद्धानाम् फलमुत्खातम × ×थ।
बुद्धयर्थादि यदन्यस्तु तादर्थ्यात् फलमिष्यति॥
चिन्तामणिरिवाकम्प्यसर्व्वसंकल्पवायुभिः।
तथापि सर्व्वसत्त्वानाम् अशेषाशाप्रपूरकः॥
फलतत्त्वविवक्षाणाम् विधायाह विवर्ज्जनात्।
सम्बोधि बुध्यते धन्यो तत्पश्चात् बोधिकर्म्मणि॥

ननु शैक्षानामादिकर्म्मविधानं युज्यते एव। कतम अशैक्षानामपि निःस्वभावभाविनां आदिकर्म्मारम्भः। अयमपि सुवर्णनिगड़बन्धन एव। सत्यम्। प्रज्ञापारमिताधिगमविरहात्। प्रज्ञापारमिता हि पञ्चपार-मितानां स्वभावः अतः एव – सर्व्वाकारवरोपेतशून्यतेति – निगद्यते। उक्तञ्च भगवता प्रज्ञापारमिताविरहिताः पञ्चपारमिताः पारमिता-नामधेयं न लभन्ते। आर्य्यविमलकीर्त्तिनिर्द्देशे चोक्तं; प्रज्ञारहितो उपायो बन्धः। उपायपराहतप्रज्ञा बन्धः। प्रज्ञासहितः उपायः मोक्षः उपायसहित प्रज्ञा मोक्षः। तादात्म्यञ्च तयोः। सद्गुरूपदेशतः प्रदीपालोकयोरिव सहजसिद्धमेव अधिगम्यते। अत एव आदिकर्म्म-मध्ये विशुद्धं कर्त्तव्यम् सर्व्वयोगिभिः।

शून्यताकरुणाभिन्नं आदिकर्म्म च यद्बोधौ ज्ञानमिष्यते।
पञ्चपारमितो प्रोक्तं आदिकर्म्मेति संज्ञया।
प्रज्ञापारमिताचासां स्वभावो नातिरिच्यते। तथाच।
दानं शीलं क्षमा वीर्य्यं ध्यानं प्रज्ञाञ्च सादरः।
सततं सेवयन् धीमान् सुखस्वर्गोऽपि जायते॥
सम्भोगनिर्म्मिते हेतुदानशीलक्षमाश्रयं।
ध्यानप्रज्ञाभिधर्म्मस्य वीर्य्यन्तत्तूभयोर्मतम्॥

तस्मात् बोधिसत्त्वेन सुविशुद्धादिकर्म्मविहारिणा भवितव्यम्। विपर्य्यये च नास्तिकवादप्रसङ्गः। तदुक्तम्—

शुभाशुभं यद्यपि निस्वभावकं
तथापि कुर्य्यात् शुभमेव नाशुभम् ।
जलेन्दुविम्बोऽयमलोकसम्वृतौ
सुखं प्रियं दुःखमजस्रमप्रियम् ॥

Leaf 9 A. (First Chapter—Colophon).

कुदृष्टिनिर्घातादि वाक्यानां टिप्पिनीकेयम् ।

12 B. मूलापत्तयः समाप्ता । स्थूलापत्तयः समाप्ता; कुदृष्टिनिर्घातनम् समाप्तम् ।

9 B. षट्पारमितापरिपूरी दृष्टिः ।

14 A.B. तत्वरत्नावली समाप्तेति । कृतिरियम पण्डितावधूत श्रीमद्व अद्वैत-वज्रपादानामिति ।

17 A. पञ्चाशत्तथागतमुद्राविवरणम् ।

19 B. एकनिर्देशसमाप्तः ।

21 B. धर्म्ममुद्रविपाकद्दमनिर्द्देशं द्वितीयः समाप्तः । महामुद्राविमला निर्द्देश-स्तृतीयः ।

22 A. समयमुद्रापुरुषकारहलनिर्देशः चतुर्थः समाप्तः ।

25 B. समाप्तश्चायं षेकतात्पर्य्यसंग्रहः ।

(?) स्वप्ननिरुक्ति समाप्तेति ।

(?) तत्वप्रकाशः समाप्तः ।

(?) सप्रतिष्ठानप्रकाशः समाप्तः ।

(?) महासुखप्रकाशः समाप्तः ।

34 B. तत्वविंशिका समाप्ता ।

35 A. महायानविंशिका समाप्ता ।

35 B. निर्वेदपञ्चकं समाप्तम् ।

36 A. मध्यषट्कः समाप्तः ।

36 B. इति तत्वदशकः समाप्तः ।

38 B. अमनसीकाराधार समाप्तः ।

III. 360 C. ज्ञानदीपक । $12\frac{1}{2} \times 2\frac{1}{2}$ inches. Folia 142, divided into three parts by two holes. Lines, 5 or 4 on a page. Extent in ślokas, 1700. Character, modern Newári. Appearance, fresh. Date? Prose and verse. Incorrect.

Vidyānandanātha, a Bhairava, wrote a long Tánkrik work, entitled Jñānadipavimarṣaṇi. The present work is a part of that work. It deals with the process of worshipping Tripurā Sundarī. The last colophon runs :

इति श्रीविद्यानन्दनाथदेवविरचितायां श्रीज्ञानदीपविमर्षिण्यां श्रीत्रिपुरसुन्दरी पद्धत्यां दीपाम्नायपद्धति पञ्चविंशतिः ।

षडाम्नायमहापद्मवनषण्डविहारिणा ।
श्रीविद्यानन्दनाथेन परहंसेन धीमता ॥

Beginning— ओं श्रीगुरुभ्यो नमः ॥

ओं सप्रकाशां विमर्षाख्यां बीजाङ्कुरलतां परां ।
शृङ्गाटपीठनिलयां वन्दे त्रिपुरसुन्दरीम् ॥
विमर्षच रसां सारा माद्याबीजस्य गर्भसाम् । (?)
कला सप्तदशी वन्द त्रिपुरा त्रिपुरातनी ॥
त्रिभिर्भेदैः त्रिनिलयां विन्दुस्फुटरसभवाम् ।
हकारार्द्धकलांवन्दे पूर्णां त्रिपुरसुन्दरीम् ॥
पूर्णादिप्रथमान्तं या त्रिपञ्चतिथिगामिनी ।
तां कलारूपिणीं नित्यां वन्दे कालापहारिणीम् ॥
दयर्वा पाशाटवी सार्वन्वाम समर्पयेत् । (?)
यदाज्ञातामहं वन्दे गुरुकारुण्यवारिधिम् ॥
निहत्य विघ्नसंघात इष्ट मा(सं) तनोति यः ।
तमद्वंर्गं शाम्भविमूनुं वन्देऽहं गणनायकम् ॥
द्वैताद्वैतामहामोहविघ्नसंघातमर्द्दनी ।
गणनाथमयीं वन्दे प्रतिभापारमेश्वरीम् ॥
अपराचित् क्रियारूपामानन्दभरनिर्भराम ।
वषटकाख्यामहं वन्दे जाम्बिकेयीं पराकलाम् ॥
वेदतर्कमयीं देवीं रथाङ्गलीलया सदा ।
ससंवित् विप्रुषो नौमि योगिनी कानमाचिका ॥
शिवाद्यवनीपर्य्यन्तं चेत्रपाल यत् पलम् ।
चेत्रपालमयीं वन्दे प्रतिभां शाम्बवीमहम् ॥
श्रीवामकेश्वराम्नाय उन्नीयागमसागरात् ।
प्रपन्नजनतादुःखध्वान्तविच्छेदभानुना ॥
क्रियते पद्धतिः सम्यक् विद्यानन्देन धीमता ।
सद्भिः संसेवनीयेयं ज्ञानदीपविमर्षणी ॥

ब्राह्मं मुहूर्त्तमुथाय शिरसि श्वेतसहस्रारव्योमाम्बुजोदरगतपूर्णेन्दुविम्बमध्ये शुद्ध-स्फटिकसङ्काशं श्वेतवस्त्रगन्धानुलेपनं वरदाभयपाणिनं द्विनेत्रं कारुण्यावलोकिनम् वामोरुगतया शक्त्या वामेनोत्पलधारिण्या दक्षिणेन पाणिनालिङ्गितम् परमानन्दानन्दितं मन्दस्मितयुक्तं ध्यात्वा अमुकानन्दनाथ-अमुकाशक्तियुक्त-श्रीपादुकां पूजयामि ।

Leaf 2 B. श्रीविद्यानन्दनाथविरचितायां श्रीत्रिपुरसुन्दरीपद्धत्यां ज्ञानदीपविमर्शिन्यां गुरुध्यानपद्धतिः प्रथमा ।

3 A. मन्त्रध्यानपद्धतिः द्वितीया ।

4 B. स्नानपद्धतिः तृतीया ।

7 A. सन्ध्यावन्दनपद्धतिः चतुर्थी ।

8 A. तर्पणपद्धतिः पञ्चमी ।

10 A. स्नानपद्धतिः षष्ठी ।

13 A. द्वारपालार्चनपद्धत्यां सप्तमी ।

15 A. चक्रोद्धारपद्धतिः अष्टमी ।

19 A. अर्कसाधनपद्धतिः नवमी ।

22 A. यागपद्धतिर्दशमी ।

39 A. मन्त्रोद्धारपद्धतिरेकादशी ।

53 B. न्यासपद्धतिः द्वादशी ।

54 A. श्रान्तरन्यासपद्धतिस्त्रयोदशी ।

55 B. पीठार्चनपद्धतिः चतुर्दशी ।

60 A. सामान्यार्घपात्रविधिः पञ्चदशी ।

67 A. ध्यानपद्धतिः षोड़शी ।

93 A. चक्रार्चनपूजाहोमजपपद्धतिः सप्तदशी ।

108 A. स्तोत्रपद्धतिरष्टादशी । [one hundred verses.]

113 B. परिवारोक्षणपद्धतिः विंशतितमी ।

118 B. दशनारोपणपद्धतिः एकविंशतितमी ।

120 A. काम्यसाधनपद्धतिः द्वाविंशतितमी ।

127 A. दीक्षापद्धतिः त्रयोविंशतिः ।

130 A. पारम्पर्य्याचर्य्यपद्धतिः चतुर्विंशतितमी ।

In leaf 83 A. षड्दर्शनमन्त्रा यथा

श्रों तार त्रितार त्रिरे स्वाहा बौद्धदर्शनसमया देवी श्रीपादुकां पूजयामि इति तारामन्त्र श्रों वैदिकदर्शनसमयश्रीपादुकां पूजायामि इति ब्रह्ममन्त्रः । ह्रौं शिवाय ह्रौं नमः शिवदर्शनपादुकां पूजयामि इति शिवमन्त्रः ह्रां ह्रीं सः सौरदर्शनपादुकां पूजयामि इति सौरमन्त्रः । श्रों नमो नारायणाय नारायणदर्शनश्रीपादकां पूजयामि ऐं शाक्तदर्शनश्रीपादुकां पूजयामि इति शाक्तमन्त्रः ।

III. 360 D. पञ्चरक्षा $11\frac{1}{2} \times 2$ inches. Folia 136, divided into 3 parts by two holes. Lines 6 on a page. Extent in ślokas 2,500. Newári. Appearance, very old. Date N.S. 494 = 1374 A.D. Prose. Incorrect.

3

This is a well-known work, described several times. The present MS. contains the usual Budhist Formula of faith at the end followed by the following :—

देयधर्म्मोऽयं प्रवरमहायानयायिनः परमोपासकः श्रीललितापुरे महानगरवरे श्रीकारण्डविहारलिविग्रहाधिवासितः परमसौगतदानपतिनायभारोकस्य यदत्र पुण्यं तद्भवतु आचार्य्योपाध्यायमातापितृपुरङ्गमं कृत्वा सकलसत्त्वराशेरनुत्तरफलप्राप्तमिति। श्रेयोऽस्तु सं ४९४ चैत्रशुक्लचतुर्द्दश्यां तिथौ उत्तरफाल्गुनीपरहस्तनक्षत्रे ध्रुवयोगे सोमवासरे। राजाधिराजपरमेश्वरपरमभट्टारकश्रीजयार्ज्जुनदेवविजयराज्ये वज्राचार्य्य श्रीतुमश्रीनामनेन स्वहस्तेन लिखितमिदं यद्धर्म्मम्। यथा कथञ्चित् लिखितम् मयैतत् वालेन शास्त्रंधिषणः क्षमध्वम्। दत्ताञ्जलिमेतत् अशुद्धमेतत्। संशोधनीयं गुणिभिः समस्तैः।

There is a palmleaf MS. of the same work dated N.S. 684 (1564 A.D.) copied at Kátmundu.

III. 360 E. षट्क्रम। 12×2 inches. Folia 37, pierced through by one hole. Lines 4 and 5 on a page. Extent in ślokas 500. Character, Newári. Appearance, old. Date ? Verse. Incorrect. Incomplete.

The MS. begins with the 10th leaf. It treats of the Saṭkrama, *i.e.*, the six cruel incantations of the Tāntrikas—Killing, Stupefying, etc.

In leaf 10. इति उड्डीशमते गदागदयोगः द्वितीयपटलः।

11 B. ज्वरपटलः समाप्तः।

12 A. प्रत्यानयनघ्नपटलः समाप्तः।

12 B. उच्चाटनपटलः समाप्तः।

14 A. विद्वेषनपटलः समाप्तः।

14 B. उच्छादनपटलः समाप्तः।

16 A. जलस्तम्भनपटलः समाप्तः।

17 A. अग्निस्तम्भनपटलः समाप्तः।

18 B. अगदनपटलः पमाप्तः।

19 B. अञ्जनप्रयोगपटलः समाप्तः।

20 A. साधनपटलः समाप्तः।

21 A. पादप्रचारपटलः समाप्तः।

22 A. उन्मादयनीकरणपटलः समाप्तः।

23 B. केशरञ्जनयोगा समाप्तः।

25 B. गर्भनाशनयोगा समाप्तः।

26 B. ,, ,,

30 B. रसायनाधिकृत समाप्तः ।

31 A. राज्यकरणयोगा समाप्तः ।

32 A. इति स्त्रीयोगमाला उड्डीश नाम शास्त्र समाप्तः ।

43 B. विष्णुक्रान्ता च सर्पाक्षि भावयेच्च पुनः पुनः
तेन कृत्वा तु तिलकं सुरासुरं वशं नयेत् ।
ॐ त्रैलोक्यमोहिनी सर्व्वभूतवशीकरणी ह्रीं स्वाहा । अनेन अष्टोत्तर-
शतं पठित्वा स्तवयेत् ततो तिलकं कारयेत् सुरासुरमपि वशीकरोति ।

45 B. उड्डीशवशीकरणपटलः समाप्तः ।

III. 360 F. चण्डी । 121 × ½ inches. Folia 31, pierced through by one hole. Lines 6 on a page. Extent in slokas 700. Character, old Newari. Date N.S. 282 = 1162 A.D. Verse. Correct. Complete.

संवत् २८२ फाल्गुन शुक्लचतुर्थ्यां सोमवारे श्रीमन्महाराजाधिराजपरमेश्वर परम-
भट्टारकश्रीआनन्ददेवविजयराज्ये ।

III. 360 G. पद्मनाभसंग्रहः । 12 × 2 inches. Folia 29, pierced through by one hole towards the left-hand side. Lines 5 on a page. Extent in slokas 600. Character, Bengali. Prose. Correct. Incomplete. Date N.S. 366.

The MS. is defective, as it has not the following leaves—3-9, 13-17, and 20—21.

It begins
नमस्कृत्य महादेवं गुरुं संसारतारणम् ।
तिथ्यादीनां विवेकार्थं मुनिवाक्यम् समुच्चितम् ॥
पक्षवृद्धौ तिथिद्वैधे ह्रासवृद्धिषु संशयः ।
सुधियामप्यनुष्ठानमतो मया विविच्यते ॥
त्रिंशद्दिनः सावनो मासः ।
उक्तञ्च ब्रह्मसिद्धान्ते ॥
चान्द्रशुक्लादिदर्शान्तः सावनः त्रिंशता दिनैः ।
एकराशौ रवि यावत्कालं मासस्य भास्करः ॥

The End.
[illegible] यथाविधम् ।
प्रेताशौचं तथाख्यातं मुनीनां दर्शनादिकं ॥
[illegible] ।
इति श्रीनारायणस्यां योगीश्वरसंग्रहपद्मनाभसंग्रहो समाप्तो । श्रीरस्तु
नयपालदेशीयाभिलिख्यमान सम्वत् ३६६ वैशाख शुक्ल ३ रवौ रम्य
दिनोत्तम ॥ पुस्तिका स्वस्तिकारिका ॥ राजश्रीअभयमल्लस्य राज्ये ॥
भार श्रीअमृतस्य ।

III. 360 H. सर्व्वबज्रोदका । 11 × 2 inches. Folia 27, pierced through by one hole towards the left. Lines 6 on a page. Extent in ślokas 500. Date N.S. 179 = 1059 A.D. Prose. Character, old Newári. Appearance, old. Incomplete, out of 66 leaves only 27 remain.

The End. महातन्त्रराजादुद्धृता वज्रधातुमहामण्डलोपयिका सर्व्ववज्रोदका नाम समाप्तः । कृतेयं महावज्राचार्य्यानन्दगर्भपादैरिति ॥ विलिख्य पुण्यं यत् प्राप्तं मया साधनसंस्कृते अशेषस्तेन लोकोऽयं भूयात् श्रीवज्रसम्भवः अशेषसकलसर्व्वसत्त्वपरमनिर्व्वाणप्रतिष्ठितार्थेन रत्नाकर्मेन लिखितमिति ।

(N.B.—रत्नाकर्मे । is written in a different hand and in a different ink. Some one apparently attempted to re-ink these faded letters but without much success.)

संवत् १७९ फाल्गुन शुक्ल प्रतिप × × लिखितमिति ॥

After this is written in a different hand in a different ink the Śatākṣarī mantra of Vajrasatva.

The first leaf is wanting. From a leaf without pagemark which I suspect to be the 2nd leaf, I take the following extract as explaining the object of the book.

नापि रागविरागरहितमनुपचितधातो र्विरागसम्भवात् । उपचितधातोः पुनः रागसम्भवात् नापि निराकार × × × स्यैव पुनः सुरताभिलाषात् चक्षुरादि-निमीलनेन प्रयत्नतो विकल्पपरिहारेण च भेदप्रतिभासोपगमे मुद्रोपयोगः निस्फलः स्यादिति । अन्येन च तत् सिद्धेः । न विना प्रज्ञारविन्दसंयोगं परमनिर्वृतिरूपा कृतकृत्या सम्पद्यते इति । चेत (?) धर्म्मभोजनाभ्यां स्नानादिभिरपि तादृक्कृतकृत्या × × नोत्पत्तेरलमिति विस्तरेणेति । आह च तत्साध्यं योगिनीतन्त्रे सहजाख्यं महासुखं । परमान्ते भवेल्लभ्यम् विरमादौ च यत्नतः ॥ ननु श्रीसमाजादौ योगतन्त्रे हेवज्रादौ कियन्तः अभिषेका अभिप्रेता । तत्र केचिदाहुः श्रीसमाजे त्रयोऽभिषेकाः पठ्यन्ते ॥

Colophon. अग्निदाहप्रशमनमभिधीयते ।

III. 360 I }
361 G and 402 A. } वज्रावलीतन्त्र । 13 × 2 inches. Folia 91, pierced through by one hole towards the left. Lines 6 on a page. Extent in ślokas 3,000. Date N.S. 202. Character, Newári or Bengali. Prose and Verse. Appearance, old. Incorrect.

No. 402 A is a complete MS. while No. 360 I is a dilapidated copy with many leaves missing. It is in Newári character later than No. 402, though it looks older. Prof. Bendall has described this work in Cambridge Catalogue, page 197.

No. 361 G. $8\frac{1}{2} \times 2$. Folia 149, pierced by one hole towards the left. Extent in ślokas, 2,500. Date? Appearance. Character, Newári. Prose. Incorrect.

श्रीवज्रसत्वाय ।

वन्दे श्रीकुलिशेश्वरं स्मरतारमारोभवारेः पदं
क्रोधाघारतदिग् मङ्गलगिरो गायन्तु वज्राङ्गनाः ।
श्रीमद्वज्रभृतो महिम्नि जगदाधातु महामण्डले
निष्पत्यूहमहाभयस्य सहसा वज्रावली मीलतु ।
अन्तर्बहिर्वज्रभृतेव वज्रपरम्पराभिर्ह्रियतां हृदीयं
यज्योतिरन्तस्तिमिरं निरस्य श्रीवज्रभृन्मूर्त्तिमती विभर्त्ति ।
मण्डलादिविधिःशास्त्रविस्तृतः कमनीहृये ।
संक्षिप्य तामिहव्यक्तं ब्रूमः शक्यक्रियं क्रमात् ।

किञ्च आचार्य्यैर्ग्रन्थितप्रक्रियाया पूर्णत्वं न मस्तुतत्वं स्फुटोक्तिः ।
क्वापिक्वाप्यम्नातता युक्तता चेत्यस्माभिस्तद्गुणैर्मे खिद्यसेयम् ॥

इह हि दृष्ट्वा जनान् विद्यादिदामपरम्परावद्धबुद्धीन् दुर्व्वारकर्म्मोर्म्मिरयप्रेरणया प्रायशो अपायत्रयेषु अगतिद्वये च सुगम्भीरे संसारे सरिदावर्त्ते अतिदुस्तरे प्रतिशुद्ध-निमज्जनोन्मज्जनैरविभासमस्थतम्भां स्तनुभृतः परमकृपाप्रणयात् समुद्धर्त्तुमुद्धुरैः प्रथमं अर्घ्याद्युपकरणसन्निधापनादिक्रमतो मनोहरविहारादिक्रियाप्रतिष्ठापनादिषु अभिषेक भूतचित्तादौ च यथायोगं अनुष्ठानात् पुण्यसम्भारे ज्ञानसम्भारे च सम्यकृतत्शाक्याचार्य्यैर्द्दक्षैः अत्यमन्त्रनीतिनिपुणधीरैर्यामातृसर्य्यातृसाहस्रालिभिः कृपालुभिर्यथाक्रमं विहाराद्यर्घ्यादिदानलक्षणं पूर्व्वसेवाप्रयोजनं शिष्यसमूहो सुखननमूशोधन-भूपरिग्रहो विघ्नकीलनं वसुन्धराधिवासनं कलसाधिवासनं देवताधिवासनं मण्डल-सूत्रण रजःपातन कलसन्यासो मण्डलसाधनं देवताधिवासनं प्रतिमादिप्रतिष्ठा पुष्करिण्यादिप्रतिष्ठा आरामारामादिप्रतिष्ठा शिष्याधिवासनं आचार्य्यप्रवेशः शिष्य-प्रवेशो मालोदकमुकुटवज्रघण्टानां अभिषेका त्रिसमयदानं आचार्य्याभिषेकोमन्त्रसमर्पण-मङ्गलं दर्पणसेकशरत्तेपोगुह्यप्रज्ञाज्ञान चतुर्थसेकाः । विद्याव्रतं वज्रव्रतं चर्य्याव्रतं व्याकरण मनुज्ञा आश्वासः स्वसेको होममण्डलोपसंहारो मानसमण्डनं वलिविघ्न निवारणं वज्रघण्टालक्षणधारणञ्चेतिपञ्चाशद्विधयो विधेयाः तत्र शुभे अह्नि पूर्व्वाह्णे वलिदानपुरःसरं विहारादिभूमिः परीक्षणीया तत्र पूर्व्वस्यां अश्वत्थेन आग्नेय्यां मङ्गलं दक्षिणस्यां प्लक्षं नैरृत्यां पलाशं पश्चिमायां न्यग्रोधं वायव्यां शाल्मलिः उदीच्यां वकुलं ऐशान्यां उदुम्बरं असिकूर्म्मपृष्ठाञ्च शुभं नृत्योद्दर्त्तननाशस्य वास्तोरिति उत्तरोन्नतां कुलक्षयभयात् पूर्व्वोन्नतां साधकनाशभयान्निम्नमध्याञ्च परित्यज्य या राज्यस्य विद्याधरत्वा-देर्व्वाहेतुरिति ईषदुन्नतमध्याषितामदर्शितभोता चतुरस्रं समिकू प्रवा बहो विसर्त्ति

मात्रं तदगतं खात्वा तया मृदा प्रपूर्य्य सत्वरं गर्त्तं प्रभूता यदि मृत्तिका शुभा भूमिस्तदाज्ञेया पुनस्तद्गर्त्तगां मृदं कृष्ट्वा वितस्तिमात्रेऽस्मिन् गर्त्ते वारिप्रपूरिते शीतलौ सौवमतृस्याभ्यां युक्तं इत्यपि कश्चन गत्वा पदशतं आगता च निरीक्षिता ।

पूर्णाम्भोभिः शुभा भूमिः न्यूना ज्ञेया क्षितेप्सुभिः ।
सशब्दमपि यद्यम्बु नागेभ्योभयमादिशेत् ।

III. 361 A. आख्यातविचार । $8\frac{1}{2} \times 2$ inches. Folia 14, pierced towards the left. Lines 5 and 6 on a page. Extent in ślokas 150. Date N.S. 540=1420 A.D. Appearance, old. Prose. Correct. Character, Newári.

Beginning. ओं नमो वागीश्वराय ॥

मञ्जुघोषं प्रणम्यादौ बालानां बुद्धिवृद्धये ।
शब्दज्ञानमभिज्ञाननिगमः ( ? ) चेतुकथ्यते ॥
अत्र लड़ादीनाम् लस्थाने तिवादयः अष्टादश भवन्ति ।
के पुनस्ते लड़ादयः । लट् लिट्लुटलृटलोट् इति पञ्चतेति ॥
लङ् लिङ लुङ् लृङ एते चत्वारः अभितः ।
तत्रैषां नवलकारस्थाने तिवादय आदेशा भवन्ति ॥

The last Colophon. इति तिङ् समाप्तः सम्वत् ५४० जैष्ठ १३ शुक्लपक्षे ।

III. 361 B. वामकेश्वरतन्त्र (?) $8\frac{1}{2} \times \frac{1}{2}$ inches. Folia 40, pierced towards the left. Lines 5 on a page. Extent in ślokas 400. Date ? Character, Newári. Appearance, old. Verse. Correct.

Beginning. ओं नम स्त्रिपुरसुन्दर्य्यै ।

गणेशग्रहनक्षत्रयोगिनी राशिरूपिणीं ।
देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम् ॥
प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।
कालहालाहलोल्लोलकलनाशमकारिणीम् ॥
यदक्षरैकमात्रेऽपि संसिद्धः स्पर्द्धते नरः ।
रवितार्क्ष्येन्दुकन्दर्पशङ्करानलविष्णुभिः ॥
यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्व्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ॥

The End. पूर्व्वपश्चिमयोर्द्वारौ प्राणायामात्मकौ स्थितौ ।
कलामाकृततनुभूतानि नव चक्राण्यनुक्रमात् ॥ (śloka 322.)

It treats of the worship of Tripura Sundari.

III. 361 C. दशतत्त्वसंग्रह by क्षितिगर्भ। 9×2 inches. Folia 42, pierced by one hole towards the left. Lines 5 on a page. Extent in ślokas 400. Date ? Character, Newári. Appearance, old. Verse. Incorrect.

It begins ओं नमो वज्रसत्त्वाय ।
वज्रसत्त्वं गुरुं नत्वा तद्धर्म्मसूनुसंहतिम् ।
दशतत्त्वानि कथ्यन्ते ज्ञानपादक्रमेण तु ॥
रक्षाचक्रञ्च चक्रञ्च जापयेकोद्दृठोवलिः ।
प्रत्यङ्गिरः पुटोद्घाततत्त्वानि क्रमशोदश ॥
हृन्नरस्तनिजवीजञ्च प्रभावूहै ज्वलत्कृतिम् (?) ।
कृत्वाभैरवबुद्धादीनाकृष्य पुरतो भिषक् ॥
वन्दनाञ्च तथा पूजा देशनामामनुमोदनां ।
बुद्धादीन् शरणं गत्वा मार्गमाश्रयते ततः ।
बोधचित्तमथोत्पाद्य त्रिविमोक्षं सुखं स्मरेत् ॥

The End. इति सम्पुठोद्घातविधिः ।
दशतत्त्वानि संहृत्य यन्मया सादितं शुभम् ।
दशतत्त्वपरिज्ञाता सम्यक् तेनास्त्वसौ जनः ।
कृतिरियं दशतत्वसंग्रहः पण्डितक्षितिगर्भस्येति ।

III. 361 D. रुद्रयामले षष्ठीविद्याप्रशंसा। 9×2 inches. Folia 14, pierced by a hole towards the left. Lines 5 on a page. Extent in ślokas 125. Date N.S. 479=1359 A.D. Character, Newári. Appearance, old. Incorrect. Verse.

Beginning. ओं नमस्त्रिपुरायै ।
विद्युत्पुञ्जनिभां नमामि सततं प्राग्भारसूक्ष्माङ्गिराम् ।
मूर्त्तां भग्नमृणालतन्तुनिभया निर्भिद्य लिङ्गत्रयम् ॥
प्राप्योर्द्धञ्च विसर्गभागमुकुलं पीयूषधारारसम् ।
पीत्वा विद्रुतविद्रुमद्रवमयीं शक्तिं परां कौलिकीम् ॥
सुरासुरभुजङ्गाद्यैः मुनीन्द्रैः सिद्धकिन्नरैः
पादाक्रमार्च्चितं यस्या तां नित्यां सर्व्वदा नमः ।

Colophon. इति षष्ठः पटलः ।
इति रुद्रयामले सपादलक्षग्रन्थविद्यापीठावतारे उत्तरभागिनीत्युक्तं न (व) प्रकरणे षष्ठीविद्या प्रशंसायाम् उत्तरषट्कं समाप्तमिति । लिखित-

मिदं तपोधनश्रीविश्वेश्वरेण युवराज श्रीजयार्ज्जुनस्यार्थेन लिखितम् ॥
अल्पग्रन्था कारणविस्तरा ॥ सं ४७९ श्रावण कृष्णादशमी शिवं भवतु ॥

This contains only 125 verses out of a lakh and 25,000. It was copied by Viśveśvara for the use of Yuvarāja Jayārjuna Deva. The scribe says that a long work has been shortened.

III. 361 F. पावमानि । 8×2 inches. Folia 4, pierced by a hole towards the left. Lines 5 on a page. Extent in ślokas 60. Date? Appearance, Fresh. Character, Newári. Prose. Incorrect.

Beginning. ओं नमो ब्रह्मणे नमः ।
अथ प्रक्षाल्य पाणिपादौ ॥ बद्धशिखरसि । वज्रोपवीतसौ । आचम्य ।
तीर्थ आवाहन ॥

In the same MS. There are 14 leaves dealing with the process of S'ráddha, dated N.S. 468=1348 A.D. The scribe's name is given as Harṣapāla.

There is another ritualistic work in 26 leaves, which is dated N.S. 567.

III. 362 A. दुर्गतिपरिशोधनम् । 12×2 inches. Folia 13, pierced by a hole towards the left of the centre. Lines 6 on a page. Extent in ślokas 300. Date? Character, Newári. Appearance, old. Prose and Verse. Incorrect.

It begins ओं नमः सर्व्वबुद्धबोधिसत्तेभ्यः ।
विधूतसर्व्वसंकल्पं भावाभावविवर्ज्जितं ।
शाक्यसिंहं नमष्कृत्य शुद्धं प्रकृतिनिर्म्मलम् ॥
तं शोधनं प्रवक्ष्यामि सर्व्वदुर्गतिशोधनम् ।
गर्भपादानुसारेण समाधित्रयमुत्तमम् ॥
प्रथमं तावत् योगी विजनमनोनुकूलप्रदेशे मृदुसुकुमारासननिषण्ण सुगन्धनमण्डलं कृत्वा पञ्चोपचारपूजा करणीया । ततः सर्व्वधर्म्म नैरात्मं भावयित्वा आत्मात्मानं ओङ्कारेण वज्रज्वालामसार्क भावयेत् । तस्य कण्ठे ह्रींकारेण पद्मं तस्योपरिदलाग्रे अकारेण चन्द्रमण्डलम् । तस्योपरि हुंकारेण पञ्चसूचिकं वज्रं । तं वज्रजिह्वया लीनं भवति । वज्रजिह्वेति तेन वज्रजिह्वा भवति । मन्त्रजापक्षमो भवेत् । हस्त-हृदयस्य मध्ये सित अकारेण चन्द्रमण्डलम् तस्योपरि हुंकारेण पञ्चसूचिकं वज्रम् । तं वज्रं करमध्ये लीनं भवति । वज्रहस्ता भवति । सर्व्वमुद्रा-बद्धत्तम भवति । ततो रक्षा वज्रः भ्रमणा कर्त्तव्या । ओं गृह्ण वज्रसमय

हुं वम् इति ब्रुवन् क्रोधतेरेन्तिरी वध्नियात्। क्रोधतेरेन्तरीं वद्धा
वज्रमालाभिषेकं गृह्णीयात्

Vajra Terentarī means

वज्रवस्त्रं तले कृत्वा क्षादयेत् क्रुद्धमानसः।
शाकमङ्गुष्ठवज्रेण क्रोधतेरन्तरी स्मृतः॥

This appears to be a very different work from the work of the same name noticed by Dr. Rājendra Lāla Mitra. The present work appears to belong to the Vajrayána school.

In leaf 13 A. चतुर्बुद्धप्रसन्नात्मा दद्यात् संबुद्धपूजया
त्रिदिने च त्रिरात्रौ च वज्रसत्वप्रसिद्धये।
एवं भावयमानो वै सर्व्वदुर्गतिशोधनम् मण्डलराजश्रीनामसमाधिः।
शाक्यसिंहं पुरष्कृत्य माण्डलेयं तथागतम्
देवता बोधिसत्ताश्च द्वारपालचतुष्टयः।
सर्व्वदुर्गति उद्धृत्य सर्व्वावरण शोधयेत्
सर्व्व एकप्रयोगत्वात् प्रत्येकं तेन चोतः। कर्म्मराज श्रीनामसमाधिः।

The work is not complete.

Vajracārya Kuvera informs me that there are three works of the name of Durgati-pariśodhana in Nepal. The present is a fragment of the largest work, which extends to 2,500 ślokas. There are copies of the book in Nepal, but the owners are charry in showing their books. The work in prose is 1,200 ślokas in extent and appears to be that noticed by Dr. R. Mitra. The smallest work is a Dhāraṇī, 200 ślokas in extent. It treats of the funeral rites of the Buddhist Bhikṣus.

III. 362 B. महीरावणवधनाटकम्। 13 × 2 inches. Folia 27, pierced by a hole towards the left of the centre. Lines 5 on a page. Extent in ślokas, 450. Date N.S. 457 = 1337 A.D. Character, old Newári. Appearance, old. Prose and verse. Sanskrit and Prakrit. Incorrect.

It ends पात्रश्रीजयश्रीहमल्लवर्म्मणः कुतूहलपूरणाय॥ कविकमलभास्कर पण्डित श्रीजयतविरचितौ महीरावणवधनामनाटकः परिसमाप्तः। सप्तपञ्चशतोऽधिकचतुरशत। श्रेयोऽस्तु सम्बत् ४५७ श्रावणकृष्ण-द्वादश्यां पुष्यनक्षत्रे। परिघयोगे॥ शनैश्चरवासरे॥ पुस्तकमिदं समाप्तम् इति॥ परमभट्टारकपरमेश्वरपरमवैष्णवपरमदैवताधिदेवपरममहेश्वररघु-कुलतिलकभूपालपरम्परापरिनमितमौलिशिखाप्रसूनसंधूपितपदारविन्द-श्रीपशुपतिदेवतावरलब्धप्रसादैकमहाराजाधिराजसप्रक्रियराजराजेन्द्रश्री-श्रीजयारिमल्लदेवानां विजयराज्ये नेपालमण्डले॥

न चाहं शास्त्रकर्त्ताच न च शब्दार्थचिन्तकः ।
यादृशं स्थितमादर्शे तादृशं लिखितं मया ॥
उत्तरविहारकुटुम्बोद्भवश्रीहालविहारप्रधानाङ्गमहापात्रश्रीजयश्रीह-
मल्लवर्म्मनैः सत्त्वार्थहेतुना स्वहस्तेन लिखितम् ।
वालमूर्खविदेशस्थवारितैलाग्नितस्करात् ।
रक्षितव्य यथाशक्ति पुस्तिका स्वस्तिकारिणी ॥
भुग्नपृष्ठकटीग्रीवं स्तब्धदृष्टि रधोमुखं ।
दुःखेन लिखितं शास्त्रं पुत्रवत् प्रतिपालयेत् ॥
भ्राम्यद्गङ्गागभीरप्रबलरयमिलल्लोलकल्लोलमाला-
श्रेणीगङ्गावदातो विजयति विलसत्कोटिपृष्ठाद्रिकूटः ।
नृत्यारम्भे प्रमोदालसदमलजटाजूटकोटीवसानो
काली शृङ्गारचेष्टाचयचकितवपुः पातु वः चन्द्रमौलिः ॥
शुभमस्तु सर्व्वजगताम् ।

This dráma was composed by Jayata, a poet, at the request of Jaya Siṅha, a minister of Jayārimalla Deva of Nepal. It was copied by Jayasiṇha himself in the Nepal year 457 = 1337 A.D.

It begins ओं नमो नाट्येश्वराय ।
स्वेच्छाचित्रमजृम्भमानमहिमागम्भीरभीमप्रभो-
र्लक्ष्मी मुग्धमुखेन्दुपानपटिमाभ्राजच्चकोरापरः ।
विश्वव्यापिविशुद्धकीर्त्तिकुमुदीमालामलाडम्बरः
सानन्दं भगवान् त्रिलोकशरणम् नारायणः पातु वः ॥
अपि च ॥
स्फुर्ज्जत्भोगिकुलाग्रमिश्रजलधेः पातालमूलालयात्
गर्ज्जत्घोरकठोरघोणकुलिशप्रोत्तुङ्गदंष्ट्राङ्कुरैः ।
मज्जत्भूमितलं धृतं करुणया कालेन लीलायितम्
स्थित्यर्थं भुवनत्रयस्य शिरसा वन्दे मधूनो रिपुम् ॥
नाद्यान्ते सूत्रधारः ।
श्रीसुगुडेशमहं नमे शतमुखं वैश्वानरं पावनं ।
पार्येशञ्च नमामि नम्रशिरसा प्रेताधिनाथं नमे ॥
नैर्ऋत्येशमतो वरञ्च पवनं × × × ।
अहं भवस्य शुभदं सर्व्वात्मनास्तौम्यहं ॥
× × × × ×

भगवतः श्रीसुगुडेश्वरस्य प्रतिहतप्रतिसरत्यात्रोत्सवप्रसङ्गेनायातानां प्रमुदित-द्विजराजपुत्रादीनां समाजः ॥ इहहि ॥

श्रीमत्पात्रपवित्रसूर्य्यनिवहाः सत्कीर्त्तिभोजार्णवा
एते शास्त्रविशारदा द्विजगणा सत्यार्थगाढाश्रयाः ।
एते साधुजनाः प्रदानसुमुखाः शीलाम्बरालङ्कृता
विद्वत्वर्गवराः श्रुतादिपटवो भान्ति ध्रुवं सुस्थिते ॥

आकाशे कर्णं दत्वा । किमादिशन्ति सन्तः ॥ सकलसीमन्तिनीकर्णावतंससकलार्थिमुखकमलकुट्मलप्रबोधभास्करविविधविवेकसागरावगाहनपण्डितप्रत्यर्थिपार्थिवमत्तकुञ्जरदमनांकुश उत्तरविहारमहापात्रपादे नः समादिष्टा गीतिसभासभ्यसंरञ्जनार्थम् ॥ स्मरणमभीनीय । अस्ति कवेः कविकमलभास्करस्य जयतस्य कृतिरभिनवमहीरावणवधो नाटकः प्रवर्त्तयितव्यः ॥

III. 362 C. नागरकसर्व्वस्व । 13 × 2 inches. Folia 37, pierced by a hole towards the left of the centre. Lines 5 on a page. Extent in ślokas, 487. Date? Character, Newári. Appearance, old. Verse. Correct.

Already fully described in page 109 of my Nepal Catalogue. In the MS. the last leaf is wanting. The complete MS. is in the Durbar Library, No. 1648.

III. 362 D. वज्रयोगिनी साधनम् । 10½ × 2 inches. Folia 6, pierced by a hole towards the left of the centre. Lines 6 on a page. Extent in ślokas 108. Date N.S. 274 = 1154. Character, Newári. Appearance, old. Prose and verse. Incorrect.

The End. इन्द्रभूतिक्रमवज्रयोगिनीसाधनं समाप्तम् कृतिराचार्य्यविजयवज्रस्य । सम्वत् २७४ कार्त्तिक कृष्ण त्रयोदश्यां श्रीः ।

It begins ओं नमो वज्रवाराह्यै ।

मध्यमोत्तमश्वासेन गन्धोदकसहितेन तु
कुलिकां पूजयेन्नित्यं योगी कालविशेषतः ।

इति तन्त्रान्त × मध्यमोत्तमश्वासेनेत्यादि इह मध्यमा अवधूती । आलीकाल्योर्मध्ये अग्निरेखा प्रवाहिनी । तस्याश्वासा यच्छताधिके कवि × तिसहस्राणाम् मध्ये । अहोरात्रेण द्वादशलग्नसंक्रान्तिषु पञ्चसप्ताधिकषड्दशसंख्याशेषाय च सपादनवशताधिकम् विंशतिसहस्रसंख्या ललनारसनाप्रवाहिणः प्रत्येकम् वृषभादौ समलग्ने । तयोराद्यम् ते श्वासा प्रत्येकम् संक्रान्तिकाले समविषमलग्नयोर्मध्ये मध्यमाया अवधूत्याः सपादपञ्चाशत्संख्या अधमा प्राणिनां मृत्युदायका । कुलिकाकारसम्भूता खरस्वभावा । अरिष्टमरणवञ्चका कालाग्निप्रवाहित्वात् । शेषा षट्पञ्चाशत् ध्रुवा ललना रसना पञ्चपञ्चमण्डलवाहिनः । अष्टादशशतश्वासाः तेषु प्रत्येकमण्डलवाहिनः

षड्गुत्तरशतत्रिंशत्संख्या सपादैकादशश्वासोना। अत्र मण्डलानि आकाशादीनि पञ्च ललनायाः पृथिव्यादीनि पञ्च रसनायाः। इह नाभिपद्मदले यथासंख्यं अधोपूर्व्ववामे पश्चिमे दक्षिणे आकाशवायुवह्नि-तोयपृथिवीमण्डलानि। कर्णिकाया विषुवषड् चन्द्रयो यथा मध्ये ऊर्द्ध मध्ये वामे अधो यथाक्रमेण वामे शून्यादिकं दक्षिणे भूम्यादिकम् षष्ठु नासारन्ध्रयोः यौगपद्येन सपादषट्पञ्चाशत् श्वासात्मकमिति।

Leaf 3 B. इति मध्यमोत्तमश्वासभेदेन कुलिकापूजाविधिः समाप्तः। लौकिक लोकत्तरसत्येन भगवतोक्त इति।

नमः श्रीवज्रयोगिन्यै।

श्रीवज्रसम्बरं वन्दे सर्व्वसत्त्वात्मकं विभुम्।

शून्यताकरुणाभिन्नं सहजानन्दस्वरूपम्॥

आदौ तावत् उत्पादितबोधिचित्तयोगी मनोनुकूले देशे अवस्थितः पश्चिमाभि-मुखः ध्यानस्थाने उत्पादितो त्तियान (?) महाश्मशानादिमोक्षः नग्नो मुक्तकेशः अथवा रक्तवस्त्रपरिधायी रक्तमुकुटी सेवितपञ्चामृतः प्रथमतः चतुर्ब्रह्मविहार भाव-येत्। ततो झटिति वक्ष्यमाणदेव्यहंकारेण चतुश्चतुरहङ्कारात् चतुर्दिक्षूच्चार्य्य समन्ततो वज्रप्राकारवज्रपञ्जरं भावयेत्। अथवा शुम्भनिशुम्भादिचतुर्मुखमन्त्रेण रक्षां विद-ध्यात्। ततः सर्व्वधर्म्मनिरवलम्बनं शून्यतां विभाव्य मन्त्रमुच्चारयेत् ॐ शून्यताज्ञानवज्र-स्वभावात्मकोऽहमिति। ततः शुक्ल अकारात् हेतुवज्रपरस्वभावात् पृथिव्यादिचतु-र्महाभूतस्वभावः यं रं वं लं कार परिणतम् चतुरत्नमयं सप्तपर्व्वतसप्तपीताकल्पवृक्ष-द्वादशद्वीपपरिकरितम् सुमेरुं भावयेत्। तन्मध्ये हरितहुङ्कारपरिणतम् पञ्चाङ्गुल-स्वभावम् विश्ववज्रं तन्मध्ये रक्तएकारपरिणतलोहितवर्णशरीरस्वरूपम् ऊर्द्ध-धर्म्मोदयं त्रिकोणम् वज्राङ्कितम् ज्वालामालासहितम् नवद्वारस्वभावाष्टदलपद्मसव्यो-परिस्थं दन्तं चतुर्नाडीस्वभावं चतुर्द्दलकमलोपरि चण्डांशुमण्डला अवधूतीस्वरूप-शूकतीपरिणतां वज्रयोगिनीं किंशुकपुष्पसन्निभां स्फुटतरपीतलोहितां शोभनार्थां सुकुमारयौवनां ललितक्रोधमुखीं पञ्चमुद्रामुद्रितां पञ्चाशतनरशिरोहारधरां आलो-ढचरणाक्रान्तचतुर्ब्रह्मविशुद्धब्रह्मेन्दुहरिहरां वैरोचनमुकुटिनीं प्रथमदक्षिणवामकरतल-कलितवज्रवज्रपाण्यै पादालिङ्गनाभिनया पुनर्दक्षिणकरे कम्रीवामाकरलितोर्द्धनभ-स्तलविलसत्कपालनिविष्टदृष्टिं वामाङ्गखट्वाङ्गसङ्गतां तदनु ज्वालामुद्रां वद्ध्वां फेत्कार-शब्देन वीरवीरेश्वरीपरिवृत्तम् ज्ञानचक्रं पुरो दृष्ट्वा पारदेशनादिकं कृत्वा अमृतस्वादा-दिना सन्तर्प्य अङ्कुशमुद्रां वद्धा अःकारत्रयेण प्रवेशयेत्।

III. 362 E. हरिश्चन्द्रोपाख्यानम्; 13 × 2 inches. Folia 24, pierced by a hole towards the left of the centre. Lines 5 on a page. Extent in ślokas 432. Date ? Appearance, old. Character, Newárí. Verse. Incorrect.

The story of Harīscandra is given in the form of a Purāṇa, in which Agastya and Vaisampāyana are the first interlocutors, and Ráma and Hanumán are the second interlocutors. A Kuṭṭini comes to tempt Harīscandrá's wife in her distress.

The MS. belonged to that Jayasiṃha, at whose instance Mahī-Rāvaṇa Nāṭaka was written. The date of copying is N.S. 495.

**सम्वत् ४९५ माघकृष्णपञ्चम्यां तिथौ स्वातिनक्षत्रे ध्रुवयोगे सोमवासरे दिने समाप्तमिदं + + लिखित श्री नेपालदेशे श्री श्री श्री श्री पशुपतिपटनात् दक्षिणस्यां दिशि श्रीवाग्मत्यायाः दक्षिणकूले श्री ललितपुरे श्रीमाणिगलोत्तरविहारे ।**

as in Mahī-Rāvaṇa Badha Nāṭāka.

III. 362 F. **कालज्ञान ।** 12 × 2 inches. Folia 3, pierced by a hole towards the left of the centre. Lines 4 on a page. Extent in ślokas 17. Date ? Character, Newári. Appearance, old. Verse. Incorrect.

It begins **ओं नमः शिवाय ।**

**देहस्थः सकलो ज्ञेयो निस्कलो देहवर्ज्जितः ।**
**व्याप्यव्यापकरूपेण सर्व्वतः स व्यवस्थितः ॥**
**हंस हंस इति यो ब्रूयात् हंसोदेवः सदाशिवः ।**
**गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं सर्व्वतोसुखं ॥**
**तिलानाञ्च यथा तैलं पुष्पगन्धसमाश्रितः ।**
**पुरुषस्य शरीरेऽस्मिन् सबाह्याभ्यन्तरे स्थितः ॥**
**उल्काहस्तो यथा कश्चित् द्रव्यमालोक्यतां व्रजेत् ।**
**ज्ञानेन ज्ञेयमालोक्य तथा ज्ञानं परित्यजेत् ॥**
**पुष्पं तु सकलं विद्यात् गन्धस्तस्यैव निष्कलः ।**
**विल्वं तु सकलं विद्यात् छाया तस्यैव निष्कला ॥**
**सकलनिष्कलभावेन सर्व्वत्रैवं व्यवस्थितः ।**
**सकलैः सकलं विद्यात् निष्कलैर्निकलं तथा ॥**
**त्रिमात्रश्च द्विमात्रश्च एकमात्रस्तथैव च ।**
**अर्द्धमात्रा परा सूक्ष्मा स्मामादूर्द्ध्वं परापरम ॥**
**ब्रह्माविष्णुश्च रुद्रश्च महेश्वरः शिव एव वा ।**
**पञ्चमः पञ्चदेवेभ्यः सकलः परिपठ्यते ॥**
**ब्रह्मा च हृदयस्थाने कण्ठे विष्णुः समाश्रितः ।**
**तालुमध्ये स्थितोरुद्रः ललाटस्थमहेश्वरम् ॥**
**नादाग्रन्तु शिवं विद्यात् तस्यान्तन्तु परापरम् ।**
**परात् परतरं नास्ति इति शास्त्रस्य निश्चयः ॥**

गमागमं कथं तस्य केन वा नीयते तु सः ।
संशयो मे महादेव कथयस्व यथार्थतः ॥
नीयते शक्तिना जीव तस्मिन् प्राप्य निवर्त्तते ।
तस्मात्तं संप्रवक्ष्यामि शृणु षण्मुख तत्त्वतः ॥
देहातीतं तु तं विन्द्यात् हृदं तद्द्वादशाङ्गुलम् ।
अन्तस्थं तं विजानीयात् तनुस्थो व्यापयेत् प्रभुः ॥
मनोप्यन्यत्र निक्षिप्तं दृष्टिप्यन्यत्र पातिता ।
तथापि योगिनां योगः अव्युच्छिन्नः प्रवर्तते ॥
एतत्तत् परमं गुह्यं एतत्तत् परमं पदं ।
एतत्तत् परमं ब्रह्म एतत्तत् परमाक्षरम् ॥

It ends इति कालज्ञानं श्रीमहेश्वरभाषितम् समाप्तम् ॥

For a larger work see Nepal Catalogue of 1905, p. 80, and the Preface lix.

III. 362 G. महासंवर्त्तनकथा By सर्व्वरक्षित । 12 × 2 inches. Folia 26 (first 2 leaves are missing), pierced by a hole towards the left of the centre. Lines 6 on a page. Extent in ślokas 534. Date N.S. 544 = 1424 A.D. Appearance, old. Character, old Newári. Correct.

It ends सूक्तं यदेव भवितात्र तदेव बौद्धम् ।
स्याच्चेत् द्विरुक्तमपि किञ्चन × × दोषः ॥
आलोकमेव विदधाति सदैव भानुः ।
चक्षुःप्रभावहरणन्न तमस्तदीयम् ॥
अभ्यासविधिना वचनेन बौद्धे ।
पुण्यविशुद्धिसुभगं यदुपार्ज्जितं मे ॥
तेनाधिगम्य निखिलान् स्वयमेव भावान् ।
कृत्वा नृणां करगतामिव देशयेयम् ॥
गुरुपर्व्वक्रमनाम चरमो विश्रामः
समाप्त इति
षष्ठञ्च विचित्रार्थकाण्डम् । समाप्ता महासंवर्त्तनकथा ।
कृतिराचार्य्यश्रीभदन्तसर्व्वरक्षितस्य महाकवेः । वृत्तानि दशोनानि चत्वारिंशतानि । अनुष्टुप्छन्दसा गण्यमानानि पञ्चशतानि चतुस्त्रिंश-दधिकानि ग्रन्थ ५३४ । ये धर्म्मा etc., . . . . . शुभमस्तु सर्व्व-जगताम् । सम्वत् ५४४ आषाढ ।

Leaf 3 B. ञ्रौं कुमारोदयो नाम द्वितीयः विश्रामः ।
4 B. बुद्धत्वाधिगमोनाम तृतीयः विश्रामः ।
5 B. तीर्थ्यपराजयोनाम चतुर्थ विश्रामः ।
प्रथमञ्च निदानकाण्डम् ॥
6 B. द्वितीयकाण्डे आकाशस्यदेवोदयःनाम प्रथमः विश्रामः ।
7 B. द्वितीयकाण्डे पृथिवीनिवासो नाम द्वितीयः विश्रामः ।
8 B. द्वितीयकाण्डे नगेन्द्रवासिदेवोदयो नाम तृतीयः विश्रामः ।
9 A. मत्तर्योदयोनाम चतुर्थः विश्रामः ।
द्वितीयञ्च विवर्त्तमानावस्थाकाण्डम् ।
10 B. तृतीयकाण्डे आहारोदयो नाम प्रथमः विश्रामः ।
12 A. तृतीयकाण्डे वर्त्तनोपायारम्भः नाम द्वितीयः विश्रामः ।
13 B. " वर्णविभागोनाम तृतीयः विश्रामः ।
14 B. " विविधोपकरणोदयो नाम चतुर्थो विश्रामः ।
तृतीयञ्च विवृत्तावस्थाया एकान्तसुखोपस्थानकाण्डम् ।
15 B. चतुर्थकाण्डे पर्य्येषणारम्भो नाम प्रथमो विश्रामः ।
16 B. " कलिप्रवेश नाम द्वितीयो विश्रामः ।
18 A. " अन्तरसंवर्त्तवृत्तान्तो नाम तृतीयो विश्रामः ।
18 B. " कल्पैकादशवृत्तान्तो नाम चतुर्थविश्रामः ।
चतुर्थञ्च विवृत्तावस्थायां सुखदुःखावस्थानकाण्डम् ।
19 B. पञ्चमकाण्डे सत्त्वसंवर्त्तोनाम प्रथमः विश्रामः ।
21 A. " सूर्य्योदयोनाम द्वितीयो विश्रामः ।
21 B. " धातुसंवर्त्तो नाम तृतीयो विश्रामः ।
22 B. " संसारोद्वेजना नाम चतुर्थविश्रामः ।
पञ्चमञ्च संवर्त्तमानावस्थान काण्डम् ।
23 A. षष्ठकाण्डे संवृत्तावस्थाननयो नाम प्रथमो विश्रामः ।
23 B. " द्विसंवर्त्तनानयो नाम द्वितीयो विश्रामः ।
24 A. " भद्रार्थद्योतनो नाम तृतीयो विश्रामः ।
25 A. " given above.

The following is the text of the 4th Viśrāma of the 4th kāṇḍa :—

दृष्ट्वान्योन्यमथोमत्तर्या प्रीता श्लिष्यन्ति मित्रवत् ।
संदधत्त्वशमः कल्पस्तान् प्रतीतिः भविष्यति ॥
शुभमाङ्गल यास्यन्ति शेषमत्तर्या इवग्रहा ।
वीतदोषा भविष्यन्ति मुनेः शिष्या इवर्त्तवः ॥

वाह्याध्यात्मिकभावेषु गतेष्वेवं समात्मतां ।
धर्म्मस्य भवितैश्वर्य्यं सुखस्यैव निरत्ययम् ॥
भवितारोऽन्यमत्योश्चोत्तुङ्गा सुङ्गाश्च देहिनः ।
विंशत्यब्दसहस्रायुः तद्धिताद्द्विगुणायुषः ॥
अग्रोत्कर्षवतां नृणां गृहलक्ष्मीरिवैषिता ।
पञ्चवर्षशता कन्या वरदेया भविष्यति ॥
आयुषानुगुणं तेषां भावि रूपादिसौष्ठवम् ।
समन्ततो सुखं पुण्यम् किमिएं न समाक्षिपेत् ॥
कुक्कुटाशयदेशस्थे जगत् भ्रमेन्निरन्तरम् ।
आकाशमिव नक्षत्रैः शोभां धास्यति भूयसीम् ॥
एकान्तशुद्धतां गन्तुं जानतेव वसुन्धरा ।
यथा नीरा खिला सेधा अल्पशः कृत्वा शमिष्यति ॥
सुखपक्षे समुन्नते सुपक्षेऽधो निमंक्ष्यति ।
दुःखमेष्यति पञ्चत्वम् दुःसहो हि रिपूदयः ॥
सर्व्वसम्पत्सहायेन सुखेन वाभिराधिता ।
विप्रोषितस्य दुःखस्य स्मरिष्यन्त्यपि नो जनाः ॥
\+ \+ \+ \+ \+
सोऽयं विवृत्य इति तिष्ठति लोकधातुः ।
सूर्य्योदयात् प्रभृति विंशतिमेव कल्पान् ॥
एतावतोदयनखेदमिवोपनीय ।
प्रस्थास्यते प्रलयधातो इवोपरिष्टात् ॥

III. 362 H. महाकौलज्ञानविनिर्णयः By मत्स्येन्द्रपाद or मच्छघ्नपादा। 12 × 2 inches. Folia 35 (first two leaves missing), pierced by two holes to the right and left of the centre. Lines 6 on a page. Extent in ślokas 726. Date ? Character, Transition Gupta. Apppearance, old. Verse. Correct.

It ends
मांसपलं वलिं देया ताम्बूलं चन्द्रसंयुतम् ।
धूपञ्चन्दनसौरभ्यं अगुरुं मृगनाभिकम् ॥
रक्तपुष्पै विशेषेण सुगन्ध × × ।
उग्राणि यानि पुष्पानि गन्धहीनं न दापयेत् ॥
वहिस्थं पूजनं प्रोक्तं आध्यात्मं शृणु साम्प्रतम् ।
रक्ताम्बरधराः सर्व्वे रक्तगन्धसुलेपनाः ॥
षोड़शाकृतयः सर्व्वे \+ \+ विभूषिता ।
प्रसन्नवदनाश्चैव पिवन्तं मदिरासवम् ॥

इच्छारूपधराः सर्व्वे जरामरणवर्ज्जिताः ।
सृष्टिप्रवर्तकाः सर्व्वे वरदानैकतत्पराः ॥
× × दाध्यायेत् श्चिरात् तत्समो भवेत्

Colophon. इति ज्ञाननिर्णये महायोगिनीकौलश्रीमत्स्येन्द्रपादावतारिते चन्द्रद्वीप-
विनिर्गते चतुर्विंशतितमः पटलः ।

Post Colophon. गुह्यापदपरं प्रोक्तं दशकोटिसुनिश्चयः ।
सिद्धानां योगिनीनाञ्च हृदयं परमदुर्लभम् ॥
गुह्यात् गुह्यतरम् नाथेः सारात् सारतरं परम् ।
सम्यगेतत् मया भद्रे अप्रकाशं प्रकाशितम् ॥
महाकौलं महादेवी शतै र्दशभिः समितम् ।
ज्ञानस्य निर्णये सारमाष्टासाहास्रिकं मतम् ॥
इति महाकौले ज्ञाननिर्णये सारम् श्रीमत्स्येन्द्रपादा . . . .

Leaf 3 A. इति ज्ञानस्य निर्णीतियोगिनीकौलम्महत् श्रीमच्छ्रग्रपादावतारिते
चन्द्रद्वीपविनिर्गतः प्रथमः पटलः ।

3 B. × × × × द्वितीयः पटलः ।

देव्युवाच ।

पञ्चाग्नितापसन्तप्तवर्षकोटिरनेकधा ।
तपस्तपस्यसे सम्यक् त्वत्प्रसादेन भैरव ।
सृष्टियोगं मया ज्ञातम् संहारं कथयस्व मे ।

भैरव उवाच ।

साधु त्वा कथयिष्यामि संहारन्तु यथा भवेत् ।
कालाग्निरुद्रसंज्ञातु नखाग्रे नित्यसंस्थितम् ॥
यदा प्रोज्ज(ल)ते ऊर्द्ध्वं संहारन्तु तदा भवेत् ।
वडवामुख(मध्य)ञ्च पाताले सहसोत्थितम् ॥
सप्तपातालमुद्दिष्टे तस्योर्द्ध्वे स्वर्गसंस्थितम् ।
एतानि कथिता सर्व्वे भुवनानि चतुर्द्दश ॥
ज्ञातव्या देहमध्ये तु तत्त्वरूपा स्थिता प्रिये ।
सर्व्वज्ञा ( नन ) संलीनं लयश्च शक्तिगोचरः ॥
शिवमध्ये गता शक्तिः क्रियामध्ये स्थितः शिवः ।
ज्ञानमध्ये क्रिया लीना क्रिया लीयति इच्छया ॥
इच्छा शक्तिः लयं याति यत्र तेजः परः शिवः ।
संहारन्तु इमं भद्रे कथितं तव शोभने ॥

5

संहारन्तु यदा न्यस्तम् क्रुद्ध संहरते जगत् ।
सृष्टियोगं यदा न्यस्तम् सृजत्येव चराचरम् ॥
अधस्तात् संस्थिता भूमि ऊर्द्ध मूर्त्ति वरानने ।
पूर्व्ववत् सूचितं देवि सृष्टियोगं मया तव ॥
सृष्टिसंहारन्यायेन कुलार्थमुपवर्णितम् ।
किमन्यं पृच्छसि नाथे सुगोप्यं प्रकटीकृतम् ॥
इति + + + + द्वितीयः पटलः ॥

देव्युवाच ।

कुललक्षम् महेशानि आत्मसम्वित्तिपूर्व्वकं ।
एतन्मे संशयो नाथ प्रसादी भव शङ्करः ॥

भैरव उवाच ।

शृणु मे एकाग्रचित्ता कुललक्षं निगद्यते ।
यत्तत्र दृष्टिः मनस्तत्र भूतेन्द्रिय सपुद्गलः ॥
स्वशक्तिजीवभूतानि दृष्टिलक्षलयं गता ।
स्थानं ध्यानञ्च वर्णञ्च लक्षणञ्चैव चतुष्टयम् ॥
पिठ (?) संज्ञा भवेत् स्थानं ध्यानं तत्पदमुच्यते ।
वर्णंरूपं विनिर्द्दिष्टं लक्षम् वै रूपवर्ज्जितम् ॥
पिण्डञ्चोपपदं रूपं रूपातीतं वरानने ।
स्थाने स्थाने स्थितं देवी एकैकस्य चतुर्विधम् ॥
चतुष्पत्रञ्च अष्टारं द्वादशारम् वरानने ।
× × × ×
× × × ×
कर्णिकाकेशरैर्युक्तं दीप्यमानं नभस्तले ।
तस्यार्द्धे व्यापकं तत्र नित्योदितमखण्डितम् ॥
स्वातन्त्रमोक्षमचलम् सर्व्वव्यापी निरञ्जनम् ।
तस्येच्छया भवेत् सृष्टिः लयं तत्रैव गच्छति ॥
तेन लिङ्गन्तु विख्यातं यत्र लीनं चराचरम् ।
अखण्डमण्डलं रूपं निर्विकारं सनिष्कलम् ॥
अज्ञानावन्धमुद्दिष्टं ज्ञात्वा बन्धैः प्रमुच्यते ।
उन्मनं मनोरहितम् ध्यानधारणवर्ज्जितम् ॥
प्रत्यक्षं सर्व्वदा नित्यं अतसीपुष्पसन्निभम् ।
सर्व्ववर्णमयं देवं सर्व्ववर्णविवर्ज्जितम् ॥
ज्ञानगम्यं महादेवि पारम्पर्य्यक्रमागतम् ।

कथितं देवि सद्भावं कुललक्षं यथास्थितम् ॥
न काष्ठं मृण्मयं लिङ्गं न शैलरत्नसम्भवम् ।
— — — — — ॥
अष्टादशलोकशास्त्राणि क्रूराश्चाध्यात्मिकास्तथा ।
तैस्तु चेत् पूजितं देवि मनसापि न पूजयेत् ॥
— — — — — ।
ब्रह्माद्यास्तु सुराः सर्व्वे असुराश्च तपोधनाः ॥
यक्षगान्धर्व्वसिद्धाश्च तृणगुल्मपिपीलिकाः ।
ग्रहनक्षत्रतारादिजगत्स्थावरजङ्गमम् ॥
निष्क्रान्ता विन्दुमध्ये तु लोलीभूतं तु तत्समम् ।
सृष्टिसंहारकर्त्तारम् तल्लिङ्गं सिद्धपूजितम् ॥
स्फुरन्तं निर्म्मलं नित्यम् अप्रमेयं ममोदितम् ।
ज्वलन्तमुल्कसदृशं विद्युत्तेजो नभस्तले ॥
एतत् लिङ्गवरं ज्ञात्वा दृष्ट्वा मोक्षस्य भाजनम् ।
पाषाणदृष्टिसङ्घाते महामेघैः सुदारुणैः ॥
नमस्येत् अग्निना लिङ्गं न पातः वज्रताडितम् ।
एतत्तु पूजयेत् देवि कौलिकं सिद्धिमिच्छता ॥
अर्च्चयेम्मानसैः (पुष्पैः) सः सुगन्धैः धूपदीपितैः ।
अहिंसा प्रथमं पुष्पम् द्वितीयेन्द्रियनिग्रहम् ॥
तृतीयस्तु दया पुष्पं भावपुष्पं चतुर्थकम् ॥
पञ्चमन्तु क्षमापुष्पं षष्ठं क्रोधविनिर्ज्जितम् ।
सप्तमं ध्यानपुष्पन्तु ज्ञानपुष्पन्तु अष्टमम् ॥
एतत् पुष्पविधिं ज्ञात्वा अर्च्चयेत् लिङ्गमानसम् ।
भुक्तिमुक्तिमवाप्नोति देहलिङ्गार्च्चने स तु ॥
सिद्धलिङ्गमिदं देवि देहस्थं प्रत्ययान्वितम् ।
मनोलिङ्गं सदा ध्यायेत् यां यां फलसमीहते ॥
तां लभते न सन्देहो आत्मसम्वित्तिपूर्व्वकम् ।
एतत्तु कौलिकं देवि देहलिङ्गस्य लक्षणम् ॥

III. 363 A. $11\frac{1}{2} \times 2$ inches. Folia 14, pierced by a hole towards the left. Lines, 8 on a page. Extent in ślokas, 600. Character, Newári. Date? Appearance, old. Prose. Incorrect.

Beginning. नमो बुद्धायः ।

हस्तिदन्तचूर्णं अमला अन्तर्धूमेन दग्ध्वा तैलं पचेत् । अभ्यङ्गात् खल्वटङ्कः कुञ्चितकेशो भवति ॥ करिदन्तचूर्णं अमलाचूर्णं भृङ्गराजरसेन

तैलं पचेत्। लेपात् कुञ्चितकेशो भवति॥ रसाञ्जनकरिदन्तअजादुग्धेन सहलेपात् कुञ्चितकेशो भवति॥ गुञ्जादलं त्वक्पटुकमांसी एषां पिष्ट्वा भृङ्गराजरसेनतैलं पचेत्। केशप्रचुरतर भवति॥ भलातकवृहतीदल-मूलं वा मधुना सह लेपात् मलायिखट्टां नाशयति॥ मन्दारपुष्पं कृष्ण-गाभीमूत्रेण लेपात् मलायिखट्टां नाशयति॥ वृहतीफलरसेन गुञ्जामूलं वा लौहमलेन सह पचेत् मनायिखट्टां नाशयति॥ अश्वगन्धामूलं नीलोत्पलपुष्पं त्रिफलावहेडादलममी (?) मधूफल वल्कलम् प्रियङ्गु। एषां पिष्ट्वा लेपात् केशो नोत्पटति। अमलाकुटजः पलमांसी वच एषां पिष्ट्वा शिरसि लेपात् × घनकेशो भवति। अश्ववीज अमला समभागं कृत्वा स्नानकाले शिरसि लेपात् केशोनोत्पटति। नीलोत्पल-नागकेश यष्टीमधु अमला एषां पिष्ट्वा समभागं शिरसि लेपाद्रुहि नाशयति। मासचूर्णं अर्कदुग्धेन भाव्यम्॥ एकविंशतिवारान् सुखावयित्वा मूत्रधूमेन दग्ध्वा कटुतैलेन लेपात् केशरोगान् नाशयति॥

The End. कृतिरियम् आचार्य्य श्रीनागार्जुनपादानामिति।

After the end, begins another work, of which only five lines are to be found in this MS. as

नमो बुद्धाय।

नागार्ज्जुनं महाप्राज्ञं सर्व्वशास्त्रविशारदं।
सुसंक्षिप्तचिकित्सार्थं आर्य्यदेवो महातपाः॥
कारुण्यात् सर्व्वसत्त्वानां दरिद्राणाम् तथा परम्।
प्रणम्य परया भक्त्या सारं सम्परिपृच्छति॥
कथमल्पोपचारेण रोगोपशमनं भवेत्।
इत्याह भगवान् मण्ड-कल्पं सर्व्वसुखावहम्॥
क्षीरेण यः पिवेत् मण्डं मासमात्रं निरन्तरं।
रसायनगुणस्तस्य भवत्येव न संशयः॥
जीवेत् वर्षशतं पुर्णं सर्व्वरोगविवर्जितः।
दृष्टिपुष्टि यतः श्रीमान् बलिपलितवर्ज्जितः॥
पिवेत् त्रिकटुचूर्णेन सद्योज्वरविनाशनम्।
पीत्वा विडङ्गचूर्णेन दन्तरोगं विनाशयेत्॥
पीत्वा परखडचूर्णेन हृदयशूलविनाशनम्।
गुह्यशूलं गुडेनैव शर्करमिश्रितं पिवा॥
जीवा अतिसारमुपशामयेत्॥

गोमूत्रं मिश्रयित्वा सन्निपातविनाशनम् ।
कण्टकारिचूर्णेन सह कुक्षि......... ॥

Here ends the five lines of Maṇḍakalpa attributed to Nāgārjuna with whose name that of Āryadeva is associated. The main work in this MS. has no name. It appears to be the notes of an Āyurvedic Physician, who attributes them to Nāgārjuna. It is written in very small letters and the Sanskrit is not of the happiest kind.

III. 363 B. $10\frac{1}{2} \times 2$. Folia 13 and 8, pierced by a hole towards the left. Lines, 7 per page. Extent in ślokas, 500. Character, old Newári. Date ? Appearance, old. Prose and Verse. Correct.

There are two works in this MS. One may be named सेकादिकोद्देशपदम् which runs from leaf 1 to leaf 13 without coming to an end, leaf 1 being written on both sides. The other work is entitled कल्याणकामधेनुविवरणम् and extends from leaf 3 to leaf 10. The first is written in a very old hand and has the look of Transitional Gupta, while the other is old Newári. It is dated N.S. 224.

The Ist MS. begins :—

नमः श्रीपरमादिबुद्धाय ।
नत्वादिबुद्धं त्रिभवैकनाथम्,
सम्बोधिसत्त्वं सह धर्म्मसङ्घं ।
श्रीमद्गुरोः पादकृतोपदेशात्
सेकादिकोद्देशपदं तनोमि ॥

अथ वज्रपाणिनिर्म्माणकायः सुचन्द्रोराजा परमादिबुद्धतन्त्रराजोत्सवार्थं भगवन्तं पृच्छति सुचन्द्र आहेति हे शास्तः सेकः सप्तविधः उदकादिअनुज्ञावसाना । अपरः त्रिविधः कलसादिप्रज्ञाज्ञानान्तः अनुत्तरस्तथेति महामुद्राज्ञानलक्षणम् । लौकिकलोकोत्तरसिद्ध्यर्थमिति लौकिकसिद्धिराकनिष्ठभुवनपर्य्यन्तम् । लोकोत्तरञ्च बुद्धत्वम् महामुद्राक्षरज्ञानम् । एतदर्थसंक्षेपात् कथयस्व मे ममेति शृणुवत्यादि भगवतो वाक्यम् उद्देशसमाप्तिं यावत् । परमिति महामुद्राक्षरज्ञानम् । नाडीनाम् वामदक्षिणमध्यमादीनाम् सञ्चारो वामदक्षिणमध्यरन्ध्रेषु गमनागमनम् । नाडीसञ्चारम् आयाममिति प्राणायामम् । उद्देशात् ते तव कथयामि । इदानीम् उद्देशादेःप्रभेदमाह । उद्देशः त्रिविधः तन्त्रे सर्व्वस्मिन् । तथा निर्द्देशस्त्रिविधो भवेत् । तदुद्देशनिर्द्देशयोः प्रत्युद्देशमाह । प्रत्युद्देशोमहद्देशः इत्युद्देशस्य प्रभेदः । प्रतिनिर्द्देशकोऽपरः इति महानिर्द्देशः आक्षिप्तः । एतौ च निर्द्देशस्य प्रभेदौ । एषां व्यापारमाह ।

उद्देश एव इत्यादि । X एवं उद्देशः स एव निर्द्देशः । स च तन्त्रसङ्गीति

